रातुश्शृंखला हिंजीरो स्त्रीस्यादंकुशाश्वसः॥ पित्तज्वरः पाकलोस्य कूटपू र्वस्त्रिदोषजः॥ ३१॥ अश्वकिल्कीहरिक्रांतः शालिहोत्रश्वमुद्गभुक्॥ श्रीपुत्रश्चामरीहेषीराजस्कंधोमरुद्रथः॥ ३२॥ वातायनश्वैकशफोयेस्तु पंचांगपुष्पितः॥ सपंचभद्रः सूर्याश्वेवाताटहरितोसमौ॥ ३३॥ याया व गेश्वमेधीयः पारसीकः परादनः॥ आवट्टजेश्वचोस्कस्तु सिंधुवारोह योत्तमः॥ ३४॥ वाताश्वजात्याः आजानेयोविशरोश्वतरः खरः॥ श्रीवृक्ष- कोल्हदावर्तोरोचमानोगलोद्भवः॥ ३५॥ ऊर्ध्वस्थितिः पुरुषिको विक्रांति स्तुपलायितं॥ पुलासन्नाह प्रखरोकवियंकविकोच्यते॥ ३६॥ ग्रीवा घंटाघर्घरास्याद्रश्मिः प्रवयणंचनत्॥ प्रतोदोथखुरोविखः पुटोलु ठनवेल्लने॥ ३७॥ वल्गादंतालिकापल्ययनंपर्याणमस्यतु॥ वंकाग्र भागः स्यादश्ववारोवल्लभपालकः॥ ३८॥ नंदिघोषोर्जुनरथोनीति घोषस्तुगीष्पतेः॥ चंकुरंधोरणंयानमात्रेचक्रं खरिस्मृतं॥ ३९॥ ल घ्वी त्वाष्ट्री रथीकालवलनंत्वंकवर्मणी॥ मेठो मेंडो हस्तिपकेजंघात्रा णंतुमंखुणं॥ ४०॥ स्यान्नायकाग्रेसरिकोनासीरंदर्पऊष्मणि॥ श स्त्रमायुधमुद्दिष्टं तेस्थावरंतुधनुर्गुणी॥ ४१ शरावापो धनुः स्त्रीस्या त्तूणतान्निणतापिन्वं॥ व्यध्यस्तु प्रतिकायः स्याज्जीवास्याभारवंगु

त्रीणिशृंखलायाः त्रीणिअंकुशस्य द्वेहस्तिपालकस्य ३१ द्वादशाश्वस्य ३२ त्रीणि पंचभद्रस्य द्वेसूर्याश्वस्य ३३ द्वेअश्वमेधीयस्य त्रीणिपारसीकाश्वस्य द्वेसिंधु देशाश्वस्य द्वेकुलीनाश्वस्य ३४ त्रीण्यश्वतरस्य द्वेअश्वल्हदावर्तस्य अश्वगलावर्त स्यैकं ३५ ऊर्ध्वावर्तस्यैकं द्वेअश्वगतेः त्रीणिसन्नाहस्य द्वेकविकायाः ३६ द्वेग्रीवाघं टायाः त्रीणिप्रतोदस्य त्रीणिखुरस्य द्वेलुंठनस्य ३७ त्रीणिवल्गायाः द्वेपर्याणस्य द्वेअश्वपालस्य ३८ अर्जुनरथस्यैकं बृहस्पतिरथस्यैकं द्वेयानमात्रस्य द्वेचक्रस्य ३९ त्रीणिलघुरथस्य त्रीणिवर्मणः त्रीणिहस्तिपस्य द्वेजंघात्राणस्य ४० द्वेनाय कस्य त्रीणिदर्पस्य त्रीणिशास्त्रस्य सप्तधनुषः ४१ षट्धनुर्गुणस्य ४२

ऋष्टिः खड्गः स्तरवारिः शस्त्रीभद्रात्मजश्चसः॥ धारा विषा विशास नौन्युब्जखड्गः करीतलः॥४५॥ स्यादट्टनञ्चक्रफलं पर्शुः परशुरित्यपि॥ दीर्घायुधः शलः कुंतः शल्यः शंकुर्विषांकुरः॥४६॥ श्रीलोस्त्रीसीसकं लग्नाः प्रातर्गेयास्तु तिव्रताः॥ भोगावली वंदिपाठो वस्तु कीटस्तु याचितः॥४७॥ वातकेतुः क्षितिकणः स्यात्पांशुर्मेदिनीद्रवः॥ संभारः सर्वपूर्णत्वं पताका व्योममंजरं॥४८॥ कदली कंदली चीनं मल्लवाटस्तु मल्लभूः॥ भीरुस्तु भेलो हरिणात्हृदयः स्यात्पलंकटः॥४९॥ विद्रवस्तु शृगालीस्यादाघातस्तु वधस्थली॥ कदनं मारणं मथः सौप्तिकं रात्रिमारणं॥५०॥ निपातोऽभ्युमिलाभश्च मृत्यौ रप्यथ मारकः॥ मरणो मारिरुत्पातः शवस्तु क्षितिवर्धनः॥५१॥ पंचावस्थः कटः स्थागः श्मशानं तु शातानकं॥ रुद्राक्रीडो दाहसरः संस्त्रियास क्रियौ समे॥५२॥ चिता काष्ठमठी चैत्यं चिताचूडकमिष्यते॥ चित्तं चाथांतशय्यायां रवह्निर्वारुठ इत्यपि॥५३॥ उपग्रहस्तु ग्राहः स्याद्बंदीकरमरीत्यपि॥२५४॥ ॥ इति क्षत्रियवर्गः॥ ॥

द्वे शास्त्राभ्यासस्य नव बाणस्य ४३ त्रीणि सायकस्य चत्वारि नाराचस्य ४४ सप्त खड्गस्य द्वे न्युब्जखड्गस्य ४५ द्वे चक्रफलस्य द्वे परशोः षट् कुंतस्य ४६ द्वे शूलस्य त्रीणि स्तुतिव्रतस्य द्वे स्तुतिग्रंथस्य द्वे याचकस्य ४७ चत्वारि पांशोः द्वे संभारस्य पंच पताकायाः ४८ द्वे मल्लभुवः चत्वारि भीरोः ४९ द्वे अपयानस्य द्वे वधस्थल्याः त्रीणि मारणस्य द्वे रात्रिमारणस्य ५० त्रीणि मृत्योः चत्वारि मारकस्य पंच शवस्य ५१ चत्वारि श्मशानस्य द्वे संस्कारस्य ५२ पंच चितायाः त्रीणि शवरथस्य ५३ चत्वारि बंद्याः ५४

तंतुभः॥५७॥ प्रवेटः शितशूकः स्याद्गोधूमो मुंडभोजनः॥ ताम्र
वृत्तः कुलत्थः स्यान्निः स्नेहश्चंडिकातसी॥५८॥ मूरवः पुरीषमो
माषो राजमाषस्तु वर्वटः॥ फुल्लफालः शूर्पवातेनस्त्री तितउ चाल
नी॥५९॥ कंडन्युदूखलं प्रस्थः पालिः सूदः प्रचेलुकः॥ कुसूलो व्री
ह्यगारं स्यात्कंदुरग्निष्ठ उच्यते॥६०॥ आलिंजरो नानंदो स्त्री मृत्स्ना
भांडकमुष्टिको॥ वारासनं वाः सदनं क्वणनो हंडिकास्फुतः॥६१॥
कलसी गर्गरी तुल्या स्याच्छरावस्तु मार्त्तिकः॥ शाल्ताजिरः पार्थिव
श्च मृत्कांश्यमथ लोहिका॥६२॥ खरसोंदः खरपात्रौ शिंघाणं काच
भाजनं॥ काष्ठलोही तु वातर्दूर्जीरिको दीप्यकः स्मृतः॥६३॥ कटभं
गस्तु शंठी स्यात्कांजिकं तु तुषोदकं॥ गृहाम्लं सिद्धसलिलं रक्षोघ्नं
धातुनाशनं॥६४॥ गृहिणी मधुरा हिंगु शूलहृत्सूपधूपनं॥ घर्षणी
हेमरागिण्यो हरिद्रा पीतवालुका॥६५॥ गंडोलं स्याद्गुडः स्वादुः पि

द्वे तृष्णायाः द्वे वार्धुष्यस्य द्वे ऋणस्य अर्थप्रयोगस्यैकं ५५ द्वे ऋणमुक्तेः द्वे क्षेत्रस्य
द्वे वृहद्धलस्य चत्वारि मुद्गस्य ५६ चत्वारि मसूरस्य चत्वारि सर्षपस्य ५७ द्वे यवस्य
द्वे गोधूमस्य द्वे कुलत्थस्य त्रीण्यतस्याः ५८ त्रीणि माषस्य द्वे राजमाषस्य द्वे शूर्पवा
तस्य द्वे चालन्याः ५९ द्वे उदूखलस्य चत्वारि पाल्याः द्वे कुसूलस्य द्वे कंदोः ६० द्वे
वृहज्जलाधारस्य द्वे भांडभेदस्य द्वे जलाधारस्य द्वे हंडिकास्फुतस्य ६१ द्वे क
लस्याः पंच शरावस्य त्रीणि लोहपात्रस्य ६२ द्वे काचपात्रस्य द्वे काष्ठलोह्याः
द्वे जीरकस्य ६३ द्वे शुंठ्याः अष्ट कांजिकस्य ६४ त्रीणि हिंगुनः चत्वारि हरिद्रा
याः त्रीणि गुडस्य द्वे शर्करायाः

प्यटागुडशर्करा ॥ महाश्वेतातु मधुजा प्रयस्तं स्यात्कृसंस्कृतं ॥
६६॥ चिपिटोधान्यचमसेश्चित्रापूपश्चरुघ्रणः ॥ आलिंपना तर्पणो
दीपनं मंडोदकं चनतत् ॥ ६७॥ वटकः पिष्टपूरः स्याद्धृतोपायनवायते
ने ॥ प्रहेणकं चाथ पोली पूपाली चर्पटी चसा ॥ ६८॥ सक्तुश्चूर्णके आ
पूप्योभक्तं कूरः प्रसादनः ॥ मंडोऽज्येष्ठांबुरवदिकालाजाः पारीतुदोह
नी ॥ ६९॥ निपानं स्त्रीगवीतुंबा निलिंपा रोहिणी चसा ॥ गव्यं श्रेष्ठं पुं
सवनं स्याद्दोहापनयः पुमान् ॥ ७०॥ अवदोहः पयः क्षीरं प्राग्राटं-
चाघनं दधि ॥ कट्वरं तु दधिस्नेहो जग्धिर्भोजनभक्षणे ॥ ७१॥ देह
यात्रा विष्वणनं भक्तं प्रत्यवसानवत् ॥ कल्यवर्तः प्रातराशः प्रात
र्भोजनेऽस्त्रियपि ॥ ७२॥ अनड्वान् शांकरो गंधमैथुनः शाक्करिर्वृषः ॥
ककुद्मान्पुंगवश्चाथ कंठालाजालगोणिका ॥ ७३॥ दोग्धाशाकृत्क
रिर्वत्सस्तेषामादीकनं क्रमः ॥ गवादिकं जीवधनं पलिक्नीबालग-
र्भिणी ॥ ७४॥ करकं गोमयछत्रं गोग्रंथिः शुष्कगोमयं ॥ करीषश्छ
गणो हंभारेभणं चगवांध्वनौ ॥ ७५॥ नैचिकं गोः शिरोदेशो वंदनी
यातु रोचना ॥ मंथानमंथतक्राटाः स्यादुष्ट्रः कंठकाशनः ॥ ७६॥ लं
बोष्ठाध्वगवासंतकुलनाशमरुद्विपाः ॥ भोलिर्बहुकरो वक्रग्रीवो
मेषस्तु रोमशः ॥ ७७॥ संस्फालहुडुभेडाश्च मेषीस्यादुज्ज्वालकिन्य

द्वेसितायाः द्वे तैलसंस्कृतस्य ६६ द्वे चिपिटस्य द्वे पूपविशेषस्य द्वे तृप्तेः द्वे मंडो-
दकस्य ६७ द्वे वटकस्य त्रीणिवायनस्य त्रीणिपोल्याः ६८ द्वे सक्तोः चत्वारिभक्तस्य
द्वे मंडस्य द्वे लाजानां सप्त दोहन्याः ६९ चत्वारिगव्यस्य ७० त्रीणिदुग्धस्य एकं अ-
घनदध्नः द्वे दधिस्नेहस्य सप्त भोजनस्य ७१ त्रीणिप्रातर्भोजनस्य ७२ सप्तवृष
स्य द्वे कंठालायाः ७३ त्रीणिवत्सस्य वत्सगतेरेकं गवादिधनस्यैकं द्वे बालगर्भि
ण्याः ७४ द्वे गोमयछत्रस्य द्वे शुष्कगोमयस्य द्वे करीषस्य द्वे गोध्वनेः ७५ गोःशि-
रोदेशस्यैकं द्वे रोचनायाः त्रीणिमंथानस्य दशोष्ट्रस्य ७६ पंचमेषस्य ७७ त्रीणिमेष्याः

त्नंचारुशिलामणिः॥ स्वाध्यायीपत्तनवणिग्घेडाचुक्कोश्वविक्रयी
॥८१॥ सर्वमूल्यंद्यूतबीजंहिरण्यंचकपर्दके॥ वराटकःपणास्थि
स्याद्भास्करःस्फाटिकोपलः॥ ८२॥ शालिपिष्टंधौतशिलंगल्वर्कश्च
स्कसारवत्॥ अश्मसारस्त्विंद्रनीलोवैदूर्यबालवायजं॥ ८३॥ बा-
लसूर्यमथोरक्तकंदलोविद्रुमश्चसः॥ लतामणिःप्रवालःस्याद्रा
जपट्टोविराटजः॥ ८४॥ कुरुविन्दःपद्मरागोदधीच्यस्थितुहीरकं॥
स्वर्णलोहवरंचाग्निबीजंचांपेयमित्यपि॥ ८५॥ रूप्येश्वेतरंगबी
जमिंदुकांतेमणीचकं॥ ताम्रकेतुलोहितायस्सूर्यांकंमुनिपित्त
लं॥ ८६॥ कंसेतुकांस्यकंसास्थिताम्रार्धमथमौक्तिकं॥ रसोप
लंशुक्तिबीजंसिंदूरंरक्तवालकं॥ ८७॥ पारदःसिद्धधातुस्याद्धर
बीजंचसूतकं॥ रंगंस्करेभंमृद्वंगंकुस्कंभंग्राम्यकुंकमं॥ ८८॥ हरि
तालेतुकर्बूरंगोदंतोनटसंज्ञकः॥ दारदंतुहिंगुलःस्याद्धिंगुलंरक्त
पारदं॥ ८९॥ रसगंधोगंधरसोगांधारंमांसवर्द्धनं॥ क्षारंतुस्याद्य

द्वादशाक्षागस्य ७८ ७९ त्रीणि छाग्याः अश्वगर्दभस्य ८० त्रीणिरत्नस्य द्वेपत्तनव-
णिजः द्वेअश्वविक्रयिणः ८१ षट्कपर्दकस्य चत्वारिस्फटिकस्य ८२ द्वेइंद्रनील
स्य त्रीणिवैदूर्यस्य ८३ चत्वारिविद्रुमस्य द्वेविराटजस्य ८४ द्वेपद्मरागस्य द्वे
हीरकस्य चत्वारिस्वर्णस्य ८५ त्रीणिरूप्यस्य द्वेचंद्रवर्णरूप्यस्य चत्वारिताम्र
स्य ८६ चत्वारिकांस्यस्य त्रीणिमौक्तिकस्य द्वेसिंदूरस्य ८७ चत्वारिपारदस्य
त्रीणिरंगस्य द्वेकुस्कंभस्य ८८ द्वेहरितालस्य द्वेगोदंतस्य चत्वारिहिंगुलो ८९
चत्वारिरसगंधस्य चत्वारियवक्षारस्य ९०

स्यकूटकृत्सजाकरोचित्रकरकृणु:॥९२॥ चर्मकृत्कुरटःपादुकृत्क
लादस्तुगौंजिकः॥नाडिंधमःस्वर्णकारोवात्सीपुत्रस्तुनापितः॥
॥९३॥ चंद्रिलोनरवकुट्टश्चरजकःकर्मकीलकः॥ कन्यापालःपा
लयणिर्देवलस्त्वमरद्विजः॥ ९४॥ अजाजीवस्तुजाबालोनिष्क-
श्चांडालउच्यते॥कुक्कुरेदीर्घसुरतवांतदरसनालिहः॥ ९५॥रत
व्रणोग्राममृगस्तथेंद्रमहकामुकः॥ कपिलोवक्रपुच्छश्चशयालुर
रतत्रपः॥९६॥शुन्याशुन्यंशुनीरंस्याच्चोरःशंकितवर्णकः॥
स्यात्कुंभिलश्चप्रचुरपुरुषोथकुजंभिरः॥ ९७॥ सुरुंगाहिर्वध-
श्चौरेवंदीकालस्तुमाचलः॥प्रसह्यचौरश्चिल्लुाभःस्त्रीचोरोर
तहिंडकः॥९८॥ काव्यचौरश्चंद्ररेणुःकुड्यच्छेद्यंतुखानिकं॥
संधिःसुरुंगातद्भेदाःश्रीवत्सगोमुखादयः॥९९॥कपालनालिका
नर्कुस्तर्कुशानस्तुसामकः॥वर्तनीतर्कुपीठ्यास्यात्सिंजनंतूलकार्मुकं

द्वेशिलाजतुनः द्वेत्रिफलायाः त्रीणिशूद्रस्य द्वेमहत्तरस्य द्वेमालिकस्य त्रीणि
कुंभकारस्य ९१ त्रीणिलेपकस्य त्रीणिकायस्थस्य द्वेचित्रकारस्य ९२ त्री
णिचर्मकारस्य चत्वारिस्वर्णकारस्य चत्वारिनापितस्य ९३ द्वेरजकस्य
द्वेकन्यापालस्य द्वेदेवलस्य ९४ द्वेअजाजीवस्य द्वेचांडालस्य एकादश
कुक्कुरस्य ९५ ९६ त्रीणिशुनीसंघस्य चत्वारिचौरस्य त्रीणिवधचौर
स्य ९७ चत्वारिप्रसह्यचौरस्य द्वेस्त्रीचौरस्य ९८ द्वेकाव्यचौरस्य द्वेसंधेः
द्वेसंधिभेदयोरेकैकं ९९ द्वेतर्क्वाः द्वेतर्कुशाणस्य द्वेतर्कुपीठ्याः द्वेतूलधनुः

15273

३००॥ तूलः पिचुः पिचुतूलं पिंजिका तूलनासिका॥ नंत्रका षंतुरीं स्त्री स्यात्तुग्रीष्महासेंद्रतूलके॥१॥ पन्नं ध्री पादुका प्राणिहिंता पदरथीत्यपि॥ कावारी जंगमकुटी प्रमल्कुं स्यथ खर्परः॥२॥ धारित्रा मूर्धखोलश्च सैव पत्रपिशाचिका॥ वासीतु नक्षणी नस्त्री क्रकचः पत्रदारकः॥३॥ मद्यं त्वरिष्टं मैरेयं कत्तोयं कापिशायनं॥ माध्वीच मधु माध्वीकं कपिशी काचमालिका॥४॥ वीरा दैत्या प्रसन्ना च माधवी गंधमादनी॥ गोडी च वाल्कली मध्वासवयस्सरसौ नरि॥५॥ नलिनी नारिकेरस्य स्फुरा तालस्य तालती॥ स्मरासवो सुरस्करं पारि स्यात्पानभाजनं॥ शुंडापानं मदस्थानं द्यूतकृत्कुष्माकोहलः॥ देवसभ्यस्तु सभिको लग्नकस्तृणमत्कुणः॥७॥ चुंचुरी तिंतिडी द्यूते पंचाली शारिशृंखला॥ अष्टकांगं नयपीठी नयस्तु जतुपुत्रकः॥८॥ ॥इति शूद्रवर्गः॥ ॥

इति त्रिकांडशेषे द्वितीयः कांडः समाप्तिमगमत्॥ ॥श्रीः॥

छ छ छ छ छ छ

त्रीणि तूलस्य द्वे पिंजिकायाः द्वे तुर्याः द्वे इंद्रतूलस्य १ चत्वारि पादुकायाः त्रीणि तृणादिछत्रस्य चत्वारि जल भायाः २ द्वे नखरण्याः द्वे क्रकचस्य ३ पंचदश मद्यस्य ४ द्वे गौड्याः द्वे पुष्पमद्यस्य ५ नारिकेरस्फुरायाः एकं त्रीणि तालस्फुरायाः द्वे पानभाजनस्य ६ द्वे मदस्थानस्य द्वे द्यूतकृतः द्वे देवसभ्यस्य त्रीणि लग्नकस्य ७ त्रीणि द्यूतस्य द्वे शारिशृंखलायाः द्वे नयपीठ्याः द्वे नयस्य

श्रीगनेशायनमः॥ क्षेमंकरोरिष्टतातिः स्यान्मंद्रंकरशंकरौ॥ आमुष्यायणविज्ञातौ पुत्रान्नादः कुटीचकः॥१॥ स्थपुटंविषमं संचारजीवीशरणार्थकः॥ अभिपन्नः शरणार्थीपांडुपृष्ठस्त्वलक्षणः॥२॥ उद्भटोद्दामरौत्तालेप्राविष्टः प्रेतवाहितः॥ प्रेंखोलितस्तरलितस्तृषितस्तर्षितः सतृट्॥३॥ ऊर्ध्वस्थोर्ध्वंदमौतुल्यौग्राम्योग्रामेयकः स्मृतः॥ पराचीनंप्रतीपंस्यात्समीचीनंसमंजसम्॥४॥ स्वस्थानस्थः परान्द्वेष्टियः सगोष्ठश्वउच्यते॥ दातातुदारुर्मुचिरः स्याद्विदग्धस्तुनागरः॥५॥ षिड्गोव्यलीकः षड्गस्तः कामकेलिर्विदूषकः॥ पीठकेलिः पीठमर्दोभविलप्सिदुरोविटः॥६॥ प्रघटाविच्छात्त्रगंडौमेधावीमेधिरः समौ॥ युक्तंपरिमितंभीमंत्वाभीलंप्रश्लथःश्लथः॥७॥ शिथिलोवोदआर्द्रःस्याच्चिरस्थोनायकः स्मृतः॥ स्यादायःश्रूलिकंतीक्ष्णाकर्मोशौचोनहंकृतिः॥८॥ कुसृत्याविभवान्वेषीपार्श्वकः संधिजीवकः॥ वाक्याभिधायीपुरुषः पृष्ठमांसादउच्यते॥९॥ भार्यादः स्वस्त्रियोदाताऽन्नार्थंदूषकपांसनौ॥ धृष्णुर्धृष्णग्धृष्टग्धृष्टोदशेरः सुप्तघातकः॥१०॥ दे

चत्वारिक्षेमंकरस्य द्वेविज्ञातस्य द्वौपुत्रान्नादस्य १ विषमसंचारजीविनः एकं त्रीणिशरणार्थिनः द्वेअलक्षणस्य २ त्रीण्युद्भटस्य द्वेप्रेतवाहितस्य द्वेतरलितस्य त्रीणितृषितस्य ३ द्वेऊर्ध्वस्थस्य द्वेग्राम्यस्य द्वेप्रतीपस्य द्वेसमीचीनस्य ४ गोष्ठस्यैकं त्रीणिदातुः द्वेविदग्धस्य दशषिड्गस्य ६ द्वेछात्रगंडस्य द्वेमेधाविनः द्वेयुक्तस्य द्वेभीमस्य द्वेशिथिलस्य ७ द्वेआर्द्रस्य द्वेनायकस्य द्वेतीक्ष्णाकर्मणः द्वेअनहंकृतेः ८ संधिजीवनस्यैकं वाक्याभिधायिनएकं ९ अन्नार्थस्वस्त्रीदातुरेकं द्वेदूषकस्य चत्वारिधृष्टस्य द्वेसुप्तघातस्य १०

शक्तः शासिताशास्ता शिक्करव्यवसायवान्॥ चकितः शंकितोभीतः प्रतियत्नःप्रयत्नवान्॥११॥ आधार्मिकोधार्मिकःस्यात्सम्मृतांतरितौसमौ॥ कृपणोहृदमुष्टिःस्याद्देवयुर्धार्मिकःसकृत्॥१२॥ मनआपोमनोज्ञःस्यात्चक्षुष्यःप्रियदर्शनः॥ लखंडुंभद्रकंस्युरवंलडहंचारुबंधुरः१३ भट्टारोभगवान्पूज्यःशक्तप्रतिबलौसमौ॥ पट्टःपाटविकोधूर्तःस्थगस्तीक्ष्णास्तुराजघः॥१४॥ संबंधीगुणवान्संयुङ्मित्रयुर्मित्रवत्सलः॥ धर्मार्थकाममोक्षेषुलोकतत्वार्थयोरपि॥१५॥ षट्सुप्रज्ञास्तियस्योच्चैःषट्प्रज्ञइतिसःस्मृतः॥ मध्यस्थस्तुनिसृष्टःस्याद्भ्रष्टस्तुसंसुखः॥१६॥ स्यात्कथंकथिकःप्रष्टाविचक्षुर्विमनाःस्मृतः॥ प्रतारितोव्यंसितःस्यात्प्रोथस्तुप्रथितोमतः॥१७॥ माशब्दिकःप्रतिषेद्धाजडमात्रमुखौसमौ॥ प्रीणंपुराणंभिन्नंतुव्यवच्छिन्नंविशेषितं॥ विनाकृतंविरहितंत्यक्तेनिर्व्यूढंउच्यते॥ तिक्तःकषायःसुरभिःकेकरवटोनिर्वहोहृदः॥१९ निःसंधिस्त्वनिवातश्चसमूढंशोधितंसमे॥ स्यादागंतुकमाहार्यंसमेपंक्तिमपाक्रिमे॥२०॥ कोमलंपेलवंपापेत्वधमापसदध्रुवाः॥ रोमांचितोहृष्टरोमाअजानेयास्तुनिर्भयाः॥२१॥ अन्यासाधा

त्रीणिशासितुः द्वेअव्यवसायिनः त्रीणिभीतस्य द्वेप्रयत्नवतः ११ द्वेअधार्मिकस्य द्वेअंतरितस्य द्वेकृपणस्य त्रीणिधार्मिकस्य १२ नवप्रियदर्शनस्य १३ द्वेभट्टारस्य द्वेप्रतिबलस्य चत्वारिधूर्तस्य द्वेतीक्ष्णस्य १४ त्रीणिसंबंधिनः द्वेमित्रवत्सलस्य धर्मादिषुप्रज्ञावतः १५ द्वेमध्यस्थस्य द्वेसंसुखस्य १६ द्वेप्रष्टुः द्वेविमनसः द्वेप्रतारितस्य द्वेप्रथितस्य १७ द्वेप्रतिषेद्धुः द्वेजडस्य द्वेपुराणस्य पंचविरहितस्य १८ द्वेअक्तस्य त्रीणिसुगंधेः पंचहृदस्य १९ द्वेशोधितस्य द्वेआगंतुकस्य द्वेपक्तिमस्य २० द्वेकोमलस्य चत्वारिपापिष्ठस्य द्वेरोमांचितस्य त्रीणिनिर्भयस्य २१

रणंतावैशिकंप्रातिष्ठिनंचनतत्॥ भिन्नकःक्षपणोद्गीकोबौद्धोवैना
थिकःस्मृतः २२॥ और्ध्वश्रोतसिकःशैवःकौलआन्वयिकस्मृतः॥पां
चार्थिकःपाशुपतश्चिद्रूपःस्फूर्तिमान्मतः॥ २३॥ प्रज्ञाउद्घाटि
तज्ञास्यांछंयुशंबशुभंयवः॥ गौरवितास्त्वार्यमिश्राश्लाघ्यास्त
त्रभवन्मुखाः॥२४॥स्याद्देवानांप्रियःक्षेपेहतकोबंधु दग्धवत्॥अ
णुःकनीयानल्पिष्ठःपिंडितंगुणितंहितम्॥ २५॥ खट्वारूढोऽवि
नीतःस्यान्मरालमसृणेसमे॥प्रांजलःप्रगुणोजिह्मःप्राणाय्यःसा
ध्वनिंदितः॥२६॥ खलाङ्गिन्नंचान्यतरदपष्ठुलमपष्ठुच॥ करंवि
तंचखचितंरुषितंगुरुगुंडितं॥ २७॥ सपात्रसमितोऽन्यत्रभोज
नान्मिलितोनयः॥ ॥ इतिविशेष्यनिघ्नवर्गः॥ ॥

विधिर्विधानंकर्मास्त्रीक्रियाकृत्याविधाकृतिः॥ व्याप्यंतुसाध
नंकर्मयुताजय्येतुसंगतंम्॥२८॥ अंगारितंपलाशानांकलिको
द्गमनेस्मृतं॥जलयंत्रगृहंधीरैःसमुद्गगृहमुच्यते॥२९॥ जलहंतु
विदुःस्वल्पेसमालीकुसुमाकरे॥ स्तनाभोगस्तनभरःपरभागस्तु
संपदि॥३०॥ आलिंगनंत्वंगपालिःश्लिषारवद्विस्त्वसद्ग्रहः॥
स्यादंधोनेद्वकंसाग्धिःसहभोजनमित्यपि॥३१॥ धार्मिकाणां

त्रीणिसाधारणस्य पंचबौद्धस्य २२ द्वेशैवस्य द्वेकौलस्य चत्वारिपाशु
पतस्य २३ द्वेप्रज्ञायाः त्रीणिशुभयोः द्वेगौरवितस्य श्लाघ्यस्यैकं २४
क्षेपोक्तेरेकं द्वेबंधुदग्धस्य त्रीण्यणोः त्रीणिगुणितस्य २५ द्वेअविनीत-
स्य द्वेमसृणस्य त्रीणिजिह्मस्य त्रीणिसाधोः २६ चत्वारिभिन्नस्य द्वेअ
पष्ठुलस्य चत्वारिखचितस्य २७ पात्रसमितस्यैकं षट्कर्मणः द्वेसाधन
स्य संगतस्यैकं २८ पलाशकलिकोद्गमस्यैकं द्वेजलयंत्रगृहस्य २९ स्वल्प
जलयंत्रस्यैकं द्वेकुसुमाकरस्य द्वेस्तनभरस्य द्वेसुसंपदः ३० त्रीण्यालिंग
नस्य द्वेअसद्ग्रहस्य द्वेअंधसः द्वेसहभोजनस्य ३१

बुद्धद्रव्यंस्तोपिकंस्यात्सत्वंद्रव्यंनवस्तुच ॥ लेशस्तूपपदेगंधो
नुबंधेषत्करावपि ॥ ३५ ॥ छेदःखंडोस्त्रियांगालिःशपनंशमनं-
शमः ॥ वप्रस्तुधूलिकेदारःप्सावीतिर्भक्षणं चसा ॥ ३६ ॥ मैत्रे
यिकामित्रयुद्धंपर्यंकस्त्ववसक्थिका ॥ अथहेतुरुपादानंप्रत्ययाः
सहकारिणः ॥ ३७ ॥ अनुमात्वनुमानंस्याद्व्याप्यंलिंगंचसाधनं ॥
प्रत्यक्षोपाक्षमध्यक्षंधन्धंधांध्यमपाटवं ॥ ३८ ॥ बोधोबोधिः
समंतात्तुज्ञानंस्यात्समुदागमः ॥ ऋषिःशास्त्रकृदाचार्यःशास्त्रं
तुस्मृतिरागमः ॥ ३९ ॥ सांख्यंसमीक्षंस्याद्दिव्यदोहदंतूपयाचि
तं ॥ ४० ॥ करिणोरूपमिच्छंतिकर्णास्फालेझलज्झलां ॥ ४० ॥ रा
मेणरावणवधोरामायणमथोच्चयः ॥ वस्त्रग्रंथिश्चनीवीस्यान्म
णितंरतकूजितं ॥ ४१ ॥ श्वभ्रोवपातोहल्लेखस्तर्कःश्चीर्णंतुशी
लितं ॥ एकीयाएकपक्षाःस्युःसहायाःसहभाविनः ॥ ४२ ॥ कुली

धार्मिकसहभोजनस्यैकं क्रीडाक्रीडकसेवासेवकानामेकं ३२ द्वेदानस्य
त्रीण्यसमंजसः कलंजस्यैकं ३३ द्वेवक्रभणितस्य द्वेलेपनस्य द्वेबाधोप
नासस्य ३४ द्वेबुद्धद्रव्यस्य त्रीणिद्रव्यस्य पंचलेशस्य ३५ द्वेखंडस्य
द्वेगालेः द्वेशमनस्य द्वेक्षेत्रस्य त्रीणिभक्षणस्य ३६ द्वेमित्रसुद्धस्य द्वेप
र्यंकस्य द्वेहेतोः द्वेसहकारिणां ३७ द्वेअनुमानस्य त्रीणिव्याप्यस्य त्री
णिप्रत्यक्षस्य त्रीणिधंधायाः ३८ द्वेबोधस्य समंताज्ज्ञानस्यैकं त्रीणिऋ
षेः त्रीणिशास्त्रस्य ३९ द्वेसांख्यस्य द्वेउपयाचितस्य गजकर्णास्फालस्यैकं
४० रामायणस्यैकं त्रीणिनिव्याः द्वेरतकूजितस्य ४१ द्वेगर्त्तस्य द्वेतर्कस्य
द्वेशीलितस्य चत्वारिसहायानां ४२

शल्यैगविर्जीनपदाराष्टूनिवासिनः॥ प्रत्यक्षीव्यक्तदृष्टोर्थश्चाथक तेननतर्कुटे॥ ४३॥ चिरकालंदीर्घरात्रेमामिक्षामस्तुवाजिनं॥ तदात्वंप्रमुरवंराजमल्लुउल्सिक्तउद्धतः॥ ४४॥ द्वैधंविवादेआरंभआदराडंबरार्थकः॥ रभसोगमकारित्वेकौमुदीकार्तिकोत्सवे॥ ४५॥ आवेशाटोपसंरंभाः प्रियावाक्चटुचाटुनी॥ प्रतिरूपंप्रतिच्छंदेसंवेशनरतिक्रिये॥ ४६॥ अभ्यासःखुरलीयोग्यानिर्वर्णनेनिभालने॥ शालिनीकरणंन्यग्भावनगंधनसूचने॥ ४७॥ भावःपदार्थोधर्मःस्यात्सत्वंतत्वंचवस्तुच॥ संदर्भस्तुप्रबंधःस्योद्ग्रंथोद्वात्रिंशदक्षरी॥ ४८॥ सर्गबंधोमहाकाव्यंमहारूपकनाटके॥ अथवाङ्मयभेदाःस्युश्चंपूःखंडकथाकथा॥ ४९॥ आख्यायिकापरिकथाकलापकविशेषकौ॥ संदानमनिरुद्धंचप्रकीर्णगुत्सकादिच॥ ५०॥ सर्गोवर्गपरिच्छेदोद्धाताध्यायांकसंग्रहाः॥ उच्छ्वासःपरिवर्तश्चपटलःकांडमस्त्रियां॥ ५१॥ स्थानंप्रकरणंपर्वाह्निकंचग्रंथसंधयः॥ ५२॥ प्रज्ञप्तिःपरिभाषाशैलीसंकेतसमयकाराश्च॥ प्रतिवाणिप्रतिवचनंसमुदाचारास्त्वभिप्रायाः॥ ५३॥ अप्रतिरूपकथास्यात्संगणिकोच्छोरणंपरित्यागः॥ स्यादुद्धर्धनमंतर्हासस्त्रिषुपिंडमाहारः॥ ५४॥ अवसर्गःप्राकाम्यंस्वाच्छंद्यानुमननमित्यपिच॥ आक-

---

द्वेकर्कटशिशोः द्वेराष्ट्रनिवासिनां द्वेसाक्षिणः द्वेतर्कुटस्य ४३ द्वेचिरकालस्य त्रीण्यामिक्षायाः द्वेतदात्वस्य त्रीण्युद्धतस्य ४४ द्वेविवादस्य त्रीण्यारंभस्य द्वेरभसस्य द्वेकार्तिकोत्सवस्य ४५ त्रीणिसंरंभस्य द्वेप्रियवाचः द्वेप्रतिच्छंदस्य द्वेरतिक्रियायाः ४६ त्रीणिशास्त्राभ्यासस्य द्वेदर्शनस्य द्वेन्यग्भावनस्य द्वेसूचनस्य ४७ षट्वस्तुनः द्वेसंदर्भस्य द्वेग्रंथस्य ४८ द्वेमहाकाव्यस्य द्वेनाटकस्य पंचवाङ्मयभेदानामेकैकं ४९ द्वेतिलकस्य द्वेदाम्नः द्वेचामरस्य ५० नवकथापरिच्छेदानामेकैकं षट्ग्रंथसंधीनामेकैकं ५१ ५२ पंचसंकेतस्य द्वेप्रतिवचनस्य द्वेअभिप्रायस्य ५३ अप्रतिरूपकथायाएकं द्वेपरित्यागस्य द्वेअंतर्हासस्य द्वेआहारस्य ५४ त्रीणिप्राकाम्यस्य

दारभः प्रस्तावना सद्यः सुखमापत्स्यथ ॥ ५७॥ ॥ इतिसकी
र्णवर्गः ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

अथ नानार्थः

स्वरकाद्यादिकाद्यंतक्रमान्नानार्थसंग्रहं ॥ विहायामरकोशोक्त
मकार्षीत्पुरुषोत्तमः ॥ ५८॥ शक्रार्कपर्णयोश्चार्कौ ॥ भीकस्त्वभ
यकामिनोः ॥ रूपकांतिकयोश्चांको ॥ लिमकौ भेककोकिलौ ॥ ५९
॥ अतिकं निकटं चुल्लिर्नाड्योत्कौ चाग्रजांतिका ॥ अनीकोस्त्री
रणे सैन्ये गौर्यां मातरि चांबिका ॥ ६०॥ स्यादश्मंतकमुद्धाने मल्लि-
काछदनेपि च ॥ आन्हिकं दिननिर्वर्त्ये तत्क्लीबं नित्यकर्मणि ॥ ६१
स्यादाछुरिनकं हासविशेषे च नखक्षते ॥ उदर्कं एष्यत्कालीयफ
ले मदनकंटके ॥ ६२॥ स्त्रियामुत्कलिका हेलोत्कंठासलिलवीचि-
षु ॥ कोशांगे कौशिका विश्वामित्रे गौर्यां च कौशिकी ॥ ६३॥ कृष्ण
त्वे च हिमान्यां च गौरीकाल्योश्च कालिका ॥ वर्षोपले स्त्री करका क
रंके करको स्त्रियां ॥ ६४॥ कुसुंभे दाडिमे पक्षिभेदे च करकः पुमा-
न् ॥ करमध्यांगुलौ च स्यात्कर्णिकाथ द्रुमांतरे ॥ ६५॥ द्विके धृष्टे च
काकः स्यात्कौतुकं मंगले छयोः ॥ भोग्येप्यथ स्यात्कुलकं श्लोकैका
र्थपटोलयोः ॥ ६६॥ कुलकोनाकका केंदूक आत्मा च स्फरकं च कं ॥ पे च
कस्त्रीजितौ काकरुकौ कौलेयकः शुनि ॥ ६७॥ कुलीने चाथ कन
कं धुस्तूरे नागकेसरे ॥ चंपके किंशुके हेम्नि कृषकौ फालकर्षकौ ॥ ६८
॥ रोमांचे क्षुद्रशत्रौ च द्रुमांगे कंटको स्त्रियां ॥ राजधान्यां नितंबे द्वे वल
ये कटको स्त्रियां ॥ ६९॥ वेणो ना कार्मुकं चापे गुणवृक्षेपि कूपकः

त्रीणि चिंताकर्मणः त्रीणि आक्षेपस्य ५५ द्वे साध्यायस्य द्वे हर्षस्वनस्य द्वे निःस्पंदन
स्य ५६ त्रीण्यवसानस्य द्वे चक्रस्य त्रीणि प्रस्तावनायाः

कल्को विभीतके तैलादिशेषेचाथ कंचुकः ॥ ७० ॥ निर्मोके चोलके वारबाणेऽथ कुशिको मुनौ ॥ शाले किष्कुः प्रकोष्ठेपि व्याख्या श्लोकेपि कारिका ॥ ७१ ॥ खगेयमेछद्मविप्रे कंकः सूच्यां च कुर्चिका ॥ क्रमुको भद्रमुस्तेपि कोकश्चक्रे वृके पि च ॥ ७२ ॥ पुनर्नवां कारवेल्लपर्णाशेषु कठिल्लकः ॥ कृकवाकुर्मयूरेपि वंशे दैत्ये च कीचकः ॥ नीचेपि क्षुल्लको मूर्द्धघ्राणेनाकोच खोलकः ॥ चौरो दुरूच खनको गोलको मणिजारजौ ॥ ७४ ॥ खगे लग्ने च गोरंकुः संख्याभेदेपि गंडकः ॥ शृंग्यां च ग्राम युद्धे च ग्रामम हुरिका स्त्रियां ॥ ७५ ॥ गांधिको लेखके पिस्यात्क्षुद्धक श्छेकनिघ्नयोः ॥ वेश्या यूथ्यो श्च गणिका चषकं सरकेपि च ॥ ७६ ॥ ग्रंथिको पार्थ दैवज्ञो ग्रंथिपर्णे च नहूयोः ॥ कंठालंकार खद्योत विस्फुल्लिंग चिलिमीलिका ॥ ७७ ॥ चारको भोजके बंधे नाटकांगेपि चूलिका ॥ चित्रकं चित्रके क्ली बं व्याघ्रे रंडो च चित्रकौ ॥ ७८ ॥ गृहासक्ते पक्षिमृगे छेको नागरिके त्रिषु ॥ कंबो जलकरंकः स्यान्नारिकेलफलेपि च ॥ ७९ ॥ जैवातृकः कृशे चंद्रे दीर्घायुषि च स त्रिषु ॥ जालिका वस्त्र भित्कूटक्लैव तैौ च जालिको ॥ ८० ॥ जंघायामग्निभित्तौ च खनित्रे ग्रावदारणे कपित्थे चास्त्रियां टंकष्टुंटुका वल्पशोणकौ ॥ ८१ ॥ तिलकं चित्रके क्लोम्नि नातरौ तिलकालके ॥ गृहदारौ तंडको स्त्रीसमासप्रायवाचि च ॥ ८२ ॥ तुरुष्कः सिल्हके देशे प्राण्यंगे त्रितये त्रिकं ॥ कूपांगे स्त्री तिक्तशाकः खदिरे वरुणद्रुमे ॥ ८३ ॥ दैत्ये नाकर्णधारे च तारकं दृशि भे न ना ॥ ढिंको काकचक्रवाको पृश्न्यां कुंदे दलाढकः ॥ ८४ ॥ नरको निरये दैत्ये नौवाहे स्यान्नियामकः ॥ सभ्ये गुरौ च नवफलिका नवरजस्यपि ॥ ८५ ॥ नालीको पद्मनाराचो द्वंद्वेपि पेटको स्त्रियां ॥ सौभाग्येपि पताका स्यात्संकोस्त्री कर्दमांहसोः ॥ ८६ ॥ पंचालिका वस्त्रकृतपुत्रिकागीतभेदयोः ॥ मणिदोषे शिलाभेदे पुलको लोमहर्षणे ॥ ८७ ॥ पर्यस्त्यामपि प

ल्यंकः प्रियकोमृगनीपयोः॥ पुष्पकंकंकणेपिस्यात्पराकोव्रतरव
ड्गयोः॥ ८८॥ चामरेग्रंथभेदेचविस्तारेपिप्रकीर्णकं॥ सितछत्राब्जयोः
पुंडरीकंपुंसितुदिग्गजे॥ ८९॥ व्याघ्रेचकोशकारेच पाकोपचनशाव
के॥ पुष्कलकोगंधमृगेकीलकेक्षपणेपिच॥ ९०॥ कपर्दरज्जुश-
जीवबीजकोशेवराटकः वृंदारकोसुरश्रेष्ठौगिरिमेघौबलाहकौ
॥९१॥ पिंजेनासिकताकर्णभूषाकन्याच बालिका॥ शिवमल्यांब
कः कल्हेराज्ञि भट्टारकः सुरे॥ ९२॥ भूमिकारचनायांचमूर्त्यंतरप
रिग्रहे॥मधुकावल्लिभेदेच बर्हिचंद्रेचमेचकः॥ ९३॥ हारभेदेमा
णवकोबालेकुपुरुषेवटौ॥ मयूरकोऽपामार्गेचहंसभेदेपिमल्लि
कः॥ ९४॥ यूतकंवस्त्रभेदेचयौतुकेसंशयेपिच॥ यमकंसंयमे
शब्दालंकारेयमजेत्रिषु॥ ९५॥ याज्ञिकोयाजकेदर्भे बिलेरोकंरु
चौपुमान्॥ राकादृष्टरजःकन्याकछपूर्णेंदुपूर्णिमा॥ ९६॥ नीलव
स्त्रेऽक्षितारायां लोचकोनिर्मितौत्रिषु॥ नगरीशाखयोर्लंकाक
रिण्यामपिबंधकी॥ ९७॥ गुरावनाथेगरुडेजिनेविघ्नेविनायकः॥
वृषांकोशिवभल्लातौ वंचकोधूर्तफेरवौ॥ ९८॥ वैदहकोवाणिजके
वैश्यायामपिशूद्रजे॥ वैलक्ष्याकार्ययोः क्लीबं व्यलीकंत्रिषुनागरे॥
९९॥ बाल्हीकंबाल्हिकंधीरहिंगुनोर्नाश्वदेशयोः॥ विपाकःपरि
णामेपिनिलकोपिविशेषकः॥ १००॥ शंकुःकीलकसंख्यास्त्रज
लजंतुषुदृश्यते॥ शिशुकःशिशुमारेपि शुकंग्रंथिशिरीषयोः॥
॥१०१॥ क्लीबेरावणपात्रेनावचापिशातपर्विका शल्कश्चूर्णे-
पिशूकस्तुस्यादनुक्रोशशुंगयोः॥ २॥ शिलाटकोबिलेपट्टे शुल्कौ
यौतुकेदानयोः॥ श्वाविद्दक्षोच शल्कक्योमणौरक्तेच सस्यकः॥
३॥ शीधौचशीधुपानेच सूरकोस्त्र्यथजन्मनि॥ सूतकंपारदेप्य
स्त्री सूचकोखलकुक्कुरौ॥ ४॥ युग्मेसंघाटिकाकुट्टिन्यांचगधे
पिहारकः॥ वाद्यभेदेहुडुक्कः स्याद्दात्यूहेचमदोत्कटे॥ ५॥ ॥

ङ्गना। वाशिखारथ्या विशाखो मेगुहे पुमान्॥ ८॥ लेखो देवेपि पं
कौस्त्री शिखा चूडाग्रयोरपि॥ शाखा वेदविभागेपि सखाभि
त्रसहाययोः॥ ९॥ स्कमुखस्तार्क्ष्यपुत्रे॥ ॥ इतिखांताः ॥
त्यापवर्गस्त्यागमोक्षयोः॥ शरीरोपायप्रधानेष्वंगं पुंभूम्निनीवृ
ति॥ १०॥ संबोधनेंऽगाव्ययं स्याद्योगो विधुरेपिच॥ शपथे-
प्यभिषंगः स्यादनंगः खेस्मरे पुमान्॥ ११॥ पूर्णलयत्ना वाभो
गा वायोगो व्यापृतावपि॥ जंगमेंगितयो रिंगो नाट्य ईहामृगो
वृके॥ १२॥ फलं पूगस्य चोद्वेग मुत्सर्गो न्यायदानयोः॥ सामा-
न्ये प्युपरागस्तु ग्रस्तार्केन्द्वोश्च दुर्नये॥ १३॥ हस्तच्छेदेतु सस्यानां
कटभंगो नृपात्यये॥ कथाप्रसंगो वातूले विषवेद्योपि वाच्यवत्
॥ १४॥ देशे कलिंगो धूम्याटे कलिंगं कौटजे फले॥ त्रिषु दक्षे विद
ग्धेच खड्गो निस्त्रिंशगंडकौ॥ १५॥ स्वर्गे वज्रेच रश्मौच बलीवर्दे
च गौः पुमान्॥ स्त्री बाणरोहिणी दृग्दिग्वाग्भूमिष्वप्सु भूम्नि च॥
१६॥ वैधव्ये नृपनाशेच छत्रभंगः प्रकीर्तितः॥ अश्वगंधापि तुरगी
तुंगो पुन्नागसौच्छ्रये॥ १७॥ दीर्घाध्वगः स्यादुष्ट्रेपि निषंगः संग
तूणयोः॥ नागः श्रेष्ठेभसर्पेषु क्लीबं सीसकरंगयोः॥ १८॥ वृक्षे स्या
त्पुंसि पुन्नागः पतंगः शलभेरवौ॥ काकोदुंबरिकायां स्त्री फ
ल्गु स्त्रिषु निरर्थके॥ १९॥ पालनेप्यवहारेच निर्वेशे पण्ययोषितां
भोगः सुखे धने चाहेः शरीरफणयोरपि॥ २०॥ भगं वैराग्ययोनी
च्छाज्ञानैश्वर्येषु चेष्यते॥ तरंगभेदयो भंगो भंगा सस्येशणा
न्ये॥ २१॥ एकदेशांशयोर्भागो भृंगो धूम्याटकेपि च॥ स्रजं

दिषु॥ चक्रे रथांग कोकेना रक्तांगो मंगलेपि च॥२५॥ व्यक्ते सांख्यो
दिते लिंगं स्थाणौ शेफसि लक्षणे॥ पुंस्त्वादौ च वरांगं तु गुडत्वचि ग
जे पुमान्॥२६॥ वल्गुश्छागेपि वेगस्तु महाकालफलेपि च॥ जलो
क्षेपे समुत्सर्गे शृंगमुत्कर्षचिन्हयोः॥२७॥ शार्ङ्गं धनुर्विष्णुधनुः सं
भोगो रतभोगयोः॥ इतिगांताः॥ ओघः स्यात्
द्रुतनृत्ये च काचिघो कांचनोंदुरः॥२८॥ निदाघो स्वेदतापे च प्र
तिघो रोषघातयोः॥ परिघो योगभेदेपि मेघो वारिदमुस्तयोः॥२९
महार्घस्तु महामूल्ये पुंसि लावकपक्षिणि॥ पृक्कायां स्त्री लघुः क्ली
बं शीघ्रे कृष्णागुरुण्यपि॥३०॥ ॥इतिघांताः॥ ॥प्रतिमा
पूजयो रर्चा क्रौंचः पक्ष्यद्रिभेदयोः॥ कूर्चमस्त्री भ्रुवोर्मध्ये श्मश्रु
कैतवयोरपि॥ ३१॥ इष्यां स्त्री गुरुपुत्रेनाकेशे शुष्कव्रणे कचः॥ देश
भेदेपि कांची स्यादथ स्थासकतर्कयोः॥ ३२॥ चर्चिकायां च चर्चा
स्यात् त्वक् स्त्री चर्मगुडत्वचोः॥ वामने पामरे नीचो नमुचिर्दिति
जे स्मरे॥ ३३॥ मरीचिर्मुनिभेदेपि चौरवन्ही मलिम्लुचौ॥ कक्कोले
पि च मारीचो मोचा शाल्मलिरंभयोः॥ ३४॥ कुक्कुरे रतनाराचः शी-
त्कारे वरयोषितां॥ केतुग्रहे तु विकचो वीचिः स्फुरवतरंगयोः॥ ३५॥
स्वल्पेपि सारिकायां च वचा ग्रीष्मानलौ शुची॥ सूची नृत्यप्रभेदे
च व्यधनी शिखयोरपि॥ ३६॥ ॥इतिचांताः॥ ॥
वाराही चीरिका कच्छा कच्छोऽनूपे द्रुमांतरे॥ पिच्छा स्त्री भक्तमंडे
पि लांगूले पिच्छमस्त्रियां॥ ३७॥ ॥इतिछांताः॥ ॥
पद्मधन्वंतरी चाब्जा वंडजः खगमीनयोः॥ निचुलेप्यंबुजोऽज

स्तु ब्रह्मविष्णुस्मरेष्वपि ॥ ३८ ॥ स्यादंगजः स्मरेकेशे पुत्रेरक्तेनपुं
सकं ॥ उत्साहकार्तिका वूर्जौ कंबोजो देश शंखयोः ॥ ३९ ॥ नखेक
रंजे करजः कुब्जो न्युब्जो द्रुमांतरे ॥ खनौ सुरागृहे गंजा गुंजे पट
हकृष्णले ॥ ४० ॥ जघन्यजो ऽनुजे शूद्रे जलजं शंखपद्मयोः ॥ चि
न्हशोफः पताकासु खड्गांगेपि ध्वजोस्त्रियां ॥ ४१ ॥ नीरजं कमलेकु
ष्ठे पिंजा हिंसा हरिद्रयोः ॥ भरद्वाजो गुरोः पुत्रे व्याघ्राटाख्येच्चप-
क्षिणि ॥ ४२ ॥ बुधैः ख्यातो भारद्वाजो द्रोणाचार्येमुनावपि ॥ भृंग
राजः खगौषध्यो लंघने मुनिभेषजं ॥ ४३ ॥ अगस्त्येच्च हरीतक्यां
रुजा स्याद्रोगभंगयोः ॥ गुल्मेपि वनजो बीजं रेतस्तत्वार्थहेतुषु
॥ ४४ ॥ व्याजः शाठ्यपदेशेच्च स्वेदरक्तात्मजाः स्वजाः ॥ निसर्गे
सहजः पुंसि सहोत्थे वाच्यलिंगकः ॥ ४५ ॥ सन्नद्ध संभृतौ सज्जो
हिमजा पार्वती शची ॥ ॥ इति जांताः ॥ ॥ अज्ञ-
स्त्रिषु जडे मूर्खे कृतज्ञः कुक्कुरेपिच्च ॥ ४६ ॥ संज्ञा सूर्यप्रियायांच्च
सर्वज्ञः शंकरे जिने ॥ ॥ इति ज्ञांताः ॥ ॥ अरिष्टं सू
तिकागारे तक्रेपिच्च पुमांस्त्वयं ॥ ४७ ॥ काके निंबेच्च लशुने गर्ते कूपे ख
ले ऽवटः ॥ अत्यर्थे क्षौमयो रट्टः कृता विष्टं प्रियेत्रिषु ॥ ४८ ॥ के-
शटः शोणके विष्णौ कपीट मुदरे जले ॥ पुंश्चले कुंड कीटः स्याज्जा
राच्च ब्राह्मणी सुते ॥ ४९ ॥ सपथेच्च क्रियाकारे किलिंज शरयोः कटः
॥ कोटिः संख्यापि करटो वाद्यभांड कुविप्रयोः ॥ ५० ॥ कुलीरे क
र्कटो राशौ कृष्टिः कर्षे बुधे पुमान् ॥ अप्रिये ऽपि कटुः कुंभे कुटो
नाम वने द्वयोः ॥ ५१ ॥ सुरायां स्त्री कीकट स्तु निःस्वे देशे मितंप
चे ॥ खेटः सिंघाणके हीने गृष्टिर्धेन्वोषधीभिदोः ॥ ५२ ॥ सूक
रे पुंसि घृष्टिः स्यात्स्पर्द्धा घर्षणयोस्त्रियां ॥ घोंटा तु बदरे पूगे देहां
शे वर्णने च्चटुः ॥ ५३ ॥ निःश्वासो दशनोच्छिष्ट श्चुंबे दंतच्छिदेपिच्च ॥
परिमाणमुदो दिष्टि दिष्टः कालोपदिष्टयोः ॥ ५४ ॥ धाराटौ चातक

हयो कपाटेपिच निष्कुटः॥ कोटरेप्यथ पट्टः स्यान्फलकेनृपशा-
सने॥ ५५॥ प्रत्याख्यातेप्रेषितेच प्रतिशिष्टंत्रिलिंगकं॥ पर्कटी
प्लक्षवृक्षेच पूगादेश्च नवेफले॥५६॥ वटी त्रिषुगुणेपुंसिन्यग्रोधेच क
पर्दके॥ वर्वटयौ व्रीहिभिद्वेश्यौ नटौ भरतकामुकौ॥५७॥ मोरटं
गोर्नवक्षीरे ऽ कोटपुष्पेक्षुमूलयोः॥ मिष्टं म्लानेकुवचने मर्कटी
शूकशिंब्यपि॥५८॥ लाटौ शुकेचदेशेच व्युष्टं कल्येविभूषिते॥
पथिवास्तुनि वाटः स्याद्विकटं विकृतंबृहत्॥५९॥ वर्करांटः क
टाक्षेच स्त्रीणांस्तननखक्षते॥ भद्रप्रेरवणयोर्विष्टि वर्णाटौ का
मिगायनौ॥६०॥ विटोऽद्रौलवणेषिङ्गमूषिकेखदिरेपिच॥ पांच
लोहे श्रुतिकटः प्रायश्चित्तभुजंगयोः॥६१॥ स्फुटिः स्फोटेच कर्क
ट्यां हृष्टः प्रतिहतेपिच॥ ॥इति टांताः॥ ॥वेश्या-
द्विजन्मजे वष्ठः पाठायूथिकयोः स्त्रियां॥६२॥ काष्ठा कालेपि को
ष्ठस्तु स्वकीयेप्यथसध्वनौ॥ ग्रीवादेशेपि कंठः स्यात्कुष्ठं रोगौष-
धीभिदोः॥६३॥ दात्यूहे कालकंठः स्याच्छिवखंजनयोरपि॥ ज्येष्ठो-
मासिचवृद्धेच ज्येष्ठा च गृहगोधिका॥६४॥ अम्ललोण्यां दंतशा
ठानाजंबीरकपित्थयोः॥ प्रकोष्ठो बाहुगेहांसौ वरिष्ठं मरिचेपिच
॥६५॥ ताम्रेचारुतरेचाथ मध्यस्थखलयोः शठः॥ शोठोऽलसेच
मूर्खेच सूत्रकंठो द्विजन्मनि॥६६॥ कपोतविहगेपिस्यात्पृश्न्यांचप्र
सभे हठः॥ ॥इति ठांताः॥ ॥प्राण्यंगकोशयोरं
डं कूष्मांडो फलभिद्गणौ॥६७॥ कुंडं खातोखयोर्जारजे नाकुं
डी कमंडलौ॥ सिंहोक्तौ स्त्रीविषे क्ष्वेडः पशौ क्रोडो ननोरसि॥६८
खंडोऽस्त्री शकलेनेक्षुविकारमणिदोषयोः॥ गंडः कपोलेपिट
केश्रेष्ठ गंडकयोः पुमान्॥६९॥ चंडौषधिः खरश्चंडो दंडौसै
न्यार्कपार्श्वगौ॥ व्यथा कृपा च पीडे द्वे पांडुः कुंतीपतौसिते॥७०
॥ पिंडः सांद्रगृहांशेंगे पंडः षंडेपतौस्त्रियां॥ स्तंबे शस्ते प्रकां

डो स्त्री बरंडो वदनामये॥ ७१॥ समूहे चांतरावेद्यां मंडः स्यात्सारपिच्छयोः॥ एरंडे मस्तुनि क्लीबे मार्तंडो खगदंष्ट्रिणोः॥ ७२॥ राहोर्देत्यांतरे मुंडो मुंडिस्त्री मुंडिते त्रिषु॥ रंडा स्याद्विधवौषध्यो र्वितंडा शाकभिद्यपि॥ ७३॥ शिखंडो तु शिखाबर्होः शुंडा करिकरः स्नुरा॥ ॥ इति डांताः॥ ॥ आषाढो व्रतिनां दंडे मासे मलयपर्वते॥ ७४॥ विचेष्टबालिशौ मूढो राढा स्याद्दीप्तिदेशयोः॥ पंड कंचुकिनो षंढो समूढः पुंजिते नवे॥ ७५॥ भुग्नेऽत्युपप्लुते प्येष वाच्यलिंगे तु दीर्यते॥ ॥ इति ढांताः॥ ॥ अरुणो भास्करेऽनूरो मंजिष्ठाऽतिविषाऽरुणा॥ ७६॥ त्रिष्वारक्ते व्याकुलेऽथ सूक्ष्मे ब्रीह्यंतरेप्यणुः॥ कीलप्राग्र्याश्रिसीमासु स्याद्दाणि वदणि द्वयोः॥ ७७॥ अभीक्ष्णं तु भृशे नित्ये स्यादिं द्राणी द्रयोषिति॥ स्त्रीबंधे सिंधुवारे च चक्षुर्दर्शनमीक्षणं॥ ७८॥ उन्मूलने प्युद्धरणं मुष्णं दक्षोपि नाऽतपे॥ स्यात्साधने गीतनृत्यभेदे कायस्थकर्मणि॥ ७९॥ करणं पुंसि संकीर्णे कल्याणं कांचने शुभे॥ कृष्णो वर्णे हरौ व्यासे कृष्णां मरिचलोहयोः॥ ८०॥ पिप्पली द्रौपदी कृष्णा हस्तसूत्रेपि कंकणं॥ श्रुतिराधेययोः कर्णः पिप्पल्यां जीरके कणा॥ ८१॥ कोणोऽश्रौ वाद्ये लगुडे वधहेतौ च कारणं॥ ग्रहणं स्वीकृतौ हस्ते गुणः स्याद्रज्जुसूदयोः॥ ८२॥ अंगुष्ठानामिकोन्माने गोकर्णोऽहौ मृगेपि च॥ नासिकाऽघ्रातयो घ्राणं चूर्णं गंधयुतावपि॥ ८३॥ वेदांशे ब्रह्मचारी च ब्रध्ने पादेपि चाऽस्त्रियां॥ चरण श्चीर्णपर्णस्तु खर्जूरेपि चुमंदयोः॥ ८४॥ जेनरींद्रेर्जुने जिष्णु र्झूणिः कठिनपूगयोः॥ तरुणः कुब्जपुष्पेपि त्राणं रक्षितरक्षयोः॥ ८५॥ दुर्वर्णं रजतेपि स्यात् द्रोणोऽलिः कच्छपी द्रुणी॥ द्युमणौ तरणिः पुंसि कुमारीनौकयोः स्त्रियां॥ ८६॥ काष्ठागारेंबुवाहिन्यां शैलसंधौ च योषिति॥ द्रोणी न स्त्री मानभेदे द्रोणः काके कृपीपतौ॥ ८७॥ दक्षिणा दिशि दाने च दक्षिणः सरले

पिच॥ असतीस्याद्धर्षणीच धर्षणानिकृतौरते॥ ८८॥ बुद्धमंत्रे
नाडिकायां धारण्य थचमज्जने॥ निर्वाणंनिर्वृतौमोक्षे प्रघणोऽ
स्त्रगृहांशयोः॥ ८९॥ बोलेवातेवले प्राणः पूर्णेपुंभूम्निचासवः॥
पर्णपक्षेच पत्रेच प्रोक्षणंसेचनेवधे॥ ९०॥ ग्रंथेकार्षापणेचास्त्री
पुराणमनवेत्रिषु पार्ष्णिः पादे व्यूहपृष्ठेवाणी व्यूतिश्च भारती॥९१
मंत्राख्यवेदविप्रौघे क्लीबंना ब्राह्मणोद्विजे॥ लिंगाग्रेऽलिंजरेमौ
क्तिकादौस्त्रीपुंसयोर्मणिः॥ ९२॥ अजागलस्तनेचापि मसृणौ
मृदुककर्कशौ॥ निश्मश्रुपुरुषोढृशौ मत्कुणावथरोहिणी॥ ९३॥ न
क्षत्रेरोहितायांच रणः क्वणनयुद्धयोः॥ लक्ष्मणासारसीदाशर
थिः श्रीमांश्च लक्ष्मणः॥ ९४॥ छागेपिलंबकर्णः स्याद्वेणुर्वंशे
नृपांतरे॥ वाणाझिंटयांशरेबाणे वृष्णिर्यादवमेषयोः॥ ९५॥ क-
र्णेश्रुतौच श्रवणं शरणं मारणेपिच॥ श्रेणिः पंक्तौसेकपात्रेन क्लीबं
कारुसंहतौ॥ ९६॥ कषेमाषचतुष्केच शाणः शोणोनदेऽरुणे॥ पक्वे
श्राणंयवाग्वांस्त्री श्रीपर्णगणिकारिका॥ ९७॥ पद्मंच श्रमणा-
भिक्षुक्यांमुंडीर्यांचदृश्यते॥ सुवर्णमानभेदेपि स्थूणाभूर्मीच
दारुच॥ ९८॥ स्थाणुःशंकुशिवौ विष्णौ सुषेणः करमर्दके॥ कीपर्वे
धेचाथस्हृतौहरणंयौतकेपिच॥ ९९॥ ॥इतिणांताः॥ ॥
मोक्षः स्वधायज्ञशेषोऽयाचितंवारिचामृतं॥ अमृतातुगुडूच्यां-
स्याद्धरीतक्यामलक्यपि॥ २००॥ शेषेविष्णावनंतोनागुडूचीदूर्व-
योःस्त्रियां॥ क्लीबंखेत्रिष्वनवधावसंतंमरणेऽशुभे॥ १॥ चुल्यांच
पूर्णिमाभेदेऽनुमतिः संमतावपि॥ स्वरूपेंतंविनाशेनानस्त्रीशेषेऽ
न्तिकेत्रिषु॥ २॥ गतेज्ञातेप्यवसित मर्वंतावश्वकुत्सितौ॥ अर्वती
कुंभदास्यांचाथार्दितं प्रार्थितेहते॥ ३॥ क्षिप्ताद्रिभेदयोरस्तः स्या
ल्लाजेष्वपिचाक्षतं॥ कृषावसत्येप्यनृत माकृतिर्जातिरूपयोः॥ ४
आप्तोलब्धहितौदैर्घ्येभाविकालेपिचायतिः॥ आचितः शाकटोन्मे

क्कमासोपबन्धुस्तातपुमाहतः॥ ८॥ उदास्थितस्त्वरद्वास्थस्यात्
तिः स्मृतिरक्षयोः॥ ऋतमुंछशिलेसत्ये एतावागतकर्बुरौ॥ ९॥ ऐ
रावतोनागरंगेप्यथकांतिर्द्युतीछयोः॥ किरातौ म्लेंछभूनिंबौ कांत
स्तप्रियरम्ययोः॥ १०॥ केतुर्ग्रहोत्पातचिन्हे कलितं विदितात्मयोः॥ क
पोतः पक्षिमात्रेपि गुप्तं रक्षितगूढयोः॥ ११॥ गतिर्यात्राद्दशोपायाश्शं
दः सूर्यश्च गोपतिः॥ गृहीसत्री गृहपति गीतं शब्दितगानयोः॥ १२॥
गर्जितं स्तनितेनेभे ग्रस्तं वाग्भेदभुक्तयोः॥ चर्मण्वत्यौनदीरंभे जा
तं व्यक्तौघजन्मसु॥ १३॥ सूर्यावर्तोपि जामाता नावातोपिष्टपे जगत्
॥ जातिश्छंदसिमालत्यां चुल्यां जातीफले कुले॥ १४॥ व्याप्तविस्तृत
वाद्येषु ततं तिक्तं सुगंध्यपि॥ चापे तृणत्वे तृणता तातः पित्रनु
कंपयोः॥ १५॥ दुर्गतिर्नरकेनैःस्व्यदुर्जातं व्यसनेऽपिच॥ दिवाभीत
उलूके स्यात्कुंभिले कुमुदाकरे॥ १६॥ विसृष्टे रक्षिते दत्तं द्रुतं शीघ्र
विलीनयोः॥ दशने शैलशृंगेच दंतः स्यादोषधौस्त्रियां॥ १७॥ दिती
खंडनदैत्यांबे धृतिस्तुष्टौ कृतावपि॥ राशौच धातुर्निर्वाणस्तु स्थित
त्वेच निर्वृतिः॥ १८॥ अस्वाध्याये कुरूपेच प्रयुक्तोस्त्री निराकृतिः॥
जंबां स्त्रीना नदीकांतः सिंधुवारे जलाऽब्धिषु॥ १९॥ निमित्तं हेतुचि
न्हांगंतु देवादेशपर्वसु॥ प्रसृतः कुंजितेपाणौ जंघायां स्त्रीगते त्रिषु॥
२०॥ प्रकृतिर्गुणसाम्ये स्यात्स्वभावामात्ययोरपि॥ प्रतीकारे प्रतिकृ
तिः प्रतिबिंबेऽथपद्धतिः॥ २१॥ पंक्तौमार्गेपि पूतंतुपवित्रे बहुलीकृते
॥ श्रेणिर्दशच पंक्तिः स्यात्प्रसूतिर्जन्मतोकयोः॥ २२॥ प्रतिपत्ति
श्चित्तवृत्तिः प्राप्तिःप्रागल्भ्यगौरवे॥ पारावती गोपगीनिलवल्ली फलयोरपि॥

तः सादरेऽपिच॥ २६॥ पुनः स्वरेचाभियुक्तहेतौच प्रार्थितौ समौ॥
द्विष्टेऽपिच प्रतिहतः पिंडितं गुणितेघने॥ २७॥ प्राप्तेज्ञाते परिगतं
प्रपातो भृगुनिर्झरौ॥ लोकायतेकछपेच पंचगुप्तः स्मृतोबुधैः॥२८
लब्धेसमंजसे प्राप्तं पक्तिर्गौरवपाकयोः॥ पारिजातोदेवतरौ मंदा
रेपारिजातके॥ २९॥ वृत्तिवार्ताप्रवाहेषु प्रवृत्तिरथघोटके॥ पानेच
पीतिः सिक्तेतु प्रोक्षितं निहतेऽपिच॥ ३०॥ रामानुजेनाट्यशास्त्रे दी
प्ततौ भरतोनटे॥ जिनेपूज्येच भगवान् भोगवान्नाट्यनागयोः॥
३१॥ सेवाविभागयोर्भक्तिर्भवान्युष्मत्सदर्थयोः॥ पक्षिण्यांवाग्वि
वृत्तौच भारती भारतं पुनः॥ ३२॥ जंबुद्वीपे व्यासकृतौ भृतिर्भर
णमूल्ययोः॥ कुड्यभेदनयोर्भित्ति र्भास्वंतौ सूर्यभास्वरौ॥ ३३॥
पृथिवीजननीगावो ब्रह्माण्याद्याश्चमातरः॥ मूर्धाभिषिक्तोऽमा
त्येऽपि मुक्तोनिर्दलमोचितौ॥ ३४॥ मूर्तं स्यात्त्रिषु मूर्छाले कठिने मूर्ति
मत्यपि॥ मतिरिच्छाऽप्यथ यतिः पाठछेदे मुनौ पुमान्॥ ३५॥ न्याय
योजनयोर्युक्तिः पाश्यब्धी यादसांपती॥ रेवती हलिपत्न्यांभे स्मर
पत्न्यांच रेवतिः॥ ३६॥ रिक्तं वनेऽपि रीतिस्तु लोहकिट्टारकूटयोः॥ रो-
हितमृजुशक्रास्त्रे रक्तेनामृगमीनयोः॥ ३७॥ शैलभेदे रक्तवर्णालोशांक
रेऽपिच रेवतः॥ स्वर्णाभ्यक्तेऽपि रसितं कस्तूरीपृक्कयोर्लता॥ ३८॥ वर्तु
लाधीतयोर्वृत्तं वार्तं कुशलनीरुजोः॥ वासेऽपि वसतिर्वृक्षमात्रेऽपिच व
नस्पतिः॥ ३९॥ वर्तनेविवृतौ वृत्ति र्वर्तिर्दीपदशास्वपि॥ लाभसंबंध
यो र्व्याप्ति र्विश्वस्ताविधवापिच॥ ४०॥ छेदेविनाशे विच्छित्ति र्वि
गतौ वीतनिष्प्रभौ॥ असाराश्वेभयोर्वीतं वीतमंकुशकर्मणि॥ ४१॥

अभ्युद्यते विकसिते चेष्टिते च विजृंभितं ॥ विकृतो रोगि बीभत्सौ वित्तं ख्याते धनेपि च ॥ ४२ ॥ दृढेपि व्यायतं शुक्ति र्मुक्तास्फोटाश्व लक्ष्मणोः ॥ अस्त्रभेदेपि शक्तिः स्या छांतिः स्यान्मंगले शमे ॥ ४३ ॥ वेतसेपि च शीतो ना शुक्तं पूताम्ल निष्ठुरं ॥ शितिर्भूर्जे ः सिते कृष्णे श्रीमंतो तिलके श्वरो ॥ ४४ ॥ ब्रह्मशक्तौ शतधृती वार्तायां श्रवणे श्रुतिः ॥ दुर्बले निशिते स्यातां शित शाता वयोवचः ॥ ४५ ॥ सरस्वती सरिद्गोश्व सूता बंदिनि पारदे ॥ स्मृतिः स्याद्धर्मशास्त्रेपि प्रवाहेपि च संसृतिः ॥ ४६ ॥ रणे समायां समिति स्तिमितो क्लिन्न निश्चलौ ॥ स्थपतिः कंचुकी कारुभेदे गीष्पति जागकृत् ॥ ४७ ॥ संबंधेपि च संवित्तिर्मर्यादायामपि स्थितिः ॥ सीता लांगलरेखा स्या द्व्योम गंगा च जानकी ॥ ४८ ॥ सूनृतं कुशले सत्ये कृदो हागौश्व सुव्रता ॥ शर्करापि सिता थोर्धसम्प्रतिज्ञेपि च स्थितः ॥ ४९ ॥ सती कात्यायनी साध्व्योः संघातो नरके चये ॥ हरीतकी हैमवती गौरी शूकशुवचावपि ॥ ५० ॥ स्त्री हरिद्विशिवर्णेना दूर्वापि हरिता मता ॥

॥ इति तांताः ॥ आतिथिः कुशपुत्रेपि हरीतक्यपि चाव्यथा ॥ ५१ ॥ अपेक्षाः लंबनं चास्था स्या दर्थो विषयेपि च ॥ भटे पुंस्य प्रतिरथं यात्रामंगलसाम्नि च ॥ ५२ ॥ उन्माथः कूटयंत्रेपि कुथः कंबल बर्हिणोः ॥ काशेकृते च क्षवथु र्ग्रंथो द्वात्रिंशदक्षरी ॥ ५३ ॥ धनं च ग्रंथना चापि तीर्थं लूपाययोगयोः ॥ कट्वंशघोणयोः प्रोथो वीथी पंक्तौ गृहांशके ॥ ५४ ॥ वानप्रस्थो मधूकेपि स्यात्तृतीयेपि चाश्रमे ॥ काकोल्याः मलकी ब्राह्मी वयस्था तरुणे त्रिषु ॥ सूर्यमंथानयो र्मंथः सांतरे प्यथ मन्मथः ॥ कपित्थे कामदेवेपि रथः पौरुषदेहयोः ॥ ५६ ॥ पुंसि स्त्रियां च षड्ग्रंथः करंजवचयोः क्रमात् ॥ सिद्धार्थः सर्षपे बुद्धे संस्था स्थिति विनाशयोः ॥ ५७ ॥ संस्थासमाप्तिक्रतुषु वरूथो निजराष्ट्रकः ॥ सिक्थो भक्तपुलाके

नामधूर्छिष्टेनपुंसकं॥ ५८॥ ॥इतिथांताः॥ ॥अ-
ष्टापदंशारिफलेसुवर्णेस्त्रीपशौपुमान्॥ वामनेभ्यांस्त्रियांक्लीबं-
केयूरेनांगदः कपौ॥ ५९॥ अर्बुदोरुजिसंख्यायामामोदोगंधहर्ष
योः॥ रहस्येस्यादुपनिषत्समीपसदनेऽपिच॥ ६०॥ कंदोस्त्रीशूरणे
मूलेराजलिंगविषाणयोः॥ स्त्रीककुत्कटुकंदस्तुशृंगवेररसोन-
योः॥ ६१॥ स्त्रीगंभार्याक्लीबमब्जेदिङ्नागेकुमुदः कपौ॥ पुष्पेक्ली-
बंस्त्रमौकुंदः क्षोदोरजसिपेषणे॥ ६२॥ शिवजूटेवराटेपिकपर्दो
थामयेगदः॥ विष्णोर्भ्रातरिस्त्वास्त्रेस्त्रीपलाशेगरुतिच्छदः॥ ६३॥
देशोजनेजनपदो निषादोश्वपचस्वरौ॥ वाक्येशब्देऽप्रदेशेपि
पदं पादस्तुनद्वयोः॥ ६४॥ मूलेप्रत्यंतशैलेच प्रसादस्त्वनुरोध
ने॥ स्वच्छेकाव्यगुणेचाथ प्रतिपत्तिथिसंविदोः॥ ६५॥ विप्रुड्ज्ञा
ताचबिंदुः स्यान्मंदौ स्वैरशनेश्वरौ॥ हस्तिभेदश्चाथमदः स्यात्क
स्तूरीमदानयोः ॥६६॥ गर्वेशुक्रेथमाकंद्यामलक्यांनाऽम्रपादपे॥
मर्यादाधारणासीम्नो र्महानादोगजेपिच॥ ६७॥ मेनादास्तुत्रय
श्छागमार्जारकशिखंडिनः॥ विशदःपांडरेव्यक्ते शारदोजलदे
पिच॥ ६८॥ स्त्रियांचशारदीतोयपिप्पलीसप्तपर्णयोः॥ संवित्संके
तकेपिस्यात्समर्यादोंतिकेस्थिरे॥ ६९॥ व्यंजनेसूपकारेच सूदः
सूपवदिष्यते॥ घर्मस्वेदनयोः स्वेदः संपल्लक्ष्म्यांसमुच्चये॥ ७०॥
॥ ॥इतिदांताः॥ ॥खंडेनासमभागेऽर्धमवधिः
सीमकालयोः॥ आविद्धंप्रहृतंवक्रमानद्धंवाद्यबद्धयोः॥ ७१॥ अलं
कारोपिचाबद्धः प्रत्याशाप्याधिरुच्यते॥ कुटुंबव्यापृतेधर्मचिंता
यांचविशेषणे॥ ७२॥ उपाधि रुग्रगंधेतुवचास्त्रेत्रयमानिके॥ उप
लब्धिर्मतिप्राप्त्योर्ऋद्धिः संपदिचौषधे॥ ७३॥ राहौशिरः शून्य
कायेकबंधः क्लीबमंबुनि॥ गोधातलेनिहाकायां गंधोगर्वेबले-
पिच॥ ७४॥ दोग्धागोपकवौवत्से दुग्धंक्षीरेप्रपूरिते॥ दिग्धंलि

स्नेविषाक्तेच दुर्विधौ खलदुर्गतौ ॥७५॥ रोधोनिरोधेनाशेच बुद्धो-
ज्ञातेजिनेबुधे॥ निषेधबुद्ध्योर्बोधो रौहिणेयकवी बुधः ॥७६॥ दै
त्यचैत्रवसंतेषु द्रुमभेदेचनामधुः॥ मिद्धंचित्ताभिसंक्षेपेनिद्रायांच।
थमागधी ॥७७॥ पिप्पल्यांयूथिकायांनालग्नेमगधजेत्रिषु॥ लशु
नेऽतिविषायांचशुंठ्यामपिमहौषधं॥७८॥ सीतायोजनगंधास्या
त्कस्तूरीव्याससूरपि॥ विधिर्ब्रह्माणिकालेच प्रकारेवेधनेविधा॥
७९॥ पृक्कामहिलाच वधूर्विश्वस्तोनुद्धतश्वविश्रब्धः॥ विश्रब्धं-
बाढार्थेशुद्धंत्रिषुपूतकेवलयोः॥ ८०॥ श्राद्धंनिवापेश्रद्धालौत्रिषु-
साधुर्धनिन्यपि॥ स्कंधः संघेपि सिद्धस्तुनित्यनिष्पंदनादिषु॥ ८१
॥ संधिःपुमान्सुरुंगायांभेदेसंघट्टनेभगे॥ ॥इतिधांताः॥
कुलेख्यातेचाभिजनः स्यादध्वाकालवर्त्मनोः॥ ८२॥ इतिवृत्तेऽ
वदानं स्यात्कर्मखंडनयोरपि॥ अग्रजन्माऽग्रजेविप्रेस्यादन्नंभ
क्तभुक्तयोः॥ ८३॥ विनीतेविप्रभेदेचानूचानोऽर्थीविवाद्यपि॥ अंता
वसायीचांडालेमुनिभेदेचनापिते॥ ८४॥ अश्वकुत्सितयोर्खीव-
ज्रेविद्युतिचाशनिः॥ वर्णमात्रेविसर्गेचाभिनिष्ठानोथहेहये॥ ८५
॥ पार्थेद्रुमेमयूरेनाअर्जुनस्त्रिषुपांडरे॥ अर्जुनीगव्युषायांचभृं
गश्चिकयोरली॥ ८६॥ आत्मामनीष्याकलनंविबंधपरिसंख्य
योः॥ आवेशनंशिल्पगेहे भूतावेशोऽथगेंडुके॥ ८७॥ विशेषेचोप
धानंस्यात्चुल्ल्यामुद्धानमुद्गमे॥ अगंभीरेपिचोत्तानः शराभ्यासे
ष्युपासनं॥ ८८॥ स्यात्कात्यायन्यर्धवृद्धागौर्योर्वरस्त्रीनारि॥ शि
रीषाम्रातकाश्वत्थगर्दभांडेकपीतनः॥ ८९॥ चीरेपिकौपीनमश्वे
पुन्नागेपिचकेसरी॥ कुलीनत्वेचगुह्येच कौलीनमथकंचुकी॥ ९०
॥ स्थापत्येवर्मितेसर्पेकृशोछेदेचकल्पनं॥ कामिनौस्त्रैणवक्रो
चक्रतिनौयोग्यपंडितौ॥ ९१॥ कांचनंतुहेम्निनागकेसरेकांच
नीनिशा॥ धातुवादरतेकांस्यकारेकारंधमीनरि॥ ९२॥ चर्चिकाचि-

छदयिते खकामिन्यौ प्रकीर्त्यते॥ विषदिग्धपशोर्मांसे गृंजनं ना
रसोनके॥ ९३॥ गहनं गह्वरे दुःखे वनेथाबुदमुस्तयोः॥ घनः पुंसि
घनं वाद्यं चर्म स्यात्फलकत्वचोः॥ ९४॥ चीनो वस्त्रव्रीहिभेदे चि
न्हं लक्ष्मपताकयोः॥ चक्रिणौ विष्णुभुजगकुलालग्रामयाजिनः॥
९५॥ कंपेना चलनं कंपे चलनी वस्त्रघर्घरी॥ भूर्जे फलकपाणौ च च
र्म्यथालंबुषे पुमान्॥ ९६॥ निंबेपि छर्दनं वांते जवनो देशवेगिनोः॥
बुद्धे जिनो जित्वरे च जीवनं वर्तनांभसोः॥ ९७॥ शूरे दातरि च त्या-
गी व्रतिशौन्यौ तपस्विनौ॥ तपनो नरके भानौ विरलः स्ये कृशे
तनुः॥ ९८॥ क्रीडादौ देवनं नाऽक्षो द्विजन्मा दंतविप्रयोः॥ दानं गज
मदे त्यागे खंडने रक्षणेपि च॥ ९९॥ दर्शनं वर्णमुकुरचक्षुःशास्त्रो
पलब्धिषु॥ स्त्री दीर्घकोष्ठ्यां दुर्नामाऽर्शसि द्युम्नं बले धने॥ ३००॥
धन्वा मरौ धन्व चापे धावनं गतिशौचयोः॥ निर्भर्त्सनं खलीका-
रालक्तयोरथ नंदनं॥ १॥ देवोद्याने सुते पुंसि नग्नो क्षपणवंदिनौ॥ श्रु
तौ हस्त्यां निशामनं खगंगापि नलिन्यथ॥ २॥ ग्रंथिप्रस्तावयोः पर्व
विषुवत्प्रभृतिष्वपि॥ प्रतिमानं प्रतिच्छायागजगंतांतरालयोः॥ ३॥
पाकस्थाने कुलालस्य वाते च पवनः पुमान्॥ हरीतकी राक्षसी च पूतना
ऽथ वदालके॥ ४॥ पाठीनो गुग्गुलुद्रौ च रक्षोवृक्षौ पलाशिनौ॥ फा
ल्गुनो मासि पार्थे च स्त्री विदग्धा च वाणिनी॥ ५॥ वर्धमानः प्रभ्रभेद-
शरावैरंडविष्णुषु॥ सेनानदी च वाहिन्यौ छेदे वृद्धौ च वर्धनं॥ ६॥
भुवनं विष्टपे तोये भिन्नं दीर्णे विशेषिते॥ जन्माश्रयश्च भवनं
भाजनं पात्रयोग्ययोः॥ ७॥ भूति कांचनयोर्भस्म मलिनं भूषिते ऽ
सिते॥ मानं प्रमाणे तौल्ये च मीनो राश्यंतरे झषे॥ ८॥ मदनाः सि
क्थधूस्तूरतरुभेदमनोभवाः॥ मुनिर्वाचंयमे बुद्धे छंदश्चपा च मा
लिनी॥ ९॥ मातुलानी तु भंगायां मातृभ्रातृस्त्रियामपि॥ राशौ यु
ग्मे च मिथुनं विष्ण्वलौ मधुसूदनौ॥ १०॥ यापनं स्यान्निरसने का

लक्षेपेप्यवर्त्तने॥ चतुःक्रोश्यांचयोगेच योजनं स्यात्तुवाहने॥११॥
गतोन्वयानं योनिस्तूत्पत्तिस्थानेभगेपिच॥ रसनंतुध्वनौस्वादेर
सज्ञारास्नयोःस्त्रियां॥१२॥ यक्षेचंद्रेच राजा स्यात्‌रक्तःकामीच-
रागिणौ॥ गोपित्ते रोचना कूटशाल्मलौ रोचनःपुमान्॥ १३॥ निशा
हरिद्रा रजनी छेदेभूर्जेच लेखनं॥ राशीनामुदयो लग्नंसक्तलज्जि
नयोस्त्रिषु॥१४॥ योषिज्जिह्वाच ललना लक्षणंनामचिन्हयोः॥
रिक्तेवितानमुल्लोचे विलग्नंमध्यलग्नयोः॥ १५॥ दैवानिष्टफलेस
क्तौ व्यसनं निष्फलोद्यमे॥ स्वतंत्रताच व्युत्थानं वामनौ विष्णु
दिग्गजौ॥१६॥ खर्वेश्वाथफलेशुष्केवानंस्यूतेकटेगतौ॥ वृषप
र्वाशिवेदैत्येवेष्टनंमुकुटेगतौ॥१७॥ वेशाकारोपि विषयी कामिनि
क्लीबमिंद्रिये॥ वृक्षादनी स्याद्दूदार्यांस्त्रियांकुठारकेपुमान्॥१८॥स
मालब्धे विभक्तेच विछिन्नं वाच्यलिंगकं॥ लब्धेज्ञातेस्थिते विन्नं
वेदना ज्ञानपीडयोः॥१९॥ वर्तनी तर्कुपीठेपिस्त्रियांवर्तन वर्त्मनोः॥ व
नश्वा जंबुकेव्याघ्रे विपन्नोऽहौविपद्गते॥२०॥ दैवशंसिनिमित्तेच
शकुनं पुंसिपक्षिणि॥ चूडावान्कुक्कुटश्चापिशिखी शृंगारिणोस्त्रि
षौ॥२१॥ क्रमुकश्चस्कंदेशश्च पार्थेद्रौः श्वेतवाहनः॥ मयूरभीष्मद्रो
णेच शिखंड्यथ विहेठनं॥२२॥ विहिंसायांविडंबेच यमेनाशमनं
बधे॥ श्येनःशंकुपक्षिभेदे शकुनिः सौबलेखगे॥ २३॥ धान्यभेदे
पुमान्षष्टिहायनः कुंजरेपिच॥ नासाधौ संज्जनं क्रुतौ साधनंसि
द्धिमेढ्योः॥२४॥ समानो देह वायोच संस्थानंमृत्युरूपयोः॥ संता
नः संततौदेववृक्षेचापत्यगोत्रयोः॥२५॥ क्रतौस्नानेच सवनं मर-
णेपिसमापनं॥ स्यंदनंस्रवणेनातुरथेतिनिशपादपे॥ २६॥ स्वप्न
ज्ञानेचशयने स्वप्नोऽथस्पर्शदानयोः॥ स्पर्शनं स्पर्शनोवातः सूनं
पुष्पेफलेपिच॥२७॥ सेवनं सीवनोपास्त्योःशाश्वताजौ सनातनौ
॥पुत्रेरवौच सूनुः स्यात्भ्रातर्यपिकनीयसि॥२८॥ सीमावाटेस्थि

तौक्षेत्रे स्वामीभर्तरिषण्मुखे॥ धूमवंशशरामर्त्याः सुपर्वाणःप्र
कीर्तिताः॥ २९॥ हनुर्हट्टविलासिन्यांकपोलावयवेपिच॥ ॥
इतिनांताः॥ ॥सजलेमहिषेऽनूपोऽवलेपःसंगगर्वयोः॥
३०॥ आक्षेपोभर्त्सनाकृष्योराकल्पौवेशकल्पने॥ तृणभिद्गु
ल्मिन्युलुपंचंद्रेनास्त्र्युडुपः प्लवे॥३१॥ कल्पःशास्त्रेविधौन्या
येसंवर्तेब्रह्मणोदिने॥ धान्यकुशोष्टमांशेन्हः कुतपश्छागकंबले॥
३२॥गुणवृक्षेपिकूपोविट्सार्योस्त्री कुणपःशवे॥ जिह्वापःशु
निमार्जारेत्रपुसीसकरंगयोः॥३३॥ पादुकायांस्त्रियांवृक्षेपादपी
ठेचपादपः॥ पिंडपुष्पोजवाशोकौ पुष्पंकुसुमआर्तवे॥ ३४॥ग्रं
थावृत्तौपशौशब्देस्वभावेनाटकादिषु॥ रूपमाकारसौंदर्यमानकेष्व
पिदृश्यते॥३५॥शररोपणयोरोपो लेपोलेपनजेमने॥ विटपःप
ल्लवेस्तंबेषिड्गभेदो वलंबपा॥३६॥ आक्रोशेशपथेशापः स्वापः
शयननिद्रयोः॥ ॥इतिपांताः॥ ॥त्रिषुस्यात्कु
त्सितेरेफोरवर्णेतुपुमानयं॥ ३७॥ ॥इतिफांताः॥ ॥
गजेग्रीवाबिलेकंबुः कलंबःशरनालयोः॥ वृंदेकदंबोनीपेना
कादंबौशरपक्षिणौ॥३८॥ प्लीहविप्लवयोर्डिंबः प्रलंबोदैत्य-
शाखयोः॥ बिंबंबिंबफलेरूपेसंबस्तुमुसलानने॥ ३९॥ कल्याण
वतिवज्रेच हेरंबो महिषेऽपिच॥ ॥इतिबांताः॥ ॥
स्वर्णारंभाव वष्टंभौ वाणीछंदोप्यनुष्टुभौ॥ ४०॥ आरंभउद्यमेद
र्पेकामेब्रह्मणिचात्मभूः॥ऋषभोश्रेष्ठवृषभौ करभोऽभःकरोष्ट्र
योः॥४१॥ कुंभोवारस्त्रियाःकांतेरक्षोराशिप्रभेदयोः॥ वीणाप्रसे
वेकुकुभोनगभेदेऽर्जुनद्रुमे॥४२॥ गर्दभःशुक्लकुमुदेखरेपुंस्यथ
दानवे॥जंबीरेव्यवहारेचजंभोदंतेपिचेष्यते॥४३॥ दुंदुभिर्दैत्य
भेदेपिदंभःकैतवकल्कयोः॥ दुर्लभः कछुरेकाम्येसदृशाव्याजयो
र्निभः॥४४॥ मुख्यराट्क्षत्रयोःपुंसिनाभिःप्राण्यंगकेद्वयोः॥ च

क्रमध्येप्रधानेचस्त्रियांकस्तूरिकामदे॥४५॥ भूर्भूमौस्थानमात्रे
च भमृक्ते भृगुजेपुमान्॥ रंभाकदल्यप्सरसो विभुःस्यात्स्वामिमृ
त्ययोः॥४६॥ पुनर्नवायांवर्षाभूः स्त्रीनाकिंचुलुकेप्लवे॥ विस्रंभः
केलिकलहेविश्वासेप्रणयेपिच॥४७॥ स्करभिः स्याद्रसनेपि स
भा द्यूतालयेपिच॥ ॥इतिभांताः॥ ॥अभ्याग
मोविरोधेचशास्त्रमायातमागमः॥४८॥ मठादौब्रह्मचर्यादिच
तुष्के चाश्रमोस्त्रियां॥ अंगीकृतावुपगमः समीपगमनेपिच॥
॥४९॥ उमा दुर्गाऽतसीचाथपीडायांवीचिवेगयोः॥ वस्त्रसूक्ष्मेचवे
स्वायांचोर्मिः स्त्रीपुंसयोर्मतः॥५०॥ कुसुमंस्त्रीरजःपुष्पं क्षेमंक
ल्याणरक्षयोः॥ क्षेमाचंडाऽथकलमालेखनीचौरशालयः॥५१॥
रेतोनिकाम काम्येषु कामंपुंसिस्मरे छयोः॥ क्षौममट्टेदुकूलेचग्रा
मः संवसथेस्वरे॥५२॥ गुल्मः स्तंबेघट्टभेदे घर्मः स्वेदातपोष्म
सु॥ जिह्मः स्यात्कुटिलेमंदे तल्पिमं तल्पकुट्टिमे॥५३॥ तोक्मं
कर्णमलेपुंसिहरितेचहरिद्यवे॥ द्रुमोयक्षेश्वरे वृक्षे दमोदमथुदं
डयोः॥५४॥ धर्मौः हिंसोपमायोगोपनिषत्स्क धनुष्यपि॥ कटेलुंडयो
च निगमो नियमोनिश्चयेव्रते॥५५॥ यंत्रणाबंधयोश्चाथ पंच
मः स्वरसंख्ययोः॥ पद्मो स्त्रीबिंदुजालेऽब्जे व्यूहे संख्यांतरेनिधौ॥
५६॥ गजानांदंतबंधेपि प्रतिमाऽनुकृतावपि॥ भूमिःस्थानेपिकुं
दांबुनिर्गमभ्रांतिषु भ्रमः॥५७॥ गांगेयभीषणौ भीष्मो भीमः
शंभौचपांडवे॥ नरकेमंगले भौमः स्वरेमध्येच मध्यमः॥५८॥ य
मः संयमकीनाशयुग्मजेष्वथराघवे॥ रामः पश्वौ भार्गवेच रुक्मं
लोहरुक्मवर्णयोः॥ ५९॥ संपत्कमलयोर्लक्ष्मी र्विभ्रमो भ्रमहा
वयोः॥ श्यामा गुंद्राकोकिलाच श्यामो मंडपकालयोः॥६०॥ सा
र्वभौमो गजेराज्ञि संभ्रमो साध्वसादरौ॥ ॥इतिमांताः
॥ ॥भिन्नासमानयोरन्यः स्यादभिख्यायशास्यपि॥ आंत्रे

यी पुष्पवत्यांस्यान्नदीभेदेवनामुनौ॥ आश्रयःस्कंधआधारे
आदित्योभास्करेस्करे॥६२॥ वेदोपदेशावम्नायौ हृषीकेरेतसींद्रि
यं॥ इज्यास्यात्संगमेदाने यागेचार्यांगुरौपुमान्॥६३॥उदयोऽ
द्रावुन्नतौच कषायःसुरभौरसे॥ कायःस्वभावेलक्षेच संघेमू
र्तौकदैवते॥६४॥ कौकृत्यमनुतापेस्यादयुक्तकरणेपिच॥ कश्यं
कशार्हेमद्येच काद्रवेयोऽहिरंगयोः॥६५॥ काव्यंप्रबंधेशुक्रेना
कुलायःस्थाननीडयोः॥ गव्यंगोहितदुग्धादौ ज्यायांगव्यातु-
गोकुले॥६६॥ भीष्मेनाहेम्निगांगेयं गोप्यौगोसव्यचेटकौ॥
गातव्यगायनौगेयौ गृह्यमस्वैरिपक्षयोः॥६७॥ चैत्यमायतने
बुद्धविप्रोद्देशकवृक्षयोः॥ चक्षुष्यंसुभगेचक्षुर्हितेस्त्रीकेतके
पिच॥६८॥ गुह्येहृद्येच जन्यंस्याज्ज्यास्यान्मौर्व्यांक्षितावपि॥
कूटायुर्गुग्गुलुद्रोणचत्रिवेद्यांत्रितयेत्रयी॥६९॥ निंद्येवस्त्रगृहे
दूष्यं दस्यूतस्करवैरिणौ॥ भेषजेद्रुविकारेचद्रव्यंभव्येचपित्त
ले॥७०॥ द्वितीयातिथिभित्सल्योः पार्थेभीमेच धनंजयः॥ निका
योसंघनिलयौ नित्येसततशाश्वते॥७१॥ पर्यायःस्यात्प्रका
रेपि प्रायोनाभूमतुल्ययोः॥ पथ्यंहितेभयापथ्यापानीयं-
पेयनीरयोः॥७२॥ पौलस्त्यौरावणश्रीदौस्वर्गलाभौफलोदयौ
ब्राह्मण्यंब्रह्मसंघेपिबालेयौमृदुगर्दभौ॥७३॥ वीर्यंप्रधान
धातौच भर्यश्मीकुब्जपुष्पयोः॥ अनधीनेसहायेच भुजिष्यो
हस्तसूत्रयोः॥७४॥ स्यान्मायाशांबरीबुद्धौ दैत्यशिल्पिबुद्धयोर्म
यः॥ मयुरश्वेऋतुहयेरूप्यंत्रिषुसुरूपके॥७५॥ आहतःस्व-
र्णरजतेरजतेचनपुंसकं॥ वत्सेबलेबुधेरोहिणेयोथश्लेषवाद्य-
योः॥७६॥ लयोयुक्तेचलभ्यंस्याद्विषयौदेशगोचरौ॥ वर्णप्रस्था
नयोर्व्रज्या वदान्यस्त्यागवान्सुवाक्॥७७॥ स्त्रीमल्यांनिर्ज
नेभूल्यं शौर्यंचारभटीबलं॥ शांडिल्यौमुनिमास्तूरौसौरभ्यं

मारुतापिच॥७८॥साध्या देवाः फलंसाध्यंस्थेयौ नेतृपुरोहितौ॥ना शैले सह्यमारोग्ये सामर्थ्ये शक्तियोग्यते॥७९॥ एकत्वादौविचारे च संख्याक्लीबेचसंयुगे॥हिरण्यंरेतसिस्वर्णेमानभेदवराटयोः ८०॥उरस्यपिचवुक्कायां हृदयंमानसेपिच॥ ॥ इतियांताः ॥ ॥अंकुरोरोम्णिरुधिरेवारिण्यभिनवोद्भिदि॥८१॥अम राभाभिनालायांगुडूच्यामप्यथांबरं॥नागभिद्वंधद्रव्यंच स्यादस्त्रं रुधिराश्रुणोः८२॥प्रस्तावेवसरो वर्षेचोष्ठेनीचेपिचाधरः॥अग्रेप्य ग्रोऽवतारस्तुतीर्थेवतरणेपिच॥८३॥ गलहस्तेप्यर्धचंद्रोऽकू पारः कमठेंबुधौ॥अलातेऽस्त्रीकुजेंगारः श्रेष्ठावाच्यावनुत्तरौ ॥८४॥नक्रेचौरेचावहारः स्यादभ्रंव्योममेघयोः॥हविर्वन्हीचा ग्निहोत्रौवृक्षेलघुनिचागुरुः॥८६॥ शक्तोपिषंडश्चांडीरावं-घ्रिः स्यात्पादमूलयोः॥ आसारः प्रसरणेस्याद्वेगवृष्टौसुहृद्बले ॥८७॥आरः शनैश्चरेभौमे इंद्र आत्मनिवासवे॥गौरीश्वरौशि वास्वामि कंदर्पेपीश्वरः पुमान्॥८८॥उदारोदक्षिणस्थूलौदुमे मेढ्रेप्युदुंबरः॥ उग्रोंत्यजेशिवेत्युच्चैरुस्त्रोदीप्तोगविस्त्रियां॥८८ सिंहसटासुपुन्नागे बकुलेनागकेसरे॥केसरः पुंसिकिंजल्केनस्त्री हिंगुनिनद्योः॥८९॥ मक्षिकायामपिक्षुद्रा क्षुद्रः स्यात्कृपणे-त्रिषु॥कद्रुस्त्रिषुकडारेस्यात्कद्रुः स्त्रीनागमातरि॥९०॥नापि तस्योपकरणेकोकिलाक्षेपिचक्षुरः॥भस्मकान्वरसाःक्षाराः का रुः कारकशिल्पिनोः॥९१॥कर्बुरोराक्षसेपापे कर्बुरंशबलेजने॥ कारापीडाबंधशाले क्रूरौ कठिनभीषणौ॥९२॥जंबुद्वीपसहाक ल्याः कुमार्योथाश्ववारके॥बालकेकार्तिकेयेच कुमारो भर्तृदा रके॥९३॥कर्णिकारस्तुधूम्याटेकरंजेपीतमस्तके॥सिदूस्थानेपि चसेत्रं कर्करौ दृढदर्पणौ॥९४॥ शिंशपायांकृष्णसारास्तुर्याचा थोसलेपिच॥कर्णपूरः कुबेरस्तुनंदीवृक्षेकपिंगयोः॥९५॥कुश

रीरेचशाकांनक च्छुरापामरेत्रिषु ॥ कंदरः स्यात् गुहासृण्योः कोट्टारो कूपनागरौ ॥ ९७ ॥ कपोलेचकटाहेचशस्त्रभेदेच कर्परः ॥ भिक्षापात्रेकपालेच खर्परस्तस्करेपिच ॥ ९८ ॥ देवताडे खरा स्त्रीस्यात्खरो गर्दभतीक्ष्णयोः ॥ भद्रमुस्तेगुवाकेच खपुरोथद्रुमेपुमान् ॥ ९९ ॥ रूप्येखलेच खर्जूरं खुरः कोलदलेशफे ॥ खरु रश्वेहरेदर्पेदंतेश्वेतेतुवाच्यवत् ॥ ४०० ॥ गुरुस्त्रिलिंग्यांमहतिदुर्जरालघुनोरपि ॥ गायत्रीखदिरेस्त्रीस्या छंदस्यपिषडक्षरे ॥ १ ॥ गुंद्रस्तेजनकेगुंद्रात्रिलिंग्यांभद्रमुस्तके ॥ गह्वरेद्वेगुहागुंजे पूर्द्वारिद्वारिगोपुरं ॥ २ ॥ नग्नकन्योमयोर्गौरी गौरः स्यादुज्वलेपिच ॥ गोत्रंनाम्निकुलेपुंसि शैलेभूगव्ययोस्त्रियां ॥ ३ ॥ स्वरेरणेच गांधारो गृध्रः स्याल्लोभिपक्षिणोः ॥ कर्बुरेतिलके चित्रं रूभद्रातारयोः स्त्रियां ॥ ४ ॥ चंद्रः शशिनिकर्पूरे चारोबंधापसर्पयोः ॥ मृतेदेवकुलेचैत्रं नाभूभृन्मासभेदयोः ॥ ५ ॥ सर्पेविष्णौचक्रधरश्चिकुरो वृक्षभिल्लयोः ॥ चक्रः कोकेध्रजेपुंसि क्लीबेसैन्यरथांगयोः ॥ ६ ग्रामजालेकुंभकारभांडेराष्ट्रेचदृश्यते ॥ नदप्रभेदेवाद्येच झर्झरोथगुणध्वनौ ॥ ७ ॥ प्रसिद्धावपिटंकारस्तारोत्युच्चस्वरेत्रिषु ॥ तारिण्यंगदमात्रोः स्त्रीननाक्ष्णक्षाक्षिमध्ययोः ॥ ८ ॥ तामंधेतिमिरध्वांतेतोत्रेप्राजनवेणुके ॥ धन्याकेतुंबुरीभुत्यां ताम्रंशुल्वेरुणेत्रिषु ॥ ९ ॥ पेटकेनाविन्वतरी तुषारः शीकरेहिमे इतिकर्तव्यतातंत्रमुपायश्चाहिसाधकः ॥ १० ॥ तीव्रंकटुनितानंच दर्दरः शैलभुग्नयोः ॥ उपायेनिर्गमेद्वारं दारुस्याद्देवदारुच ॥ ११ ॥ दासीसुतोपिदासेरो देहयात्राशनेमृतौ ॥ दिगंबरोंधकारेच वाद्यमेघौच दर्दुरौ ॥ १२ ॥ धात्रीभुव्यामलक्यांच हरिशैलौधराधरौ ॥ धाराहरिद्राश्वगतिनिशांबुस्रुतिराजिषु ॥ १३ ॥ धराधरौखडगमेघौ धीरः पंडितमंदयोः ॥ धीरंचकुंकुमंमयो धरापृथ्वीधरोगिरिः ॥ १४

नेत्रो नेतरि नेत्रं च गुणे मूले विलोचने ॥ नारं शरव्यां नरोधे च न रो जेमानवे ऽर्जुने ॥१५॥ नरेंद्रो राजिकेराज्ञि विषवैद्येपि दृश्यते ॥ धान्योत्क्षेपे निकारः स्याद्दुडून्यामपि निर्जरा ॥१६॥ नभश्च रो पक्षिदेवौ पांशुलाच निशाचरी ॥ बलीकवनयोर्नीध्रं पूरः खाद्येपयश्चये ॥१७॥ सद्मारंभोपरिकरो खड्गफलेपि पुष्करं ॥ नघंतरालेपात्रं स्याद्भांडे चाथ निशापतौ ॥१८॥ पृथक्चरे गजेपृथग्भ्रष्टे पक्षचरः स्मृतः ॥ स्थाल्यां मंथेपि पिठरं पवित्रं कुशमेध्ययोः ॥१९॥ देहोपाटलिपुत्रे च पुरं स्यात्तु गुग्गुलो पुरः ॥ वरो जामातरि वृते कुंकुमे च नपुंसकं ॥२०॥ वक्रः शनैश्चरे क्रूरे पुटभेदे तथा नृजौ ॥ कुब्जवृक्षे हरे वारो बंधुरं रम्यनम्रयोः ॥२१॥ भ्रमरः कामुके भृंगे भरोतिशयभारयोः ॥ विषे स्वादौ च मधुरं मल्लिकायां च माधुरं ॥२२॥ मखाग्नौ च महावीरो मक्षिकायां च मत्सरः ॥ महेंद्रो भूधरे शक्रे दवचक्रे च मंथरः ॥२३॥ विघ्नमन्मथयोर्मारो मकरो राशियादसोः ॥ गमनोत्सवयोर्यात्रा रुधिरं कुंकुमेपि च ॥२४॥ वृक्षभित्पापयो रोध्रो दैत्यभेदे मृगे रुरुः ॥ लंबोदरः स्याद्दुद्धाने गणानामधिपेपि च ॥२५॥ लक्ष्मीपुत्रो स्मरहयो विस्तारो स्तंभविस्तृती ॥ विप्रस्ताने स्त्रियां क्षेत्रे च यैरेणोवरोधसि ॥२६॥ स्याद्दुश्चरे च नक्षत्रे बल्लूरं गहनेपि च ॥ बल्लूरा त्रिषु संशुष्कमांसशूकरमांसयोः ॥२७॥ वैकल्येपि च विश्लेषे विधुरं विकले त्रिषु ॥ विकारो विकृते रोगे विश्वकद्रुः श्वभिद्खलौ ॥२८॥ वरांगे कुंकुमे वैरं वठरः शठमंदयोः ॥ अथ व्यतिकरः पुंसि व्यसनव्यतिषंगयोः ॥२९॥ पर्याणेऽक्षोपकरणे शारिः शकुनिकांतरे ॥ श्रीर्लक्ष्मीवेशसंपत्सु भारती शोभयोरपि ॥३०॥ शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु ॥ पक्वदाडिमबीजाभमाणिक्यशकलेपि च ॥३१॥ शक्रं तो क्षिरुक् शक्रो नाकाध्यक्ष्ये ष्वन्हिषु ॥ गजभूषा च स्थं

…कबदरीपच ॥ ह

लतिग्मकरौ सीरौ सांद्रं मृदौ घनेवने ॥ २५ ॥ तंत्वाद्यग्रंथयोः सूत्रं कारणेपिच दृश्यते ॥ ॥ इतिरांताः ॥ ॥ शैले ऽचलो ऽचला भूमावरालः सर्जवक्रयोः ॥ २६ ॥ अलिः सुरापुष्पलिहोः कल्लोले ध्या कुलं त्रिषु ॥ आलुर्गलंतिकायां स्त्री क्लीबं मूले च भेलके ॥ २७ ॥ आलिः सेतुः सखी यत्वाशौंडिकस्त्री ऽऽ सुतीक्ष्णः ॥ आभीलं भीषणे कृच्छ्रे इला भूर्वाग्बुधांगनाः ॥ २८ आर्द्रसूरणयोरोलः कालः स्यान्मृत्युकृष्णयोः ॥ अंशे वृद्धावपि कला कदली ध्वजरंभयोः ॥ २९ ॥ कफोणिघाते ज्वाले च कीलाव स्त्रीकीलदृश्यते ॥ शिरसोस्थ्नि कपालो स्त्री घटादेः शकले व्रजे ॥ ४० ॥ काकोविषंच काकोलौ सास्नायामपि कंबलः ॥ धूनकेपि कलकलः कामलः कामुके मधौ ॥ ४१ ॥ कुलं गोत्रे गणे देहे ननाज्ञाने च केवलं ॥ कपिला शिंशपाकोस्योः कपिलो ग्रौ मुने श्रुनि ॥ ४२ ॥ कोलौ कपालाद्युत्संगेवराहे भेलके पिच ॥ पिप्पल्यपिच कोलास्या स्त्रीकोलं च बदरीफले ॥ ४३ ॥ मृगे जले च कमलं कुवले बदरोत्पले ॥ कल्लालौ शान्तवोल्लोलौ पर्कट्यां च कमंडलुः ॥ ४४ ॥ कर्मरंगतरौ कर्म फलं दुःखे सुखेपिच ॥ करालो धूर्णतैलेपि देशे केशे च कुंतलः ॥ ४५ ॥ कौतूहलं प्रशस्तेपि खल्लुश्चर्मणि चातके ॥ वस्त्रे निम्ने चाथ खलं शस्यस्थाने शठे त्रिषु ॥ ४६ ॥ मंडले मणिके गोलं गोला गोदावरी सखी ॥ गोपो भूपश्च गोपालौ चपलः पारदे पिच ॥ ४७ ॥ चपलाः पिप्पली लक्ष्मी पुंश्चली विद्युतः स्मृताः ॥ छलं छद्मस्खलितयोर्जंबालौ पंकशैवलौ ॥ ४८ ॥ जंगलो निर्जने देशे त्रिलिंगः पिशिते स्त्रियां ॥ जालं दंभे पि जंबीरे देवभे दे

देपि जंभलः॥ ४९॥ झला ऽऽतपोर्मिर्दुहिता तलं मूलचपेटयोः॥ ता
लो गीतक्रियामाने हरिताले द्रुमांतरे॥ ५०॥ लोहे हारमणौ पुंसि यवा
ग्वां तरला स्त्रियां॥ ब्रह्मदारौ पिचौ तूलं तुला सादृश्ययो स्तुला॥
५१॥ तमालो वरुणे खड्गे तापिच्छे तिलकेपि च॥ गुवाकेपि च तांबू
लं विडंगेपि च तंडुलः॥ ५२॥ दुकूलं श्लक्ष्णवस्त्रेपि चा धेपत्रे छदे
दलं॥ धवला गौर्विनाशंदे शुक्लसुंदरयोस्त्रिषु॥ ५३॥ परमाणौ
च पीलुः स्याद्देहे चात्मनि पुद्गलः॥ शस्त्राकारेप्यश्वतरौ पिप्पलः
पिप्पलं जले॥ ५४॥ शाल्मली शिंशपा चैव पोतिकाचापि पिच्छि
ला॥ सश्मश्रुयुवती पालिः पंक्तिः कर्णलतापि च॥ ५५॥ वीणादं
डे प्रवालो स्त्री विद्रुमे नवपल्लवे॥ नलेकाशे पोटगलः पित्तयुक्ते
च पित्तलः॥ ५६॥ पिंगलः स्यात्कपावग्नावाशफब्रीहिश्च पाटलः॥
फलं जातीफले लाभे बाणाग्रे फलकेपि च॥ ५७॥ फेनिलं बदरे
रिष्टे बालो ह्रीबेरकेशयोः॥ बलिर्जराश्लथत्वे स्त्री गृहदार्वेकसे
बली॥ ५८॥ बलं गंधरसे रूपे क्लीबं वाट्यालके स्त्रियां॥ बहुलः कृ
ष्णपक्षेपि मेला मंदापि वार्दलः॥ ५९॥ दुर्दिने प्यथ वेला स्यात्सिंधोः
कूले च भोजने॥ अर्शोभेदे प्लवे पुंसि भेलं भीरुत्वदि त्रिषु॥ ६०॥ मे
खला ऽद्रिनितंबेपि ग्रहेना मंगलः शुभे॥ निकटेपि च मूलं स्याद्दू
स्तूरेपि च मातुलः॥ ६१ मौलिः कंकेल्लिवृक्षेपि मल्लः पात्रे कपालि-
नि॥ बलीयसि च मत्स्ये च मंडलं परिधौ गणे॥ ६२॥ बिंबे देशे नाच
शुनि रसाल स्त्विक्षुचूतयोः॥ जिह्वाकमलयो र्लोला शालास्या
दृह शाखयोः॥ ६३॥ तरुजातौ मत्स्यभेदे शालो हाले नृपेपि च॥ निग
डे पुंस्कटीबड्डवस्त्रेन शृंखलं त्रिषु ६४ शालिर्गंधमृगे धान्ये शयालुः
कुक्कुरेलसे॥ शकलं वल्कले खंडे शीतलः शिशिरेनिले॥ ६५॥ चं-
डाली तैलमाने स्यात्सारसी स्त्रीच कामुकी॥ सिध्मला शुष्कमीने स्त्री
त्रिलिंग्यांतु किलासिनि॥ ६६॥ ऋजौ वृक्षे च सरलः सालो वरणस

र्जयोः॥ हस्तिमल्लोगजास्येच हेलावज्ञाविलासयोः॥६७॥ ॥
इतिलांताः॥ ॥ यागेन्वमथसंधानेस्नानेचाभिषवःपुमान्
॥ मृतावसत्वेचाभावःस्याद्भवःपुष्पमार्तवं॥६८ आस्रवोंगीकृ
तौचश्ये आहवोयागसंगरौ॥ उपप्लवोराहूत्पातौकितवौमत्तवंच
कौ॥६९॥ स्वलीनेस्त्री कविःपुंसिकाव्यकृच्छुक्रसूरिषु॥ कैतवंतु
छलेद्यूतेराजिकायांस्तुतिस्तवः॥७०॥ केशवः केशवान्विष्णुर्गौलवौ
मुनिलोध्रयोः॥ जीवोस्त्री जीवितेपुंसिगुरुजंत्वोःस्त्रियांगुणे॥७१॥
तत्त्वंविलंबितेनृत्येस्वरूपेपरमात्मनि॥ मेघेराज्ञिस्करेदेवोद्विजि-
ह्वोव्याडसूचकौ॥७२॥ ध्रुवोवटेस्मरशरेचगीतिस्रुक्भेदयोर्ध्रुवा
॥ धवोधूर्तेप्यथनवोनूतनेवायसेस्तुतौ॥७३॥ प्लवोनिषादेमर्क-
ट्यांभेकेमेलगतौकपौ॥ पल्लवोविस्तरेषिंगेकिसलेविटपेवने॥७४
॥ घटादौपार्थिवोराज्ञि बल्लवःसूदगोपयोः॥ गजेधन्विनिसुक्रेच
पर्शुरामेचभार्गवः॥७५॥ दूर्वागौरीच भार्गव्यौ सत्तासंसारयोर्भ
वः॥ भावोगौरविनेजंतौपदार्थेभिनयांतरे॥७६॥ माधवौहरिवै-
शाखौ राजीवोमृगमीनयोः॥ रौरवोघोरनरकौ लवश्छेदनलेशयोः
॥७७॥ करंजभित्सुले लट्वा ऽवद्यपक्षिप्रभेदयोः॥ विश्वंशुंठ्यांसम
स्तेच निर्वाणेविभवोधने॥७८॥अश्वौघेवाडवंनस्त्रीपाताले नाद्वि
जौर्नयोः॥ वडवा ऽश्वाकुंभदास्योर्योगेकीलेहरेशिवः॥७९॥ स्फरवं
क्षेमेशिवंश्यामा ऽऽमलकीचाभयाशिवा॥ षाडवस्तुरसेरागे सैंध
वोलवणाश्वयोः८० स्वोस्त्रियांज्ञातिधनयोः स्वमात्मनिनपुंसकं॥।
आधेयधारणेसत्वेमेलकेपिच संभवः॥८१॥ ॥इतिवां
ताः॥ ॥ अपभ्रंशोऽधुःपतनेभाषाभेदापशब्दयोः॥ टीका
दर्पणावादर्शा वाशातृष्णादिशोःस्त्रियां॥८२॥ प्रभुशंकरयोरी
शः स्त्रियांलांगलदंडके॥ दिगंबरेकपौकीशः केशोवालप्रचेतसोः
॥८३॥ जीवितेशोयमेनाथेदंशःसंहननेपिच॥ सर्पक्षतेथक्षानेच

लोचने दर्शने च दृक् ॥ ८४ ॥ नाशः पलायने मृत्यौ निस्त्रिंशौ ख
ड्गनिर्दयौ ॥ निशा रात्रिर्हरिद्रा च मृगादौ प्रथमे पशुः ॥ ८५ ॥ पुरोडा
शो हविर्भेदे च मस्यां पिष्टकस्य च ॥ रसे सोमलतायाश्च हुतशेषे च
कीर्त्यते ॥ ८६ ॥ पाशः कचार्थे संघार्थः कर्णांते शोभनार्थकः ॥ छत्रा
द्यंते च निरार्थः पाशः पक्ष्यादिबंधने ॥ ८७ ॥ वार्ताहरे पुरोगे च सहा
ये च प्रतिस्पशः ॥ लोमशो मेदुकेपि स्याद्विवशौ वशविह्वलौ ॥ ८८
॥ वंशो वर्गे च पृष्ठांशे वेशो वेश्यागृहेपि च ॥ आयत्ततायां प्रभुत्वे च व
शः परवशस्त्रिषु ॥ ८९ ॥ दाने रोगेपि च स्पर्शः सदृशं तूचिते समे ॥ ॥
इति शांताः ॥ ॥ भ्राष्ट्रेष्वंबरीषं ना किशोरहरिशंभुषु ॥
९० ॥ अभिलाषेऽनुतर्षः स्यात्पानेच्छा चाप्यथामिषं ॥ संभोगे को-
चमांसेषु उषा बाणात्मजा निशा ॥ ९१ ॥ भल्लूके शोणके च स्त्री नक्षत्रे
पुंनपुंसकं ॥ ऋषिर्वेदेपि कक्षस्तु दोर्मूले शुष्ककानने ॥ ९२ ॥ कक्ष्या
वरत्रा प्रकोष्ठस्पर्धोद्ग्रहणिकासु च ॥ कुल्माषं कांजिके ना तु यवके स्या
द्यथाविधे ॥ ९३ ॥ पापे च कलुषं घोषः शब्दाभीरनिवासयोः ॥ शुचौ
दक्षे च चोक्षः स्यात्तर्षौ लिप्सापिपासयोः ९४ ॥ दक्षः प्रजापतौ ताम्र
चूडे हरवृषे पटौ ॥ पौरुषं मानभेदे च पुन्नागे पुरुषो नरे ॥ ९५ ॥ प
क्षौ मासार्धपार्श्वौ च महिषी राजपत्न्यपि ॥ मूर्खे माने फले माषो
मेषो राश्यंतरोरणे ॥ ९६ ॥ संख्यायां तु न ना लक्षं क्लीबं व्याजशर
व्ययोः ॥ हस्ताक्ष्योर्विशालाक्षो शेषो नानंतसीरिणोः ॥ ९७ ॥ उप-
युक्तेतरे च स्त्री शैलूषो नटबिल्वयोः ॥ शुश्रूषा परिचर्या च संहर्षः
स्पर्धने मुदि ॥ ९८ ॥ ॥ इति षांताः ॥ ॥ योग्यायामंति-
केऽभ्यासोऽधिवासौ स्थानसत्क्रिये ॥ आख्यायिकापरिच्छेदे
चाश्वासो निर्वृतावपि ॥ ९९ ॥ उदर्चिरुस्रभे वन्हावेनः पापापराध
योः ॥ कनीयाननुजेऽल्पे च कंसो माने स्फुरांतरे ॥ १०० ॥ तैजसे त
स्य पात्रे च कुत्सः स्तबकहारयोः ॥ छंदः पद्यश्रुती छासः तरो वेगे

वलेपिच ॥१॥ तमः शोकेप्यथहिमर्तौनाधर्मेव्रते तपः ॥ पद्मेस्वर्णेता
मरसंनिशादुर्गाचतामसी ॥ २॥ मणिदोषेदरेत्रासो दासीवित्तार्थ
चेटयोः ॥ झिंट्यांच दासीदीर्घायुर्ऋषिः काकश्चशाल्मलिः ॥३॥ योक्त्रे
चवंसंस्थाने स्यात्तेसर सिमानसं ॥ मासश्चंद्रमासयोः पुंसिखर्जू
रेक्ष्वोर्महारसः ॥ ४॥ राजहंसोनृपाग्रेचजिह्वाभूः शल्लुकीरसा ॥
जलेशरीरधातौचपारदस्वादयोरसः ॥५॥ भाषाभूंखलकेरासः क्री
डायामपिगोदुहां ॥ रहोरतेचगुह्येचरभसो हर्षवेगयोः ॥ ६॥ वि
हायाः शकुनेपुंसिविहायस्त्वेनपुंसकं ॥ पुत्रादौतर्णकेवर्षेवत्सः क्ली
बंतुवक्षसि ॥ ७॥ रसेक्रूरेचविकृतौवीभत्सस्त्रिषुनार्जुने ॥ व्यासो
मुनौचविस्तारेबर्हिर्नाकुशशुष्मणोः ॥८॥ अग्रेप्रधानेचशिरः श्री
वासोविष्णुधूपयोः ॥ सुमनाः पुष्पमालत्योः स्त्रियांनांदेवधीरयोः
॥९॥ वीणाभेदेसर्जरसोधूणकेप्यथसारसं ॥ पद्मेनापक्षिणीदौच
सरोनीरतडागयोः ॥१०॥ हविः सर्पिषिहव्येचहंसस्तुरगसूर्ययोः
॥ निर्लोभेनृपतौविष्णावंतरात्मनिचेष्यते ॥११॥ ॥ इतिसांताः
॥ ॥ अवग्रहः स्यात्प्रकृतिभावदृष्टिविबंधयोः ॥ अवरोहोवत
रणेत्रिदिवेचलतोद्गमे ॥१२॥ आरोहस्तुनितंबेस्याद्दीर्घत्वेचसमु-
च्छ्रये ॥ शक्तौस्नेहेचाग्रहः स्यादीहात्द्यमवांछयोः ॥१३॥ स्रुपेचपा
कपात्रेचकटाहोमहिषीशिशौ ॥ खड्गकोषेचकलहो दात्यूहश्चा
तकेपिच ॥१४॥ समारंभेपिपटहो ब्रह्मण्यपिपितामहः ॥ प्रवाहो
व्यवहारेच बहुर्विपुलसंख्ययोः ॥१५॥ वराहः सूकरेमेघेमुस्तकेप्य
थमूर्छने ॥ अविद्यायांचमोहः स्याद्वृषस्कंधेऽनिलेवहः ॥१६॥ दे
हनिर्माणसैन्येषुव्यूहः स्यादथविग्रहः ॥ संग्रामेप्रविभागेचदेहवि-
स्तारयोरपि ॥ वैदेहीपिप्पलीसीतावणिक्स्त्रीरोचनास्वपि ॥ संक्षेपे-
पिसंग्रहः स्याद्वसिंहो वार्ताकुवासकौ ॥१८॥ राशिभेदेहरौसिंहः श्रे
ष्ठार्थेचोत्तरेस्थितः ॥ सौहृदेघृततैलादौस्यात्स्नेहोऽप्यव्ययाःपरे ॥

॥१९॥ ॥इतिहांताः॥ ॥अथाव्ययाःपरेवाच्यानञ
भावेनिगद्यते॥तद्विरुद्धेतदन्येचनिषेधेपिचदृश्यते॥२०॥सादृ
श्येचैवदर्थेचहिरुग्मध्यविलासयोः॥पुनरर्थेगभोऽर्थेचस्रुत्स्वस्त
र्थप्रशंसयोः॥२१॥चपादपूरणोपस्रांतरेहेतौविनिश्चये॥ह्राविस्म
येप्रमोदेचओमेवंप्रणवार्थयोः॥२२॥युक्तार्थेसाधनार्थेचसांप्र
तंतद्विदोविदुः॥हुंवितर्केचानुमतौवार्तायामरुचौकिल॥२३॥प्रा
तर्दिनेचपूर्वत्रेत्यर्थेपूर्वेद्युरिष्यते॥ ॥इतिनानार्थवर्गः ॥
आनंदेऽस्तुशर्मदिष्ट्याकटवेकटचाद्भुते॥भूर्भुवःस्वस्त्रिभुवनमना
गर्थेदरंस्मृतं॥२४॥आमंडमभ्युपगमेनवरंकेवलार्थकम्॥प्रातरर्थेऽ
नपथनिक्षणमात्रेक्षणाक्षणं॥२५॥क्षेमपुण्येस्वस्तिनास्यादुच्चैर
र्थेऽदृकीर्तितम्॥वारंवारंशश्वदर्थेवारंवारेणचेष्यते॥२६॥उता
होयदिवायद्वाकिंवानेतिसमाइमे॥ किंत्वर्थेपितुयद्यर्थेसचेसोक्ता
दिवान्वकं॥२७॥अस्त्याहकालसामान्येतिङंतप्रतिरूपकं॥सज्जः
सहार्थेनेत्याहनिषेधेयदिशोषगीः॥२८॥विभाषाऽन्यतरस्यांवा
विकल्पार्थाःप्रकीर्तिताः॥तेइतिस्यात्वयेत्यर्थेमयेत्यर्थेचमेइति॥
॥२९॥ ॥इत्यव्ययवर्गः॥ ॥ ७

अथाव्ययानि त्रीण्यानंदार्थस्य द्वेअद्भुतार्थस्य त्रिभुवनस्यैकं ईषद
र्थस्यैकं २४ अभ्युपगमार्थस्यैकं केवलार्थस्यैकं प्रातरर्थस्यैकं क्षणमा
त्रस्यैकं २५ द्वेपुण्यार्थस्य द्वेउच्चैरर्थस्य द्वेशश्वदर्थस्य२६षट्विकल्पा
र्थस्य द्वेकिंत्वर्थस्य द्वेयद्यर्थस्य २७ कालसामान्यस्यैकं सहार्थ-
स्यैकं निषेधार्थस्यैकं २८ त्रीणिविकल्पार्थस्य त्वयेत्यर्थस्यैकं मये
त्यर्थस्यैकम् २९

लिंगादिसंग्रहे ऽनुक्तममरेणाभिदध्महे ॥ स्त्रियामाजिर्दरज्जातिपु
रुड्ढाषाःसमाःशरत् ॥ ३० ॥ सिकताद्याबहुत्वेपिविंशत्याद्येकवागपि
॥ पुंस्त्वेहाहाहूहूग्रंथिःपाणिःकलिर्द्दृतिर्मौलिः ॥ ३१ ॥ अंजलिरंघ्रिः
कुक्षिर्मारकलौकोत्तरासंगाः ॥ यवकवातसंकेतपोतकर्तगरुच्छदाः
॥ ३२ ॥ श्लेष्मोष्मपापयक्ष्मास्यान्मोनोवातायनस्तनः ॥ फेनाभि
जनकलापनिकाल्याहारोद्धारोपलकल्लोलाः ॥ ३३ ॥ फालचषालकी
तंडुलशैवलखलविभवप्रसवाः ॥ आनापुजननाडीभ्योयुगमंगंपदं
व्रणं ॥ ३४ ॥ आनंदेदुंदभिरथबहुत्वेप्यसवोगृहाः ॥ सक्तवोवल्लजा
लाजादाराःप्राणादशाइति ॥ ३५ ॥ क्लीबेकलत्रविषवीजकटस्वरल
तल्पोक्तकुंकुमप्रवीडतृणाक्षराणि ॥ श्रृंगाटपीठगुदभेषजपृष्ठकि
ण्वदेवाशभाश्रुचिबुकोडुपसाहसानि ॥ ३६ ॥ यकृत्कुहकलिध्मा-
नितीरंकालध्वजानुच ॥ धर्मार्धसारमित्राण्यंगदन्न्यास्यबंधुषु ॥
३७ ॥ पुंनपुंसकयोर्दारुजीवातुस्थाणुसीधवः ॥ स्याद्धास्तुर्हिंगुति
तउसानुकंवुकमंडलु ॥ ३८ ॥ गोमयकुमुदबिंबकुबिंबशंखाश्र
मस्तृपास्कवर्णतोरणाः ॥ नूपुरशिखरतूर्याशचृद्धांकुशबर्हिपल्लवाः
॥ ३९ ॥ व्रतदिनमासवर्षादलवल्कलकोटरखंडवासवाः ॥ चंदन
पद्मधर्मकोलाहलकिसलयदेहदोहदाः ॥ ४० ॥ कुलिशध्वजकार्षा
पणनिधानमुस्ताककारुश्रृंगवलयाः ॥ पटलप्रवालचषकोपवा
सकासारकटकसंतानाः ॥ ४१ ॥ आकाशकुंजकुतपौदनवारबाण
मुक्तावतंसनखमंडपकच्छपुच्छाः ॥ कांतारकंकणतडागकिरीट
राष्ट्रतीर्थव्रणास्तबकसंक्रमपीठकानि ॥ ४२ ॥ समरसरकरणवि
टपांगनागैरिकदेवतकुटागाराः ॥ प्रोथमुहूर्तदिवसफलानिमास
निदाघमुसलतिलकानि ॥ ४३ ॥ वल्मीकबाल्हीकहृषणाद्रोणगां
डीवनिगडानिच ॥ मुकुलादिचविज्ञेयंशिष्टसंदर्भतोपरं ॥ ४४ ॥
अथस्त्रीनपुंसकयोःकेलिर्मणिर्योनिर्मसिर्मुनिः ॥ मरीचिःशाल्म

लिःस्वातिःश्रेणिर्मुष्टिस्तिथिःस्थूणिः॥४५॥ऊर्मिर्गर्भास्तिरशनिर्वै
पार्ष्णीक्षुधिराशयः॥ वस्तिश्च किष्कुः कंदुश्च वेश्ववतन्निंबबाहवः॥
४६॥गंडूषगर्जजागरभुजकीलज्वालवर्तकव्रीडाः॥उत्कंठसटव
राटकरभसाः स्त्रीत्वेतुटाबंताः॥४७॥शाल्कोवृश्चिकःकीटःशा
रस्तूणोघटःकटः॥शफरोवेतसश्चामी स्त्रियाङ्यंताःप्रकीर्तिताः॥
॥४८॥स्त्रीक्लीबयोरुडुदर्भाच्छर्दिर्ज्योतिःसदोर्चिषः॥स्कन्नलस्पं
वणिज्यंच बडिशक्रोडपाटलं॥तारकंरसनंनीतमेतेटाबंतकाःस्त्रि
याम्॥ङ्यंतास्तुनगरास्थानस्थलानिपुरपाटलं॥५०॥त्रिलिंगं
तुप्रतिसरस्फुलिंगनखरार्गलाः॥कंदरंश्रृंखलंनालंबल्लूरफलमु
स्तकाः॥५१॥जंभश्चटाबंताएते स्त्रियामथबिभीतकः॥हरीत
काटकतटकवाटाश्चगुणेवटः॥५२॥मंडलंशलभंभल्लातकंक
लशाकंदलौ॥मृणालामलकोदाडिमश्चङ्यंताःस्त्रियामिमे॥कर-
णेल्युट्त्रिषुयथातस्यव्याख्यानमित्यदः॥स्वनकूङ्गाप्यकृशावनु-
मानइतीछति॥५४॥ ॥इतिलिंगादिसंग्रहवर्गः॥ ॥
दृष्टप्रयोगायेशब्दाःप्रायस्तइहकीर्तिताः॥अप्रयुक्तास्तुपाणि-
न्यादिषु दृष्टाप्युपेक्षिताः॥५५५॥ ॥इतितृतीयकांडःसमाप्तः
इतिश्रीपुरुषोत्तमदेवरचितस्त्रिकांडशेषाभिधानकोषःसमाप्तः

छ छ छ छ छ छ छ

समाप्तः

मुंबईतज्ञानदर्पणछापखान्यांतछापिलेंशके१७७६
आनंदनामसंवत्सरेवैशाखवद्य ८

षोक्तेश्च कुत्रचित् ॥३॥ त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति ॥
निषिद्धलिंगं शेषार्थं त्वंताथादि न पूर्वभाक् ॥४॥ रूपाद्व्यक्तं लिङ्गमुक्तं
लिपिभ्यां निश्चिते क्वचित् ॥ विशेष्यनिघ्नः नुक्तेऽपि विज्ञेया वाच्यलिं
गता ॥५॥ गुणे शुक्लादिकट्वाद्याः पुंसि स्युस्तद्वति त्रिषु ॥ तीक्ष्णाद्या-
श्च गुणे क्लीबं गुणिलिंगास्तु तद्वति ॥६॥ क्लीबपुंसोरपि स्त्रीत्वं क्वाप्य
स्त्वविवक्षया ॥ जातिवाचकशब्दानामपि तत्स्त्रीविवक्षया ॥७॥ उद्भि
दः प्रसवे क्लीबे हरीतक्यादयः स्त्रियां ॥ पुष्पे जाती प्रभृतयः स्वलिंगा
व्रीहयः फले ॥८॥ प्राङ्नानार्थान्न तल्लिंगं द्वयोर्द्वंद्वे न चैकता ॥ शब्दावृ-
त्तिर्न लिङ्गैक्ये समभागे न विशेषणे ॥९॥ क्लीबे नपुंसके पुंसि स्त्रियां यो-
षिति च द्वयोः ॥ त्रिषु चेत्यादि यद्रूपं तल्लिङ्गस्यैव वाचकम् ॥१०॥ ना-
नार्थः प्रथमांतोऽत्र सर्वत्रादौ प्रदर्शितः ॥ सप्तम्यंताभिधेयेषु वर्तमानो
विनिश्चितः ॥११॥ एकद्वित्रिचतुःपंचषड्वर्णानुक्रमात्कृतः ॥ स्वरका
द्यादिकाद्यांतवर्गैर्नानार्थसंग्रहः ॥१२॥ नानार्थकोशपुस्तकभारा
र्जनदुःखहानये कृतिनः ॥ मेदिनिकरकृतकोशो विशुद्धलिंगोऽभि
लिख्यतामेकः ॥१३॥ **ककम्** **को** ब्रह्मणि समीरा-
त्मयमदक्षांशुभास्करे ॥ कामग्रंथौ च क्रिणि च पतत्रिपार्थिवे तथा ॥१४
मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षजलेषु **कम्** ॥ **कद्वि**
अर्कः केपर्णे स्फटिके रवौ ताम्रादिवस्पतौ ॥१५॥ **अंको** रूपक
भेदाङ्गचिन्हे रवाजिभूषणे ॥ रूपकांशांऽन्तिकोत्संगस्थाने ॥ **कं** पाप
दुःखयोः ॥१६॥ **एकं** संख्यांतरे श्रेष्ठे केवलेतरयोस्त्रिषु ॥ **कर्कः** क
र्कटके वह्नौ शुक्लाश्वे दर्पणे घटे ॥१७॥ **कंक**श्छद्मद्विजे ख्यातो लो

हपृष्ठकृतांतयोः॥ **कल्को**ऽस्त्रीघृततैलादिशेषेदंभेविभीतके॥१८॥
विड्किट्टयोश्चपापेचत्रिषुपापाशयेपुनः॥ **काकः** स्याद्वायसेवृक्षप्रभेदे
पीठसर्पिणि॥१९॥ शिरोऽवक्षालनेमानप्रभेदद्वीपभेदयोः॥ **काका**स्या
त्काकनासायांकाकोलीकाकजंघयोः॥२०॥ रक्तिकायांमलयांचकाक
माच्यांचयोषिति॥ **काकं** स्मरतबंधेस्यात्काकानामपिसंहतौ॥२१॥
किष्कुर्द्वयोर्वितस्तौच प्रकोष्ठेपिकरेऽपिच॥ **कोक**श्चक्रेवृके ज्ये-
ष्ठ्यांखर्जूरीद्रुमदर्दुरे॥२२॥ **छेको** गृहाश्रितमृगपक्षिणोर्नागरेत्रि
षु॥ **टंको**नीलकपित्थेचखनित्रेटंकनेस्त्रियां॥२३॥ जंघायांस्त्रीपु-
मान्कोपेकोशासिग्रावदारणे॥ **तर्कः** कांक्षावितर्कोहहेतुशास्त्रेषुक
थ्यते॥२४॥ **त्रिका**कूपस्यनेमीस्यात्**त्रिकं** पृष्ठाधरेत्रये॥ **तोकं**पु
त्रेस्कृतायांच **द्रूकः**स्यात्काककोकयोः॥ **न्यंकु**र्मुनौमृगेपुंसि**नाक**
स्तुत्रिदिवेंबरे॥२५॥ **नाकु**र्मुन्यंतरेपृथ्वीधरवल्मीकयोःपुमान्॥ **नि**
ष्कमस्त्रीसाष्टहेमशतेदीनारकर्षयोः॥२६॥ वक्षोलंकरणेहेमपात्रेहे
मपलेऽपिच॥२७॥ **पंको** स्त्रीकर्दमेपापे**पाकः** परिणतौशिशौ॥ के
शस्यजरसाशौक्ल्येस्थाल्यादौपचनेऽपिच॥२८॥ **बक**स्तुबकपुष्पे
स्यात्कुबेरेश्रीदेचरक्षसि॥ **भूकं** छिद्रेचकालेच**भेको**मंडूकमेघयोः
॥२९॥ **मुष्को**मोक्षकवृक्षेस्यात्संहतेवृषणेऽपिच॥ **मूक**स्तुवाचि-
नादैत्येरंकः कृपणमंदयोः॥३०॥ **राका**नद्यंतरेकच्छ्वांनवजातरजः
स्त्रियाम्॥ संपूर्णेदौतथारेकः शंकानीचविरेचने॥३१॥ **रोक**स्तु
क्रयभिद्‌दोस्योरोकंनाविचलेबिले॥ **लंका**रक्षःपुरीशाखाशाकिनी
कुलटास्वपि॥३२॥ **लोको**जनेपिक्षवनेवल्कं वल्कलशल्कयोः॥ **वं**
कःपर्याणभागेनानदीपात्रेचभंगुरे॥३३॥ **शल्कं**तुशकलेवल्केश
कोजात्यंतरेनृपे॥ **शंकुः**संख्याऽस्त्रयादोभिन्कीलाशकलुषेषु
ना॥३४॥ **शंका**त्रासेवितर्केच**शाको**द्वीपांतरेऽपिच॥ शक्रोद्रुमवि
शेषेचपुमान्हरितकेऽस्त्रियां॥३५॥ **शुको**व्याससुतेकीरेरावण

स्यच मंत्रिणि॥ शिरीषपादपे पुंसि ग्रंथिपर्णे नपुंसकम्॥ ३६ **शु**
ल्कं घट्टादिदेये स्यादूरादर्थग्रहे स्त्रियां॥ **शूका** स्त्री शुंगदलयोः
श्लोकः पद्ये यशस्यपि॥ ३७॥ **शोकं** शकगणे स्त्रीणां करणे **सूकः**
स्यपि॥ बाणवातोत्पले **स्तोकं** त्रिष्वल्पे चातके पुमान्॥ ३८॥ ॥

कत्रिः ॥ **अशोक**स्त्रिषु निःशोके पुंसि कंकेल्लिपादपे॥ स्त्रि-
यां तु कटुरोहिण्यां पारदे स्यान्नपुंसकम्॥ ३९॥ **अलका** कुबेरपु
र्यामस्त्रियां चूर्णकुंतले॥ **अर्भकः** कामुके क्रूरे निर्भये त्रिषु नाक
वौ॥ ४०॥ **अनीको**ऽस्त्री रणे सैन्ये **प्यणुको** निपुणाऽल्पयोः॥ **अ**
लीकमप्रिये ऽपि स्याद्दिव्यसत्येन पुंसकं॥ ४१॥ **अनूकं** तु कुले शी
ले पुंसि स्याद्गतजन्मनि॥ **अंशुकं** श्लक्ष्णवस्त्रे स्याद्वस्त्रमात्रोत्तरी
ययोः॥ ४२॥ **अंतिकं** निकटे वाच्यलिंगं स्त्री शातलौषधौ॥ चुल्यां ज्ये
ष्ठभगिन्यां च नाट्योक्त्या कथ्यते ऽ**तिका**॥ ४३॥ **अलर्को** धवलार्के
स्याद्योगोन्मादित कुक्कुटे॥ **अंबिका** पार्वतीमात्रो धृतराष्ट्रस्य मातरि
॥४४॥ **अंधिका** द्यूतभेदे च रजन्यामपि योषिति॥ **अम्लिका** नि-
त्तिडीचाम्लोद्गारचांगेरिकासु च॥ ४५॥ **अर्भकः** कथितो बाले मूर्खे
पि च कृशेपि च॥ **आनकः** पटहे भेर्यां मृदंगे ध्वनदंबुदे॥ ४६॥ **आ**
टकी तु तुवर्यां स्त्री परिमाणांतरे त्रिषु॥ **आलोक**स्तु पुमान्द्योतने द
र्शने बंदिभाषणे॥ ४७॥ **आन्हिकं** दिननिर्वर्त्ये त्रिलिंगमथ न द्वयोः
॥ नित्यक्रियाभोजनयोर्वृंदे प्रकरणस्य च॥ ४८॥ **आतंको** रोगसं
तापशंकासु मुरजध्वनौ॥ **इक्ष्वाकुः** कटुतुंब्यां स्त्री सूर्यवंशनृपे पु-
मान्॥ ४९॥ **उलूकः** पुंसि काकारौ वंद्रे भारतयोधिनि॥ **उदर्कः** फल्य-
कालीनफले मदनकंटके॥ ५०॥ **उष्णक**स्तु निदाघे स्यादातुरे क्षिप्र-
कारिणि॥ **उष्ट्रिका** मृत्तिकाभांडभेदे पि करभस्त्रियाम्॥ ५१॥ **ऊर्मि**
का चांगुलीये स्याद्वस्त्रभंगतरंगयोः॥ **कनकं** हेम्नि पुंसि स्यात्किंशुके
नागकेसरे॥ ५२॥ धुस्तूरे कांचनारे च कालीये चंपके ऽपि च॥ **करक**स्तु

पुमान्पक्षिविशेषेदाडिमेपिच॥५३॥ द्वयोर्मेघोपलेनस्त्रीकरंकेचक
मंडलौ॥ क्रमुकस्तुपुमान्भद्रमुस्तकेब्रह्मदारुणि॥५४॥ फलेकार्पा
सिकायाश्चपट्टिकालोध्रपूगयोः॥ कटकोस्त्रीनितंबेद्रेः दंतिनां दंत
मंडने॥५५॥ सामुद्रलवणेराजधानीवलययोरपि॥ कटुकाकटुरो
हिण्यांस्त्रियांश्योषेनपुंसकं॥५६॥ कंटकोनस्त्रियांक्षुद्रेशत्रौमत्स्या
दिकीकसे॥ नैयोगिकादिदोषोक्तौस्याद्रोमांचद्रुमांगयोः॥५७ करंको
मस्तकेऽशस्यनालिकेरफलास्थनि॥ कलंकोऽकेः पवादेचकालाय
समलेऽपिच॥५८॥ कर्णिकाकरिहस्ताग्रेकरमध्यांगुलावपि॥ क्रमु
कादिहढदंतेऽब्जवराटकर्णभूषणे॥५९॥ कणिकाकथ्यतेऽत्यंतसू-
क्ष्मवस्त्वग्निमंथयोः॥ कवाकुस्तुदुराधर्षेदुःशीलेचबिलेशये॥६०
॥ कंचुकोवारबाणेस्यान्निर्मोकेकरभेपिच॥ वर्धापकगृहीतांगस्थि
तवस्त्रेनचोलके॥६१॥ कंचुक्योषधिभेदेऽथकारिकानटयोषि
ति॥ कृतौविवरणश्लोकेशिल्पयातनयोरपि॥६२॥ नपुंसकंतुकर्मा
दौकारकंकर्तरित्रिषु॥ कामुकःकमनेऽशोकपादपेचाऽतिमुक्तके
॥६३॥ कार्मुकंधनुषिस्याच्चावेणौकर्मक्षमेऽन्यवत्॥ काचूकःकु
कवाकौस्यात्सीनमस्तककोकयोः॥६४॥ क्षारकःपक्षिमत्स्यादिपि
टकेजालकेऽपिच॥ कालिकाचंडिकाभेदेकात्स्न्र्येवृश्चिकपत्रयोः
॥६५॥ क्रमदेयवस्तुमूल्येधूसरीनवमेघयोः॥ पटोलशाखारोमाली
मांसीकाकीशिवासुच॥६६॥ मेघावलीचकिंपाकोमहाकालफला
ज्ञयोः॥ कीचकोदैत्यभिद्वातहतसस्वनवंशयोः॥६७॥ कीटकः
क्रिमिजातौनास्तिक्षुरेपुनरन्यवत्॥ कुरुकंतुपटोलेस्यात्सम्बद्धश्लो
कसंहतौ॥६८॥ पुंसिवल्मीककाकेंदुकुलश्रेष्ठेषुकथ्यते॥ कुल
कास्त्रिषुनीचेऽल्पे कुशिकोमुनिसर्जयोः॥६९॥ कुषाकुःकपिव
ह्न्यर्केनापरोत्तापिनित्रिषु॥ कुलिकोनागभेदेस्यान्द्रुमेदेकुलसत्तमे
॥७०॥ कूरकःकोकिलाक्षेस्याद्बोरकेतिलकद्रुमे॥ कूपकोगुण-

ह्रस्वे स्यात्तैलपात्रे ककुंदरे ॥ ७१ ॥ उदपाने च्युतायां तु कूपिका ऽभो
गतोपले ॥ कूलकं न स्त्रियां स्तूपे पुंसि स्यात्कृमिपर्वते ॥ ७२ ॥ कूर्चिका
सूचिकायां च तूलिकायां च कुड्मले ॥ कपाटं कुडके क्षीरविकृतावपि
योषिति ॥ ७३ ॥ कृषकः पुंसि फाले स्यात्कर्षके त्वभिधेयवत् ॥ कोर
को ऽस्त्री कुड्मले स्यात्कक्कोलकमृणालयोः ॥ ७४ ॥ कौतुकं त्वभिला
षे स्यादुत्सवे नर्महर्षयोः ॥ तथा परंपरायातमंगले च कुतूहले ॥ ७५ ॥
विवाहसूत्रगीतादिभोगयोरपि नद्वयोः ॥ कौशिको नकुले व्याल
ग्राहे गुग्गुलुशक्रयोः ॥ ७६ ॥ कोषज्ञो लूकयोश्च स्यादिश्वामित्रमु
नावपि ॥ कौशिकी चंडिकायां च नदीभेदे च योषिति ॥ ७७ ॥ खन
को नोंदुरौ संधिचौरे त्रिष्ववदारके ॥ खड्गिको माहिषीक्षीरफेनशौनि
कयोरपि ॥ ७८ ॥ स्यात्खोलकस्तूपाके शिरस्त्रवल्मीकपूगकोशेषु ॥
गणिकायूथीवेश्यप्रीतकारीषु नातु दैवज्ञे ॥ ७९ ॥ ग्रंथिकं पिप्पली-
मूले गुग्गुलु ग्रंथिपर्णयोः ॥ करीरे पुंसि दैवज्ञे सहदेवाख्यपांडवे ॥ ८०
गंडकः पुंसि खड्गे स्यात्संख्याविद्याप्रभेदयोः ॥ अवच्छेदे ऽन्तराये च गं
डकी सरिदंतरे ॥ ८१ ॥ ग्राहको घातिविहगे धान्यानां च गृहीतरि ॥
गांधिको लेखके ऽपि स्यात्सुगंधिव्यवहारिणि ॥ ८२ ॥ गुंडको-
मलने धूलीकलालस्नेहपात्रयोः ॥ गृह्यको निघ्नके ऽच्छे के गैरिकं
धातुरुक्मयोः ॥ ८३ ॥ गोलको विधवापुत्रे जारात्स्यान्मलिके गुडे ॥
गोरंकुः स्यात्पुमान्पक्षिभेदे ऽल्पमकवंदिनोः ॥ ८४ ॥ चषको ऽस्त्री सु
रापात्रे मधुमद्यप्रभेदयोः ॥ चुलकः प्रसृतौ भांडभेदे चुलुकवत्पुमा-
न् ॥ ८५ ॥ चतुष्को मसकहर्म्ये पुष्करिण्यंतरे ऽपि च ॥ चारकः पा
लके ऽश्वादेः स्यात्संचालकबंधयोः ॥ ८६ ॥ चित्रकं तिलके ना तु व्या
घ्रभिच्चं चुपाठिषु ॥ चुंबकश्चुंबनपरे धूर्तायस्कांतयोरपि ॥ ८७ ॥ बहु
ग्रंथैकदेशज्ञे धटस्योर्ध्वावलंबने ॥ चुलुकी शिशुमारे ऽपि कुंडीभेदे
कुलांतरे ॥ ८८ ॥ चूलिका नाटकस्यांगे कर्णमूले च हस्तिनां ॥ चूत

कः कूपकेप्याम्रेजनकः पितृभूरुजोः॥ ८९॥ जंबूकः फेरवे नीचे प-
श्चिमाशापतावपि॥ जतुका जिनपत्रायां जतुकं हिंगुलास्तयोः॥ ९०
जाहको घोंघमार्जारखड्गांकारुंडिकासु च॥ जालकं कोरके दंभे
कुलायानाययोरपि॥ ९१॥ नपुंसि मोचकफले स्त्रियां तु वसनांतरे॥ बि-
सारजलौकायामपि स्याद्दिधवास्त्रियां॥ ९२॥ मदानामश्मरचितां ग-
रक्षिण्यां च जालिका॥ जालिको वाच्यवत्ग्रामजालिजालोपजीवि-
नोः॥ जीवकः प्राणके पीतशालक्षपणयोरपि॥ कूर्चशीर्षेपि पुंसि
स्यादाजीवे जीविकामता॥ ९४॥ त्रिषु सेविनि वृद्ध्याजीविनोराहि-
तुंडिके॥ झल्लिको वर्तनपटे स्त्रियां द्योतेन झिल्लिका॥ ९५॥ आ-
तपस्य रुचौ झिल्ल्यां टुंटुकः शोणकाल्पयोः॥ डिंबिका जलबिंबे
स्यान्मोणके कामुकस्त्रियां॥ ९६॥ तंडकः खंजने फेने समासप्रायव-
न्ति च॥ गृहदारुतरुस्कंधमायाबहुलकेष्वपि॥ ९७॥ तक्षकस्तु पुं-
मान्नागराजभेदे च वर्द्धकौ॥ तारको दैत्यभित्कर्णधारयोर्नहयोर्दृशि
॥९८॥ कनीनिकायामृक्षे च नपुमाँस्त्या तारस्त्रिषु॥ तिलको द्रुमरो-
गाश्वभेदे च तिलकालके॥ ९९॥ क्लीबं सौवर्चलक्लोम्नोर्न स्त्रियां तु वि-
शेषके॥ त्रिशंकुर्नाराजभेदे शलभे च पदंशके॥ १००॥ तुरुष्कः सि-
ल्हके म्लेच्छजातौ देशांतरेऽपि च॥ तूलिका कूर्चिकायां च शय्योपकरणे
ऽपि च॥ १०१॥ दर्शकः स्यात्प्रतीहारे दर्शयितृप्रवीणयोः॥ दारको
बालकेऽपि स्याद्भेदके त्वभिधेयवत्॥ १०२॥ द्रावको धावभेदे स्या-
द्विदग्धे मोषकेऽपि च॥ दीपकं वागलंकारे वाच्यवद्दीप्तिकारके॥ १०३
दीप्यकः स्याः जमोदायां यवानी बर्हिचूडयोः॥ दुच्छको गंधकुट्यां
स्याद्विहारावकाशके॥ ४॥ दूषिका तूलिकायां च मले स्याल्लोच-
नानस्य च॥ धनिका साधुनार्यां धन्याके त्रिषु साधुधनिनोश्च॥ ५॥
स्याद्धेनुका करिण्यां धेनावपि ना तु दानवविशेषे॥ धेनुकं करणे स्त्री-
गां धेनूनामपि संहतौ॥ ६॥ नर्त्तकः केवले पोटगलचारणयोर्नटे॥॥

नर्तकी लासिकायां च करेण्वामपि योषिति ॥ ७॥ **नग्निका**पि कुमा
र्यां स्यात्पुमान्क्षपणवंदिनोः ॥ **नरकः** पुंसि निरये देवारातिप्रभेदयोः
॥ ८॥ **नंदको** हरिखड्गे च हर्षके कुलपालके ॥ **नालीकः** शरशल्यां
गे प्वब्जखंडे नपुंसकं ॥ ९॥ **नायको** नेतरि श्रेष्ठे हारमध्यमणावपि ॥
निर्मोको मोचने व्योम्नि सन्नाहे सर्पकंचुके ॥ १०॥ **नीलिका** नीलिनी
क्षुद्ररोगशेफालिकास्वच ॥ **पराक**स्तु व्रते खड्गे **प्रसेकः** सेचने-
श्च्युतौ ॥ ११॥ **प्रतीको**ऽवयवेऽपि स्यात्प्रतिकूलविलोमयोः ॥ **पद्म**
कं स्यात्पद्मकाष्ठबिंदुजालकयोरपि ॥ १२॥ **पक्षक**स्तु पुमान्पार्श्वद्वा
रे च पार्श्वमात्रके ॥ **पल्यंको** मंचपर्यंकवृषी पर्यस्तिकासु च ॥ १३॥
पताका वैजयंत्यां च सौभाग्यनाटकांकयोः ॥ **पातुकः** पतयालौ स्या
त्प्रपातजलहस्तिनोः ॥ १४॥ **प्रापकः** सत्त्वजातीयजीवकद्रुमचोल
योः ॥ **पाटकः** स्यान्महार्किष्कौ कटकांतरवाद्ययोः ॥ १५॥ अक्षादि
चालने मूलद्रव्यापचयरोधसोः ॥ **पालंकः** शल्लकीशाकभेदयोः
प्राजिपक्षिणि ॥ १६॥ **पावको**ऽग्नौ सदाचारे वन्हिमंथे च चित्रके ॥
भल्लातके विडंगेऽथ **प्रियकः** पीतशालके ॥ १७॥ नीपे चित्रमृगे च्वा
लौ प्रियंगौ कुंकुमेऽपि च ॥ **पिण्याको** स्त्री तिलकल्के हिंगुबाल्ही
कसिल्हके ॥ १८॥ **पिनाको**ऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः ॥
पिटकस्त्रिषु विस्फोटे मंजूषायां पुनः पुमान् ॥ १९॥ **पिष्टको** घृत
पूपादौ नेत्ररोगांतरेऽपि च ॥ **पुलकः** कृमिप्रभेदप्रस्तरभेदयोर्मणि
दोषे ॥ २०॥ रामांचे हरिताले गजान्नपिंडे च गंधर्वे ॥ **पुलाक**स्तुच्छ
धान्ये स्यात्संक्षेपे भक्तसिक्थके ॥ २१॥ **पुष्पकं** रीतिपुष्पे च विमा
ने धनदस्य च ॥ नेत्ररोगे तथा रत्नकंकणे च रसांजने ॥ २२॥ लोहकां
स्ये मृगदंगारशकट्यां च नपुंसकं ॥ स्यात्तु **पुत्रिका** पुत्तलिका दुहि
त्रोर्यावतूलके ॥ २३॥ नापुंवे सरंभे धूर्ते शैलवृक्षप्रभेदयोः ॥ **पूर्ण**
कः स्वर्णचूडे स्यान्नासाछिन्यां तु **पूर्णिका** ॥ २४॥ **पृदाकु**र्वृश्चि

केव्याघ्रेसर्पचित्रकयोः पुमान्॥ पृथुकः पुंसिचिपिटेशिशौस्याद
भिधेयवत्॥२५॥ पेचकोगजलांगूलमूलोपांतेचकौशिके॥ पेटकं
पुस्तकादीनांमंजूषायांकदंबके॥२६॥ वल्मीकोरोगभेदेचनाकौच
पुन्नपुंसकम्॥ बंधूकंबंधुजीवेस्याद्बंधूकः पीतशालके॥ २७॥ बं
धकः स्याद्विनिमये पुंश्चल्यांस्याच्च बंधकी॥ बाहुलः कर्कटः
चार्के दात्यूहेजलखातके॥२८॥ बराकः शंकरेपुंसिशोचनीयेऽभि
धेयवत्॥ बालकस्तुशिशौवज्ञे बालधौहयहस्तिनोः॥२९॥ अंगु
लीयकह्रीबेरवलयेपुंसिबालिका॥ बालायांवालुकापत्रकाह
लाकर्णभूषणे॥३०॥ बारकोऽश्वगतौपुंसिवाच्यवत्स्यान्निषेधके॥
बालुकासिकतास्त्रीस्याद्वालुकंएलवालुके॥३१॥ भर्मकंरोग
भेदेस्याद्विंडककलधौतयोः॥ भ्रामकोजंबुकेधूर्तेसूर्यावर्तेऽश्म
भेदयोः॥३२॥ भालांकःकरपत्रेस्याच्छाकभेदेचरोहिते॥ महा
लक्षणसंपन्नपुरुषेकच्छपेहरे॥३३॥ भूमिकारचनायांस्याद्दे
शांतरपरिग्रहे॥ भूतीकमपिभूनिंबेदीप्यकर्पूरकेतृणे॥३४॥ मधु
कामधुपर्ण्यांस्यान्मधुकंक्लीतकेखगे॥ वल्यंतरोनामशकोरोग
कीटप्रभेदयोः॥३५॥ मडुकःशोणकेमुन्यंतरेस्यान्मूढवर्चसि॥ मं
डूकपर्ण्यांमंडुकीमल्लिकोहंसभिद्यपि॥३६॥ मल्लिकातृणशून्ये
ऽपिमीनमृत्पात्रभेदयोः॥ मामकंस्यान्मदीयार्थेत्रिषुपुंसितुमातुले॥
३७॥ मातृकाधात्रिकामात्रोर्देवीभिद्वर्णमालयोः॥ मालिकाससला
पुत्रीग्रीवालंकरणेषुच॥३८॥ पुष्पमाल्येनदीभेदेपक्षिभेदेतुमालि
कः॥ मेचकस्तुमयूरस्यचंद्रकेश्यामलेपुमान्॥३९॥ तद्युक्तेवा
च्यवत्क्लीबंस्रोतोंजनांधकारयोः॥ मोचकःकदलेशिग्रुनिर्मोचक
विरागिषु॥४०॥ मोदकःखाद्यभेदेस्त्रीहर्षुकेपुनरन्यवत्॥ य
मकंयमजेशब्दालंकारेपुंसिसंयमे॥४१॥ याजकस्तुगजेराज्ञो
याज्ञिकेप्यथयाज्ञिकः॥ याजकेचकुशेचाथयुनकंसंशयेयुगे॥

॥४२॥ नारीवस्त्रांचलेयुक्तेचलनाग्रेऽपिपोतके॥ यूथिकाम्लानकेपु-
ष्पविशेषेपिचयोषिति॥४३॥ रसिकास्त्रीरसालेक्षुरसयोःसरसेत्रि
षु॥ रक्तकोऽम्लानबंधूकरक्तवस्त्रानुरागिषु॥४४॥ राजिकापिच
केदारेराजसर्षपरेखयोः॥ रात्रकंपंचरात्रेनावेश्यावेश्मान्ह्वासिनि
॥४५॥ रुचकोबीजपूरेचनिष्केदंतकपोतयोः॥ नद्वयोःसर्जिकाक्षारे
प्यश्वाभरणमाल्ययोः॥४६॥ सौवर्चलेपिमांगल्यद्रव्येचाप्युत्कटेपि
च॥रुंडिकाद्वारपिंड्यांचदूतिकायांरणक्षितौ॥४७॥ रूपकंनाटके
मूर्तेकाव्यालंकरणेपिच॥ रेणुकापिहरेणौचजामदग्न्यस्यमातरि॥
४८॥ रोहकःप्रेतभेदनारोढरित्रिषुविश्रुतः॥ लंपाकोलंपटेदेशेला
सकोलास्यकारिणि॥४९॥ मयूरेलसकेचाथलूनकोभेदितेपशौ॥
लोचकोमांसपिंडेक्षितारकायांचकज्जले॥५०॥ ललाटाभरणेस्त्री
णांकदलीनीलवस्त्रयोः॥ निर्बुद्धौकर्णपूरेचभ्रूर्व्यांभूश्लथचर्मणि॥
५१॥ वस्कंरोमकेपुंसिशिवमल्यर्कपर्णयोः॥ वर्णकश्चारणेस्त्रीतु
चंदनेचविलेपने॥ ५२॥ द्वयोर्नील्यादिवुस्त्रीस्यादुत्कर्षेकथनस्यच॥
वर्तकस्तुखुरेऽश्वस्यविहगेचवर्तकीद्वयोः॥५३॥ वंचकस्तरवले
धूर्तेगृहबभ्रौचजंबुके॥ व्यलीकमप्रियाऽकार्यवैलक्ष्येष्वपिपीडने
॥५४॥ नानागरेऽथबाल्हीकंवाल्हीकंधीरहिंगुनोः॥ द्वावेनौपुंसि
देशस्यप्रभेदेतुरगांतरे॥५५॥ वार्द्धकंवृद्धसंघातेवृद्धस्यभावकर्मणोः
॥ वार्षिकंत्रायमाणायांक्लीबंवर्षाभवेत्रिषु॥५६॥ वालकोऽस्त्रीपा
रिहार्येत्रिषुस्यादंगुलीयके॥ वितर्कस्तुपुमानूहेसंशयेचनिगद्यते॥
५७॥ विपाकःपचनेस्वादेकर्मणोविसदृक्फले॥ विवेकःस्याज्जल
द्रोण्यांपृथग्भावविचारयोः॥५८॥ वृश्चिकश्चद्रुणेराशौशूककीटौ
षधीभिदोः॥ वृषांकःशंकरेसाधौभल्लातकमहल्लयोः॥५९॥ वैजिकं
शिग्रुतैलेस्याद्वैनोसद्योऽकुरेतुना॥ शलाकाशल्यमदनशारिकाशल्ल
कीषुच॥६०॥ छत्रादिकाष्ठीशरयोःशल्लकीपशुद्वसयोः॥ शांबूकोग

जकुंभांते घोंगेच शूद्रतापसे॥ ६१॥ जलजंतुविशेषेच शंबूकाननपुंसके॥ शंखकंवलयेकंबावस्त्रीपुंसिशिरोरुजि॥ ६२॥ शार्ककः स्याद्दुग्धफेनशर्करापिंडयोः पुमान्॥ शिशुकः शिशुमारेस्याद्बालकोलूपिनोरपि॥ ६३॥ शीतकः शीतकालेच सुस्थितेदीर्घसूत्रिणि॥ शूलकः प्रावटेपिस्याद्रसेपिपरिकीर्तितः॥ ६४॥ सस्यकोमणिभेदे ऽसौसंपर्कोमलकेरतौ॥ संपाकस्तर्ककेधृष्टेत्रिषुनाचतुरंगुले॥ ६५॥ स्यमीकानीलिकायांस्त्रीस्यमीकोनाकुवृक्षयोः॥ स्वस्तिकोमंगलद्रव्येच तुष्कगृहभेदयोः॥ ६६॥ सरको ऽस्त्रीसीधुपानेशीधुपात्रेस्तुसीधुनोः॥ अच्छिन्नाऽध्वगपंक्तौच सायकः शरखड्गयोः॥ ६७॥ स्थासकः पुंसिचार्चिक्येजलादेरपिबुद्बुदे॥ सूचकः सीवनद्रव्येबोधकेपिशुनेशुनि॥ ६८॥ ओनौकाकेसूतकोऽस्त्रीपारदेनद्वयोर्जनो॥ सृदाकुर्नाऽनिलेवज्रेज्वलनेप्रतिसूर्यके॥ ६९॥ सेवकस्तुप्रसेवेनावाच्यलिंगोऽनुजीविनि॥ सेचकः स्यात्पुमान्मेघेवाच्यलिंगस्तुसेक्तरि॥ ७०॥ सैनिकः सैन्यरक्षेचस्यात्सेनासमवेतके॥ हारकः कितवेचौरेगद्यविज्ञानभेदयोः॥ ७१॥ हुडुक्कोवाद्यभेदेचमत्तदात्यूहपक्षिणि॥ हेरुको बुद्धभेदेस्यान्महाकालगणेपिच॥ ७२॥ ॥कचतुः॥ भवेदलिमकोभेकेपिकेऽलोपद्मकेसरे॥ मधूकेऽप्यथालिपकोभृंगकोकिलकुक्कुरे॥ ७३॥ अंगारकः कुजेऽपिस्याद्धुन्मुकांशेकुरुंटके॥ भवेदंगारिकाचेक्षुकांडेकिंशुककोरके॥ ७४॥ स्यादश्मंतकमुद्धाने मल्लिकाछदनेऽपिच॥ आकल्पकस्तमोमोहग्रंथावुत्कलिकामुदोः॥ ७५॥ आक्षेपकोऽनिलव्याधौव्याधेनिंदाकरेपिच॥ भवेदाखनिकश्चौरेशूकरेमूषकेपिच॥ ७६॥ कथितोत्कलिकोत्कंठाहेलासलिलवीचिषु॥ एडमूकोऽन्यलिंगः स्याच्छठेवाक्श्रुतिवर्जिते॥ ७७॥ कठिल्लकस्तुपर्णाशेवर्षाभूकारविल्लयोः॥ कपर्दकोवराटेस्याज्जटाजूटेचधूर्जटेः॥ ७८॥ कर्कोटकः स्यान्मालूरकाद्रवेयप्रभेदयोः॥

कलविंकः पुमान्ग्रामचटकेपि कलिंगके॥ ७९॥ कनीनिका तारकेक्ष्णः स्यात्कनिष्ठांगुलावपि॥ कार्पटिको ऽन्यमर्मज्ञेछात्रे पुंसि शठेत्रिषु॥ ८०॥ काकरुकोनग्नदंभस्त्रीजितोलूकभीरुषु॥ निंबे कुरुबकः शोणाऽम्लानझिंटीप्रभेदयोः॥ ८१॥ कुरुंटकः पीतपुष्पाम्लानझिंटिकयोः पुमान्॥ कृकवाकुर्मयूरेपि सरटेचरणायुधे॥ ८२॥ कोशातकः कठेपुंसि पटोल्याघोषके स्त्रियां॥ अथ कौक्कुटिको ऽदूरप्रेरिताक्षेच दांभिके॥ ८३॥ कौलेयकः सारमेये कुलीनेऽथ खरालिकः॥ ग्रामणीभंडिनाराचेष्युपधानेच पुंस्ययं॥ ८४॥ भवेद्गुणनिकानृत्ये शून्यांके पाठनिश्चितौ॥ गोकंटको गोक्षुरके स्थपुटेच गवांखुरे॥ ८५॥ गोमेदकं पीतमणौ काकोलपत्रकेऽपिच॥ स्याद्गोकुलिको वलिरे पंकस्थगव्युपक्षके॥ ८६॥ अथ घर्घरिका क्षुद्रघंटा वादित्रदंडयोः॥ चर्चरीका महाकाले केशविन्यासशाकयोः॥ ८७॥ चंडालिका किंनरायां सुमायामोषधीभिदि॥ अथ चातुरकश्चक्रगंडो पुंस्यभिधेयवत्॥ ८८॥ गोचरे लोचनस्यापि चाटुकारे नियंतरि जर्जरीकं बहुच्छिद्रे जरातुरेपि वाच्यवत्॥ ८९॥ जीवंतिका गुडूच्यांच जीवाख्यशाकवंद्योः॥ जैवातृकः पुमान्सोमे दीर्घायुः कृशयोस्त्रिषु॥ ९०॥ तर्त्तरीकं वहित्रेस्यान्नद्योः पारगेत्रिषु॥ तिक्तशाकस्तु खदिरे वरुणे पत्रसुंदरे॥ ९१॥ त्रिवर्णकं गोक्षुरके त्रिफलायां कटुत्रिके॥ दलाढकः स्वयंयातनिलेप्टश्च्यांच गैरिके॥ ९२॥ फेनखातकयोर्नागकेसरेच महत्तरे॥ दंदशूकस्तु पुल्लिंगो राक्षसेच सरीसृपे॥ ९३॥ दासेरकस्तु करभे दासीपुत्रेच धीवरे॥ नियामकः कर्णधारे पोतवाहे नियंतरि॥ ९४॥ निष्कारकः पुरीषस्य क्षये स्वैरे समीरणे॥ निर्ग्रंथकः स्यात्क्षपणे निष्फलेप्यपरिच्छदे॥ ९५॥ प्रचलाकः शराघाते शिखंडेच भुजंगमे॥ प्रकीर्णकं चामरे स्याद्विस्तारे नातुरंगमे॥ ९६॥ पंचालिका स्त्रियां वस्त्रपुत्रिकागीतिभेदयोः॥ स्यात्पिप्पलकं वक्षोज

वृंते सीवनसूत्रके॥१७॥ पिंडीतकः स्यात्तगरे मदनाख्य महीरुहे॥
अथ पुष्कलको गंधमृगे क्षपणकीलयोः॥१८॥ पुंडरीकं सितांभोजे
सितछत्रे च भेषजे॥ पुंसि व्याघ्रेऽग्निदिङ्नागे कोशकारांतरेऽपि च॥१९
॥ भवेत्तूर्णानकं वर्द्धापने च पटहेऽपि च॥ फर्फरीकश्चपेटे स्यात्फ
र्फरीकं तु मार्दवे॥२००॥ वलाहको गिरौ मेघे दैत्यनागविशेषयोः॥
वराटकः पद्मबीजकोशे रज्जौ कपर्दके॥२०१॥ बकेरुका बलाका
भिद्वाताबर्जितशाखयोः॥ वरंडकस्तु मातंगवेद्यां यौवनकंटके॥२
वर्त्तुलेऽथो वाणिजको वाडवाग्नौ वणिज्यपि॥ वृंदारकः सुरे पुंसि म
नोज्ञश्रेष्ठयोस्त्रिषु॥३॥ अथ भ्रमरको भृंगे गिरिके चालकांतरे॥
भट्टारको नृपे नाट्यवाचा देवे तपोधने॥४॥ भयानकः स्मृतो व्याघ्रे
रसे राहौ भयंकरे॥ भार्यादिकः पुमान्भार्यानिर्जिते हरिणांतरे॥५
भवेन्मरुबकः पुष्पविशेषे मदनद्रुमे॥ मंडोदकं चित्तरागे क्लीबमा
तर्पणेऽपि च॥६॥ भवेन्मंडलकं बिंबे कुष्ठभेदे च दर्पणे॥ अथ मर्क
टकः सस्यभेदे वानरलूतयोः॥७॥ मयूरकोऽप्यपामार्गे क्लीबं तु स्था
जने पुनः॥ माणवको हारभेदे बाले कुपुरुषेऽपि च॥८॥ मृष्टेरुकोऽव
दान्येऽपि मिष्टाशिन्यतिथिद्विषि॥ रतार्द्धकं स्याद्दिवसे सुखस्नाने षष्ट
गले॥९॥ राधरंकुः पुमान्सीरे सीरके च घनोपले लालाटिकः प्र
भोर्भावदर्शिन्याश्लेषणांतरे॥१०॥ कार्याक्षमे लेखनिकः कथितो
लेखवाहके॥ लेखेषु परहस्तेन स्वहस्तस्य च लेखके॥११॥ वर्तरु
को नदीभेदे काकनीडे जलावटे॥ विनायकस्तु हेरंबे नार्क्ष्ये विघ्नजि
ते गुरौ॥१२॥ वितुन्नकस्तु धान्याके झाटामलमयूरके॥ विशेषको
ऽस्त्री तिलके विशेषयितरि त्रिषु॥१३॥ विदूषकः स्याद्वटौ परनिंदा-
करेऽपि च॥ वैनाशिकः स्यात्क्षणिके परतंत्रोर्णनाभयोः॥१४॥ वैदे
हको वाणिजके शूद्राद्वैश्यासुतेऽपि च॥ वैतालिकः पुमान्स्तोतृतालबो
धकरे त्रिषु॥१५॥ शतानीकस्तु वृद्धे स्यान्मुनिराजप्रभेदयोः॥ शा-

लावृकः शृगालेस्यात्सारमेयेवलीमुखे ॥ १६ ॥ शिलाटकः पुमानट्टेविले येपरिकीर्तितः ॥ शृगालिकाशिवायांस्यात्त्रासादपिपलायने ॥ १७ ॥ शृंगाटकं भवेद्वारिकंटकेचचतुष्पथे ॥ संतानिकापिक्षीरादिसारेमर्कटजालके ॥ १८ ॥ संदंशिकापिस्कत्रुटीलोहयंत्रविशेषयोः ॥ संचारिकातुयुगलेकुट्टनीघ्राणयोरपि ॥ १९ ॥ संघाटिकास्त्रियांयुग्मेकुट्टिन्यां जलकंटके ॥ सुप्रतीकः शोभनांगेभवेदीशानदिग्गजे ॥ २० ॥ अथसैकतिकंमातृयात्रामंगलसूत्रके ॥ नासन्यस्तेक्षपणकेत्रिषुसंदेहजीविनि ॥ २१ ॥ सोमवल्कस्तुधवलखदिरेकट्फलेपिच ॥ सौगंधिकंतुकल्हारेपद्मरागेपिकत्तृणे ॥ २२ ॥ पुल्लिंगोगंधपाषाणेसुगंधव्यवहारिणि ॥

॥ कपंच ॥ अनेडमूकमुद्दिष्टःशठेवाक्श्रुतिवर्जिते ॥ २३ ॥ स्यादाच्छुरितकं हासनखराघातभेदयोः ॥ उपकारिकोपकार्यापिष्टभेदेनृपालये ॥ २४ ॥ कक्ष्यावेक्षक इत्येषशुद्धांतोद्यानपालयोः ॥ रंगाजीवेकणेखङ्गदृढाःस्थेऽथकटखादकः ॥ २५ ॥ खादकेकाचकलशेबलिपुष्टेचजंबुके ॥ कृमिकंटकंतुचित्रांगाविडंगोदुंबरेपुच ॥ २६ ॥ गोजागरिकंमंगलेपुंसिस्यात्कंटकारके ॥ चिलमीलिकातुकंठाभेदेखद्योतविद्युतोः ॥ २७ ॥ अथोजलकरंकः स्यान्नालिकेरफलेऽम्बुजे ॥ शंखेजललतायांचवारिवाहेचकीर्तितः ॥ २८ ॥ जलतापिकइल्लीसकाकेचीऋषयोश्चपुंसिस्यात् ॥ नवफलिकास्त्रीनव्येनवजातरजोऽगनायांच ॥ २९ ॥ नागवारिकउद्दिष्टोराजकुंजरहस्तिपे ॥ गणस्थराजगरुडेचित्रमेखलकेपिच ॥ ३० ॥ स्याद्व्रीहिराजिकः कंगुधान्यचीनकधान्ययोः ॥ व्यवहारिकास्याल्लोकयात्रासंमार्जनींगुदे ॥ ३१ ॥ शतपर्विकातुदूर्वायांवचायामपियोषिति ॥ शीतचंपक इत्येषस्याद्दर्पणदीपयोः ॥ ३२ ॥ सुवसंतकउद्दिष्टोवासंत्यांमदनोत्सवे ॥ स्याद्धेमपुष्पिकायूथ्यांचंपकेहेमपुष्पकः ॥ ३३ ॥ कषट् ग्राममद्गुरिका ग्रामयुद्धेशृंगीझषेस्त्रियां ॥ मदनशलाकाकामोद्दीपकभेषज्यसा

रिकयोः॥ ३४॥ मातुलपुत्रक इत्यपि मामकतनये फलेच धूर्तस्य॥ वर्णविलोडक एषश्लोकस्तेनेच संधिचौरेच॥ ३५॥ सिंदूरतिलकउक्तो मतंगजे स्त्रीतु कामिन्यां॥ ॥ इतिकांतवर्गः॥ खैकं

खमिंद्रिये पुरे क्षेत्रे शून्ये बिंदौ विहायसि॥ संवेदनेदेवलोके कर्मण्यपि नपुंसकं॥१॥ खद्वि नखी स्त्रीक्लीबयोः शस्त्रे नखरे पुन्नपुंसकं॥ न्युंखः सम्यङ्मनोज्ञेच साम्नः षट्प्रणवेषुच॥ २॥ प्रेंखा पर्यटनेप्यश्वगतौ संवेशनांतरे॥ मुखं निःसरणे वक्त्रे प्रारंभोपाययोरपि॥ ३ संध्यंतरे नाटकादेः शब्देपिच नपुंसके॥ लेखो लरेख्यस्मरे लेखा लिपिराजिकयोर्मता॥ ४॥ रिंखा श्वगतिभेदेपि शूकशिंब्यां चनर्तने॥ शंखः कंबौ नखे योषिन्मा भालास्थि निधिभिन्नखे॥ ५॥ शाखा पक्षांतरे बाहौ वेदभाग द्रुमांगयोः॥ शिखा शाखा बर्हिचूडालांगलिक्यग्रमात्रके॥ ६॥ चूडामात्रे शिखायांच ज्वालायां प्रपदेपिच॥ सखा मित्रे सहाये ना वयस्यायां सखी मता॥ ७॥ स्कंदं शर्मणि नाकेच स्कंदा पुर्यां प्रचेतसः॥ ॥ खत्रि॥ ॥ गोमुखं कुटिलागारे वाद्यभांडेच लेपने॥ ८॥ पुंसि मातलिपुत्रेच महादेवगणांतरे॥ त्रिशिखो राक्षसे क्लीबं त्रिशूले मंडलांतरे ॥९॥ दुर्मुखः कपिभिन्नागभिदोर्ना मुखरे त्रिषु॥ प्रमुखः प्रथमे श्रेष्ठे मयूखः किरणेपिच॥१०॥ ज्वालायामपि शोभायां विशिख स्तोमरे शरे ॥ विशिखा तु खनित्र्यांच रथ्यानलिकयोरपि॥ ११॥ विशाख स्तर्ककेस्कंदे स्त्रियां मूलके विल्लके॥ वैशाखो मासभेदेऽपि मंथाने च प्रकीर्तितः॥१२ सुमुख स्तार्क्ष्यतनये शाकनागप्रभेदयोः॥ ॥ खचतुः॥ भवेदग्निमुखो देवे विप्रे भल्लातके स्त्रियां॥ १३॥ अथाऽग्निशिख मुद्दिष्टं कुसुंभे कुंकुमेपिच॥ लांगलिक्याख्यौषधौच विशल्यायांच योषिति॥ १४॥ इंदुलेखाऽमृतासोमलताराशिकलासुच॥ अथ बद्धशिखा स्त्रीस्याद्दुच्चटायां शिशौ त्रिषु॥ १५॥ महाशंखो मानुषास्थिसंख्याभेदालिकेषुच॥ भवेद्घ्राघ्रनखं कंदगंधद्रव्यविशेषयोः॥ १६॥ नखक्षत्तांतरे क्ली

बं शिलीमुखो ऽलिकांडयोः ॥ शशिलेखा कला भांगगुडूची वृत्तभेदयोः ॥ १७ ॥ भवे स्वस्तिमुखो लेखे ब्राह्मणे वंदिनि त्रिषु ॥ ॥ खपंच ॥ ॥ मलिनमुखो ऽपौगोलांगूले पुंसि त्रिषु क्रूरे ॥ १८ ॥ शीतमयूख श्चंद्रे घनसारे चापि पुल्लिंगः ॥ सर्वतोमुख उग्रेच क्षेत्रज्ञ ब्रह्मणोः पुमान् ॥ १९ ॥ नपुंसकं तु पानीये सुरवर्त्मन्यपि स्मृतम् ॥ ॥ इति खांत वर्गः ॥ ॥ गेकं ॥ गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् ॥ स्त्रीसौरभेयी दृग्बाण दिग्वाग्भूष्व प्सु भूम्नि च ॥ १ ॥ ॥ गद्वि ॥ ॥ अगः स्यान्नगवत् पृथ्वीधरपादपयोः पुमान् ॥ अंगं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति ॥ २ ॥ क्लीबैकत्वेल प्रधाने त्रिष्वंगवति चांतिके ॥ इंगः स्यादद्भुते ज्ञाने जंगमेंगितयोरपि ॥ ३ ॥ खगः सूर्यग्रहे देवमार्गणे च विहंगमे ॥ खड्गो गंडकशृंगासि बुद्धभेदेषु गंडके ॥ ४ ॥ गांगस्त्रु गंगासंभूते त्रिषु भीष्मे गुहे पुमान् ॥ चंगस्त्रु शोभने दक्षे टंगो ऽस्त्री स्यात्खनित्रके ॥ ५ ॥ खड्गभेदे च जंघायां त्यागो दाने च वर्जने ॥ तुंगी निशा वर्चवयोः पुन्नागनगयोः पुमान् ॥ ६ ॥ उन्नते त्रिषु दुर्गो मानील्योः स्त्री दुर्गमे त्रिषु ॥ नागं नपुंसकं रंगे सीसके करणांतरे ॥ ७ ॥ नागः पन्नगमातंगक्रूराचारिषु तोयदे ॥ नागकेसरपुन्नागनागदंतकमुस्तके ॥ ८ ॥ देहानिलप्रभेदे च श्रेष्ठे स्यादुत्तरस्थितः ॥ पिंगा गोरोचना हिंगुनालिका चंडिका स्त्र्च ॥ ९ ॥ पिंगी शम्यां पिशंगे ना बालके तु नपुंसकं ॥ पूगस्त्रु क्रमुके वृंदे फलसारे ऽभिधेयवत् ॥ १० ॥ नदीभेदे मलप्ता स्त्री भंगो जयविपर्यये ॥ भेदरोगतरंगेषु भंगा सस्यांतरे स्त्रियां ॥ ११ ॥ भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्तिषु ॥ माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षे च नारवौ ॥ १२ ॥ भागो रूपार्द्धके भाग्ये कदेशयोर्भृगुः पुमान् ॥ मुनौ हरे तटे शक्रे भृंगो धूम्याटषिड्गयोः ॥ १३ ॥ मधुव्रते भृंगराजे पुंसि भृंगे गुडत्वचि ॥ भोगः सुखे धने चाहेः शरीरफणयोरपि ॥ १४ ॥ पालने व्यवहारे च योषिदादिभृतावपि ॥ मार्गो मृगमदे मास प्रभेदे ऽन्वे

षणाध्वनोः॥ १५॥ मृगः पशौ कुरंगेच करिनक्षत्रभेदयोः॥ अन्वेषणे
च याञ्चायां मृगी तु वनितांतरे॥१६॥ युगो रथहलाद्यंगे नहूयोस्तकृ
तादिषु॥ युग्मे हस्तेच तुष्केपि वृद्धिनाम्नौषधेऽपिच॥ १७॥ योगोऽपूर्वा
र्थसंप्राप्तौ संगतिध्यानयुक्तिषु॥ वपुःस्थैर्ये प्रयोगेच विष्कंभादिषु भे
षजे॥१८॥ विश्रब्धघातके द्रव्योपायसन्नहनेष्वपि॥ कार्मणेपिच रं-
गो नागरेनृत्येरणक्षितौ॥१९॥ अस्त्रीत्र पुणि रागस्तु मात्सर्येलो
हितादिषु॥ क्लेशादावनुरागेच गांधारादौ नृपेपिच॥ २०॥ रोगः कुष्ठौ
षधे व्याधौ लंगस्तु संगपिङ्गयोः॥ लिंगं चिन्हेऽनुमानेच सांख्योक्तप्रकृ
तावपि॥२१॥ शिवमूर्तिविशेषेपि मेहनेपि नपुंसकं॥ व्यंगो भेके च हीनांगे
वंगं सीसकरंगयोः॥ २२॥ वार्ताकेपिच कार्पासे पुं भूम्निनीवृदंतरे॥
वल्गुः स्याच्छगले पुंसि सुंदरेच्चाभिधेयवत्॥२३॥ वेगो जवे प्रवाहे
च महाकालफलेपिच॥ शार्ङ्गः कार्मुकमात्रेपि विष्णोरपि शरासने॥
२४॥ शृंगो वटाऽम्रातकयोः पर्कट्यामपिचास्त्रियां॥ शृंगं प्रभुत्वे शि
खरे चिन्हे क्रीडांबुयंत्रके॥२५॥ विषाणोत्कर्षयोश्चाथ शृंगः स्यात्कूर्च
शीर्षके॥ स्त्रीविषायां स्वर्णमीनभेदयोर्ऋषभौषधौ॥ २६॥ सर्गस्तु
निश्चयाध्यायमोहोत्साहात्मसृष्टिषु॥ ॥गत्रि॥ अयोगो
विधुरे कूटे विश्लेषे कठिनोद्यमे॥ २७॥ अनंगो मदने नंगमाकाश-
मनसोरपि॥ अपांगस्त्वंगहीने स्यान्नेत्रांते तिलकेपिच॥ २८॥ आभो
गो वरुणछत्रे पूर्णतायत्नयोरपि॥ आयोगोऽव्यापृतौ गंधमाल्योपहा
रबोधयोः॥२९॥ आशुगो मारुते बाणे पुंसि इंगुदीफले॥ उद्वेगो पु
द्धा हुलको द्वेजनोद्गमनेषु च॥ ३०॥ उत्सर्गः पुंसि सामान्ये न्यायेच त्या
गदानयोः॥ कलिंगः पूतिकरजे धूम्याटे भूम्निनीवृति॥ ३१॥ नहूयोः
कौटजफले महिलायां तु योषिति॥ कालिंगो भूमिकर्कारौ दंतावलभु
जंगयोः॥ ३२॥ कालिंगी राजकर्कट्यां चक्रांगो मानसौकसि॥ च-
क्रांगी कटुरोहिण्यां जिह्मगोऽहौ च मंदगे॥ ३३॥ तडागोऽस्त्रीज

लाधारविशेषे यंत्रकूटके॥ तालगुः क्रद्रतानेनाजनकस्य हिते त्रिषु॥३४॥ त्रिवर्गो धर्मकामार्थैस्त्रिफलायां कटुत्रिके॥ वृद्धिस्थानक्षयेसत्वरजस्तमसि चेष्यते॥३५॥ तुरगी चाश्वगंधायां तुरगश्चित्तवाजिनोः॥ धारांगोऽसौ च तीर्थे च नरांगस्तु वरंडके॥३६॥ मेहनेनद्वयोश्चाथ नारंगः पिप्पलीरसे॥ यमजप्राणिनि विटे नागरंगद्रुमेऽपि च॥३७॥ निषंगः संगते तूणे निसर्गो रूपसर्गयोः॥ नीलंगुः स्यात्कृमौ पुंसि भम्भराल्यां तु योषिति॥३८॥ पत्रांगं नद्वयोर्भूर्जे पद्मके रक्तचंदने॥ पन्नगश्चौषधीभेदे तथैव पवनाशने॥३९॥ प्लवगो वानरे भेके सारथौ चोष्णदीधितेः॥ परागः सुमनोरेणौ धूलिस्नानीययोरपि॥४०॥ गिरिप्रभेदे विख्यातावुपरागे च चंदने॥ प्रयागस्तीर्थभेदे स्याद्यज्ञे शतमखाश्वयोः॥४१॥ प्रयोगः कर्मणेऽपि स्यात्प्रयुक्तौ च निदर्शने॥ पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः॥४२॥ क्लीबं स्कृते प्रियंगुः स्त्री राजिकाकणयोरपि॥ फलिन्यां कंगुसस्ये च पुन्नागस्तु सितोत्पले॥४३॥ जातीफले नरश्रेष्ठे पांडुनागे द्रुमांतरे॥ वरांगं योनिमातंगमस्तकेषु गुडत्वचि॥४४॥ भुजंगो द्वौ च विंगे च मातंगः श्वपचे गजे॥ मृदंगः पटहे घोषे रङ्गांगस्तु महीसुते॥४५॥ कंपिल्ले स्त्री सु जीवंत्यां क्लीबं विद्रुमधीरयोः॥ रथांगं नद्वयोश्चक्रे नाचक्रांगविहंगमे॥४६॥ वातिगः पुंसि भंटाक्यां धातुवादिनि चान्यवत्॥ विडंगस्त्रिष्वभिज्ञे स्यात्कृमिघ्ने पुन्नपुंसकं॥४७॥ विसर्गस्तु पुमान्दाने त्यागे च मलनिर्गमे॥ विसर्जनीये प्ययन भेदेऽपि च विभावसोः॥४८॥ विहंगस्तु त्रिलिंगः स्यादाशुगे च विहंगमे॥ सर्वगं सलिले क्लीबं सर्वगः शंकरे विभौ॥४९॥ संभोगस्तु पुमान्भोगे सुरते जिनशासने॥ सारंगः पुंसि हरिणे चातके च मतंगजे॥५०॥ शाबले त्रिषु हेमांगो गरुडे परमेष्ठिनि॥ गचतुः स्यादपवर्गस्त्यागे मोक्षे कार्यावसानसाफल्ये॥५१॥ अभिषंगो नपुंलिंगः पराभवाक्रोशशपथेषु॥ ईहामृगस्तु पुंसि स्यात्कोकरूपकभेदयोः॥५२॥ उपरागस्तु पुंसि स्याद्राहुग्रस्तार्कचंद्रयोः॥ दुर्नये ग्रहकल्लोले व्यसनेऽपि निगद्यते॥५३॥ उपसर्गः पु

मान्त्रोगभेदे प्लुवयोरपि॥ कूटपाशस्तु शस्यानां हस्तच्छेदे नृपात्यते॥ ५४॥ छत्रभंगो ऽपि वैधव्ये स्वातंत्र्ये नृपनाशयोः॥ दीर्घाध्वगः पुमानुष्ट्रे लेखहारे तु मेद्यवत्॥ ५५॥ मल्लनागो ऽभ्रमातंगे वात्स्यायनमुनावपि॥ समायोगस्तु संयोगे समवाये प्रयोजने॥ ५६॥ संप्रयोगो रतेपि स्यादन्वितो कार्मणेपि च॥ ॥गपंच॥ कथाप्रसंगो वातूले विषवैद्ये च वाच्यवत्॥ ५७॥ नाडीतरंगः काकोले हिंडकेरन हिंडके॥ ॥

इति गांतवर्गः॥ ॥घेकं॥ घो घंटायां घर्घरे ना स्त्रियां तु कांचिघातयोः॥ ॥घद्वि॥ अघं तु व्यसने दुःखे दुरिते च नपुंसकं॥ १॥ अर्घः पूजाविधौ मूल्ये प्युद्धः स्यादेहजानिले॥ अघो हस्तपुटे शस्ते प्योघो वेगे जलस्य च॥ २॥ वृंदे परंपरायां च द्रुतं नृत्योपदेशयोः॥ मघा मघी च नक्षत्रे धान्यभेदे यथाक्रमं॥ ३॥ मघो द्वीपांतरे मेघो मुस्ताजलदयोः पुमान्॥ मोघा स्त्री पाटलायां स्याद्धीननिष्फलयोस्त्रिषु॥ ॥४॥ लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत्क्लीबं॥ शीघ्रे च कृष्णागुरुणि पृक्कानामौषधौ तु स्त्री॥ ५॥ श्लाघा स्त्रियां प्रशंसायां परिचर्याभिलाषयोः॥ घत्रि अनघो निर्मलापापमनोज्ञेष्वभिधेयवत्॥ ६॥ अमोघं सफले वाच्यवत् स्त्री पथ्याविडंगयोः॥ उल्लाघो पिशुचौ दक्षे नीरोगयोस्त्रिषु॥ ७॥ कांचिघः कांचनेपि स्यात्क्ष्वेडे मूषकेपि च॥ निदाघो ग्रीष्मकाले स्यादुष्णस्वेदांबुनोरपि॥ ८॥ पलिघः काचकलशे घटे प्राकारगोपुरे॥ परिघो योगभेदे ऽस्त्रविशेषेर्गलघातयोः॥ ९॥ प्रतिघः प्रतिघाते स्यात्क्रोधेपि परिकीर्तितः॥ महार्घस्तु महामूल्ये त्रिषु स्याल्लावके पुमान्॥ १०॥ सर्वौघो गुरुभेदे च सर्वसन्नहने पुमान्॥ इति घांतवर्गः॥ ॥ङेकं॥ ङः पुमान्विषये ख्यातः स्पृहायां विषयस्य च॥ इति ङांतवर्गः॥

चेकं चश्चंडेशे पुमानुक्तः कच्छपे चंद्रचौरयोः॥ चद्वि॥ अर्चा पूजाप्रतिमयोः कचः केशे गुरोः सुते॥ १॥ बंधे शुष्कव्रणे

पुंसिकरिण्यांतु कच्चास्त्रियां॥ काचः शिक्यमणौनेत्ररोगभेदेमृदंतरे
॥२॥ कांचीस्यान्मेखलादाम्निप्रभेदेनगरस्यच॥ कूर्चमस्त्रीभ्रुवोर्म
ध्येकठिनश्मश्रुकैतवे॥ ३॥ क्रौंचोद्वीपविशेषेस्यात्पक्षिपर्वतभेदयोः॥
चर्चाचिंतास्थासकयोश्चर्चिकायांतुयोषिति॥ ४॥ चंचातुनलनिर्माणे
तृणनिर्मितपूरुषे॥ चंचूस्त्रोट्यांस्त्रियांपुंसिसोनाडीकेप्यडंबके॥ ५॥
त्वक्स्त्रीचर्मणिवल्केचगुडत्वचिविशेषतः॥ न्यङ्नीचनिम्नयोर्नीचः
पामरेवामनेपिच॥ ६॥ प्राञ्छब्दोदिशिदेशेचकालेचवाच्यलिंगकः॥ पि
चुर्नाकुष्ठभेदेचकर्षेतूलेऽसुरांतरे॥ ७॥ मोचः शोभांजनेपुंसिमोचाशा
ल्मलिरंभयोः॥ रुचिः स्त्रीदीप्तौशोभायामभिष्वंगाभिलाषयोः॥ ८॥ रुक्
स्त्रीशोभाद्युतीच्छासु वचः कीरेवचौषधौ॥ शारिकायांचवाग्वाच्येभार
त्यांवचनेस्त्रियां॥ ९॥ वीचिः स्वल्पतरंगेस्यादवकाशेसुखेद्वयोः॥ शची
द्राण्यांशतावर्यांतथास्त्रीकरणांतरे॥ १०॥ शुचिर्ग्रीष्माग्निशृंगारेष्वाषाढे
शुद्धमंत्रिणि॥ ज्येष्ठेचपुंसिधवलेशुद्धेनुपहतेत्रिषु॥ ११॥ सूचीतुसीवन
द्रव्येप्यांगिकाभिनयांतरे॥

चत्रि॥

उदङ्दिग्देशकालेषु
वाच्यवच्चितयेऽव्ययं॥ १२॥ कणान्चीपुष्पितलतागुंजयोःशकटेस्त्रियां॥
कवचोगर्दभांडेचसन्नाहेपटहेपिच॥ १३॥ क्रकचः करपत्रेऽस्त्रीग्रंथि
लाख्यतरौपुमान्॥ नमुचिस्तुपुमान्दैत्यभेदेकुसुमकार्मुके॥ १४॥ नारा
च्येषणिकायांनालोहबाणांबुहस्तिनोः॥ प्रपंचः संचयेपिस्याद्विस्तारेच
प्रतारणे॥ १५॥ प्रत्यग्दिग्देशकालेषुवाच्यवच्चितयेऽव्ययं॥ मरीचिर्मु
निभेदेनागभस्तौवानपुंसकम्॥ १६॥ मारीचोरक्षसोभेदेकक्कोलेयाजक
द्विजे॥ मारीचीदेवताभेदे विपंचीकेलिवीणयोः॥ १७॥ विकचः क्षपणे
केतौनाऽकेशेस्फुटितेऽन्यवत्॥ विरिंचिर्ना विरिंचश्चवैकुंठेपरमेष्ठिनि
॥ १८॥ संकोचोमीनभेदेस्याद्बंधेक्लीबंतुकुंकुमे॥ सम्यक्स्याद्वाच्यलिं
गंतुमनोज्ञेसंगतेपिच॥ १९॥

चचतुः

जलसूचिः कंकत्रोटिम
त्स्यशृंगाटयोरपि॥ शिशुमारेचपुल्लिंगोजलौकायांतुयोषिति॥ २०॥ मलि

श्लुचो मासंभेदे चौरज्वलनयोः पुमान्॥ ॥चपंचं॥ रतना
रीञ्चो नारीणां सीत्कारेच शुनिस्मरे॥२१॥ इतिचांतवर्गः॥
॥ छैकं॥ छा छादने स्त्रियां ख्याता निर्मलेन्यवदिष्यते॥ ॥
छद्वि॥ ॥अच्छः स्फटिकभल्लुकनिर्मले ष्वच्छमव्ययम्॥ १॥ आभि
मुख्ये ऽथ कच्छः स्यादनूपे तुन्नकद्रुमे॥ नौकांगे पुंसि वाराह्यां चीरिकायां च
योषिति॥२॥ स्याद्गुच्छः स्तबके स्तंबे हारभेदकलापयोः॥ पिच्छा पूगकट
कोशमोचाशाल्मलिवेष्टके॥३॥ भक्तसंभूतमंडे च पंक्तावश्वपदामये॥ ॥
स्त्रियां पुंसि तु लांगूले न द्वयोर्बर्हचूडयोः॥४॥ पुच्छः पश्चात्प्रदेशे स्या
ल्लांगूले पुच्छमिष्यते॥ म्लेच्छः पामरभेदे च पापरक्तेऽपभाषणे॥५॥ ॥
छचतुः॥ ॥महाकच्छस्तु पुंसि स्यात्समुद्रे च प्रचेतसि॥ ॥
इतिछांतवर्गः ॥जैकं॥ जो नामृत्युंजये जन्यां तातभा
र्ये जनार्दने॥ जूस्त्वरागमने प्रोक्ता सामान्यगमने स्त्रियां॥१॥ जूराकाशस
रस्वत्यां पिशाच्यां जवने स्त्रियाम्॥ ॥जद्वि॥ अजश्छागे हरिब्र
ह्मविधुस्मरनृपे हरे॥ २॥ अब्जो स्त्री शंखे ना निचुले धन्वंतरौ च हिमकि
रणे॥ क्लीब पद्मेऽथाजिः स्त्री समभूमौ च संग्रामे॥३॥ ऊर्ज्जस्तु कार्तिको
त्साह बलेषु प्राणनेपि च॥ कंजः केशे विरिंचे च कंजं पीयूषपद्मयोः॥४॥ कु
जा कात्यायनीदेव्यां कुजो नरकभौमयोः॥ कुब्जो वृक्षप्रभेदे नान्युब्जे स्या
द्वाच्यलिंगकः॥ ५॥ कुंजो ऽस्त्रियां निकुंजेपि हनौ दंतेपि हस्तिनां॥ खंजा
छंदः प्रभेदे स्त्री कुटिलांघ्रौ तु वाच्यवत्॥ ६॥ खजा मंथे प्रहस्ते ऽथ खर्जुः की
टांतरे स्मृता॥ खर्जूरी पादपे कंड्वां गजो माने मतंगजे॥७॥ वास्तुनः स्थानभेदे
पि गंजा खनौ स्फुरागृहे॥ गंजः स्यात्पुंसि रीढायां भांडागारे तु न स्त्रियां॥ ८॥ ॥
गुंजा तु काकचिंचायां पटहे च कलध्वनौ॥ द्विजः स्याद्ब्राह्मणक्षत्रवैश्यदं
तांडजेषु ना॥ ९॥ द्विजा भार्ग्यां हरेणौ च ध्वजः स्याच्छौंडिके पुमान्॥ न-
स्त्रियां तु पताकायां खट्वांगे मेढ्रचिन्हयोः॥१०॥ निजं स्वीये च नित्ये च त्रिषु
ओ दर्भमपस्तुनि॥ कर्मरंगफले क्लीबं कुब्जा धो मुखयोस्त्रिषु॥११॥ प्रजा

ऽेकेच संताने पिंजा तूलहरिद्रयोः॥ बलेक्लीबंवधेपुंसिव्याकुले त्रिष्व-
थो भुजा॥ १२॥ द्वयोर्बाहौ करे मर्जूः स्त्रीशुद्धौ धावकेपिच॥ रजोरेणोप
रागेस्यादार्तवे चगुणांतरे॥ १३॥ रज्जुर्वेण्यांगुणेयोषिद्राजिः स्त्रीपंक्तिले-
खयोः॥ रुजा रोगेच भंगेथ लाजः स्यादार्द्रतंडुले॥ १४॥ नपुंसकमुशीरे
थस्त्रियांपुं भूम्निचाक्षते॥ व्रजोगोष्ठाध्ववृंदेषु वाजो निस्वनपक्षयोः॥
१५॥ वेगेपुमानथक्लीबेघृतयज्ञान्नवारिषु॥ व्याजः शाठ्ये ऽपदेशे ऽथ-
बीजमंकुरकारणे॥ १६॥ हेतुतत्वाधानशुक्रेसर्जुर्वणिजिविद्युति॥ स्त्रि
यां स्वंजो विधौरुद्रे स्वजः प्रस्वेदपुत्रयोः॥ १७॥ क्लीबंरक्ते ऽथसंजः स्या
त्प्रसन्नस्थेसंभृतेत्रिषु॥ ॥जत्रि॥ अंडजा मृगनाभौस्या
त्सरटे ऽहौखगेझषे॥ १८॥ अंगजंरुधिरेनंगकेशपुत्रमदेषुना॥ अंबु
जोनिचुलेपुंसि कमलेतुनपुंसकम्॥ १९॥ असृक्स्याद्योगभेदेनारक्तेपि
स्यान्नपुंसकम्॥ कंबोजो हस्तिभेदेपि शंखदेशविशेषयोः॥ २०॥ करजं
स्याद्व्याघ्रनखे करंजनखयोःपुमान्॥ कारुजः शिल्पिनांचित्रे वामलूरे
गजार्भके॥ २१॥ कांबोजो ऽश्वांतरेसोमवल्केपुन्नागपादपे॥ कांबोजी
माषपर्ण्यांचवलक्षखदिरे ऽस्त्रियां॥ २२॥ कुटजो वृक्षभेदेस्यादगस्त्यद्रो
णयोरपि॥ गिरिजंत्वभ्रके ऽपिस्याच्छिलाजतुनिशे रुजे॥ २३॥ लोहेपि
गिरिजा गौरीमातुलुंग्योश्चयोषिति॥ जलजं कमले शंखेनीरजंकुष्ठप
द्मयोः॥ २४॥ परंजस्तैलयंत्रेस्याच्छुरिकाफलफेनयोः॥ बलजंगोपुरक्षे
त्रेशस्यसंगरयोरपि॥ २५॥ बलजा वरयोषायां यूथ्यामथ वणिक्स्त्रियां
॥ वणिज्यायांपुमान्वाणिज्यकेच करणांतरे॥ २६॥ बाहुजः क्षत्रिये की
रे स्वयजाततिलेपिच॥ भूमिजो नरके ऽगारेसीतादेव्यांनु भूमिजा॥ २७
वनजा मुद्गपर्ण्यांनामुस्तके क्लीबमंबुजे॥ सहजः स्वनिसर्गेनासहोत्थे
पुनरन्यवत्॥ २८॥ समजः पशुवृंदेना विपिनेतुनपुंसकं॥ सामजस्तुग
जेपुंसि सामोत्थे पुनरन्यवत्॥ २९॥ हिमजा तुशचीगौर्योःपुंसिमैनाक
पर्वते॥ अन्वतुः अहिभुग्बर्हिणेतार्क्ष्येपुंसि कास्मी

रजं पुनः॥ ३०॥ कुष्ठकुंकुमयोः क्लीबेतिविषायांतुयोषिति॥ क्षीराब्धिजंतुसामुद्रलवणेमौक्तिकेपिच॥ ३१॥ पुमांस्क्षारकिरणेकमलायांतुयोषिति॥ ग्रहराजोरवौचंद्रेजघन्यजः कनीयसि॥ ३२॥ वृषलेद्विजराजस्तुचंद्रेऽनंतेगरुत्मति॥ धर्मराजोयमेबुद्धेयुधिष्ठिरनृपेपुमान्॥ ३३॥ भरद्वाजोगुरोःपुत्रेव्याघ्राटाख्यविहंगमे॥ भारद्वाजावनकार्पास्यांनाद्रोणऋषिभेदयोः॥ ३४॥ अथभृंगराजउक्तःपक्षिविशेषेचमार्कवेभ्रमरे॥ यक्षराट् पुंसिधनदेमल्लानांरंगचत्वरे॥ ३५॥ राजराजः कुबेरेपिसार्वभौमेसुधाकरे॥ ॥जपंच॥ ॥ऋषभध्वजएषोपिशंकरेचार्हदंतरे॥ ३६॥ मुनिभेषजमागस्त्यहरीतक्यांचलंघने॥ इतिजांतवर्गः झैकं झोझंटीशेसुरगुरौदैत्यराजेध्वनावपि॥ झद्वि झंझावातेतारवायौनष्टेपिकीर्त्यतेबुधैः॥ झंझाध्वनिविशेषेचस्यादंबुकणवर्षणे॥ इतिझांतवर्गः ॥

ञैकं ञः पुमान्स्याद्बलीवर्देशक्रेवाममतावपि॥ ज्ञोब्रह्मबुधविद्वत्सुस्यादज्ञोजडमूर्खयोः॥ १॥ प्रज्ञस्तुपंडितेवाच्यलिंगोबुद्धौचयोषिति॥ राज्ञीराजप्रियायांचभार्यायांभास्करस्यच॥ २॥ संज्ञानामनिगायत्र्यांचेतनारवियोषितोः॥ अर्थस्यसूचनायांचहस्ताद्यैरपियोषिति॥ ३॥ ञत्रि॥ कृतज्ञः कुक्कुरेपुंसिमर्यादिन्यभिधेयवत्॥ क्षेत्रज्ञआत्मनिछेकेदैवज्ञोगणकेपुमान्॥ ४॥ दैवज्ञीक्षणिकायांस्त्रीसर्वज्ञः शिवबुद्धयोः॥ ॥इतिञांतवर्गः॥

॥ टैकं॥ टः पुमान्वामनेपादेनिःस्वनेपिकनिन्मतः॥ ॥टद्वि॥ अट्टंभक्तेचशुष्केनाक्षौमेऽत्यर्थेगृहांतरे॥ १॥ इष्टमाशंसितेपिस्यात्पूजितेप्रेयसित्रिषु॥ सततंतोपुमान्क्लीबेसंस्कारेऋतुकर्मणि॥ २॥ इष्टिर्मनोऽभिलाषेपिसंग्रहश्लोकयागयोः॥ कटः श्रोणौद्वयोःपुंसिकिलिंजेऽतिशयेशरे॥ ३॥ समयेगजगंडेचपिप्पल्यांतुकटीमता कटुस्त्रीकटुरोहिण्यांलताराजिकयोरपि॥ ४॥ नपुंसकमकार्येस्यात्पुं

ल्लिंगेरसमात्रके॥ त्रिषुतद्वत्स्फगंध्योम्बमत्सरेपिखरेपिच॥ ५॥ कष्टंतु गहनेकृच्छ्रे क्रुष्टं रोदनरावयोः॥ कूटः कोटेपुमानस्त्री घटे स्त्रीपुंसयो र्गृहे॥ ६॥ कुटीस्यात्कुंभदास्यांचसुरायांचित्रगुच्छके॥ कूटो ऽस्त्रीनि श्चलेराशौलोहमुद्गरदंभयोः॥ ७॥ मायाद्रिशृंगयोस्तुच्छेसीरावयवयंत्र योः॥ अनृतेचाथ कृष्टिस्यादाकर्षेस्त्रीबुधेपुमान्॥ ८॥ कोटिः स्त्रीध नुषोऽग्रेऽश्रीसंख्याभेदप्रकर्षयोः॥ खटोंधकूपकफयोःप्रहारांतरटं कयोः॥ ९॥ खादिस्तुसकृद्गेहेपिस्यात्किणेशावरथेस्त्रियां॥ खेटः कफेग्राम भेदेचर्मण्यस्त्र्यधवेतित्रिषु॥ १०॥ अथगृष्टिः सकृत्प्रसूतगवीबदरयोस्त्रि याम्॥ घटः समाधिभेदेभशिरःकूटकुटेषुच॥ ११॥ घटाघटनगोष्ठीभ घटनासुचयोषिति॥ घृष्टिः स्त्रीघर्षणस्पर्द्धाविष्णुक्रांतासुनाकिरौ॥ १२ घोंटातुबदरीपूगवृक्षयोरपियोषिति॥ चटुश्चाटौपिपिंडेचव्रतिनामास नेपुमान्॥ १३॥ जटा लग्नकचेमूलेमांस्यां प्लक्षेपुनर्जटी॥ जुष्टंतुक्लीब मुच्छिष्टेसेवितेवाच्यलिंगकं॥ १४॥ झाटोनिकुंजेकांतारेव्रणादीनांचमा र्जने॥ तटं न पुंसकं क्षेत्रे प्रतीरेतुलटीत्रिषु॥ १५॥ त्वष्टापुमान्देवशि- ल्पितक्ष्णोरादित्यभिद्यपि॥ त्रुटिः स्त्रीसंशये स्वल्पेसूक्ष्मैलाकालमा नयोः॥ १६॥ त्रोटिः स्त्रीकट्फलेचंच्वां खगेमीनांतरेऽपिच॥ दिष्टं दैवे पुमान्कालेदिष्टिर्मुत्परिमाणयोः॥ १७॥ स्त्रियां दृष्टिः स्त्रियांबुद्धौलोच नेदर्शनेपिच॥ धटोदिव्यतुलायांस्याद्धटीचीरेचवाससः॥ १८॥ नटीन त्यौषधेस्त्रीस्यात्शैलूषाशोकयोःपुमान्॥ पटश्चित्रपटेवस्त्रेऽस्त्रीप्रिया लद्रुमेपुमान्॥ १९॥ पटुर्दक्षेचनीरोगेचतुरेप्यभिधेयवत्॥ पटोलेतुपुमा न्क्लीबेछत्रालवणयोरपि॥ २०॥ पट्टः पेषणपाषाणेव्रणादीनांचबंधने॥ चतुष्पथेचराजादिशासनांतरपीठयोः॥ २१॥ पटिः स्त्रीपटभेदेस्याद्गागु लोकुंभिकाद्रुमे॥ पुष्टिःस्त्रीपोषणेवृद्धौ फटातुफणदंतयोः॥ २२॥ वटी- त्रिषुगुणेपुंसिस्यान्न्यग्रोधकपर्दयोः॥ भटः स्यात्पुंसिवीरेचविशेषेपाम रस्यच॥ २३॥ भृष्टिः स्याद्भर्जनेशून्यवाटिकायांचयोषिति॥ म्लिष्टंत्रि

अव्यक्तवाचिम्लाने मुष्टिर्द्वयोःफले॥ २४॥ बद्धपाणौत्सरौ यष्टिः पुंसि
स्याद्भुजदंडके॥ द्वयोर्हारलताभार्ग्योर्मधुकाशस्त्रभेदयोः॥ २५॥ रि
ष्टं क्षेमाशुभाभावे पुंसि खड्गे च फेनिले॥ रिष्टिः खड्गेनाशुभे स्त्री लाटो
देशान्तरेंऽशुके॥ २६॥ वाटो मार्गे वृतिस्थाने स्यात्कुटी वास्तुनोः स्त्रियां
॥ विटोऽद्रौ लवणे षिड्गे मूषिके खदिरेऽपि च॥ २७॥ विष्टिः स्त्रिषुकर्म
करे स्यादाजूवेतनकर्मसु॥ व्युष्टिः फले समृद्धौ स्त्री व्युष्टं कल्पे त्रिषूषि
ते॥ २८॥ सटा जटाकेसरयोः स्फुटो व्यक्तप्रफुल्लयोः॥ व्याप्ते त्रिषु स्फु
टिर्योषित्पादस्फोटामयेऽपि च॥ २९॥ निर्भिन्नकर्कटीशस्येऽपि स्यात्सृ
ष्टं तु निर्मिते॥ युक्तनिश्चितयोः प्राज्ये त्रिषु सृष्टिस्तु निर्मितौ॥ ३०॥ स्व
भावे चापि कथिता हृष्टो रोमाञ्चितेऽपि च॥ जातहर्षे प्रहसिते विस्मितेऽभ
भिधेयवत्॥ ३१॥ ॥ टत्रि॥ ॥ अवटः स्यात्त्रिवले गर्ते कूपे
कुहकजीविनि॥ अरिष्टो लशुने निंबे फेनिले काककंकयोः॥ ३२॥ अ
रिष्टमशुभे तक्रे सूतिकागार आसवे॥ शुभे मरणचिन्हे च॥ दिष्टमादे
शिते त्रिषु॥ ३३॥ आज्ञप्तोच्छिष्टयोः क्लीबमुत्कटस्तीव्रमत्तयोः॥ उद्भटः
कच्छपे शूर्पे कर्कटो विहगान्तरे॥ ३४॥ राशिभेदे कुलीरे च वालुक्यां शा-
ल्मलीफले॥ कर्हटः करहाटे स्यात् पंकपंकारयोरपि॥ ३५॥ करटो ग-
जगंडे स्यात्कुसंभे निंद्यजीवने। एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे॥ ३६
करटो वाद्यभेदेऽथ कार्पटो जंतुकार्षिणोः॥ कीकटः कृपणे निःस्वे त्रि
षु पुं भूम्नि नीवृति॥ कुरुंटो दारुपुत्र्यां ना झिंटीम्लानप्रभेदयोः॥ कुक्कु
ड्न्त तच्चर्यायां पुंसि स्याच्चरणायुधे॥ ३८॥ निषादशूद्रयोः पुत्रे तृणो-
ल्कायां च कुक्कुभे॥ कुनटी मनःशिलायां नैपाल्यामपि योषिति॥ ३९॥
कूपीटमुदरे तोये केशदोहर्यजोत्कटे॥ चर्पटः स्फारविपुले चपेटप
र्पटेऽपि च॥ ४०॥ चक्राटो विषवैद्येऽपि धूर्तदीनारयोरपि॥ चिपिटः
खाद्यभेदे ना त्रिषु पिहितवस्तृते॥ ४१॥ चिरिंटी तु सुवासिन्यां स्या
द्द्वितीयवयःस्त्रियां॥ जकुटं वार्त्ताकुपुष्पे जकुटो मलयेऽशुनि॥ ४२॥

त्र्यंकटं शिवस्य भेदेपि धीतांजन्यां च नद्योः॥ त्रिकूटं सिंधुलवणे त्रिकूटः पर्वतांतरे॥ ४३॥ त्रिपुटा मल्लिकायां च सूक्ष्मैलात्रिवृतोः स्त्रियां॥ सतीनके च तीरे च त्रिपुटः समुदाहृतः॥ ४४॥ द्रोहाटः कथितो गाथाप्रभेदे मृगलुब्धके॥ वैडालव्रतिके चाऽथ धाराटश्चातकाश्वयोः॥ ४५॥ निर्दटस्त्वदयाशून्ये कथितो निष्प्रयोजने॥ परापवादरक्ते च वाच्यलिंगोयमिष्यते॥ ४६॥ निष्कुटस्तु गृहोद्याने स्यात्केदारकपाटयोः॥ पर्कटी नूतनफले पूगार्दः प्लक्षपादपे॥ ४७॥ परीष्टिः परिचर्यायां-प्राकाम्ये ऽन्वेषणेस्त्रियाम्॥ पर्पटं पिष्टभेदे स्यात्पर्पटो भेषजांतरे॥ ४८॥ पात्रटः कर्परे पुंसि देशे स्यादभिधेयवत्॥ पिच्चटो नेत्ररोगे स्यात्क्लीबं सीसकरंगयोः॥ ४९॥ वरटा द्वयोर्वरट्यां स्त्री हंस्यां च तस-तीपुमान्॥ बर्बटी पण्ययोषायां व्रीहिभेदे च योषिति॥ ५०॥ वेकटः स्याद्वैकटिके मत्स्यभेदे च यूनि च॥ भावाटो भावके साधुनिवेशे कामुकेनटे॥ ५१॥ भाकूटः शैलझषयोर्भेदे स्यादथ मर्कटी॥ करंजभिच्छूकशिंब्योः पुंसि वानरलूतयोः॥ ५२॥ मोचाटः कृष्णजीरे च रंभा-स्थि मलयोद्भवे॥ मोरटं तु भवेदिक्षुमूलांकोटप्रसूनयोः॥ ५३॥ सप्तरात्रात्परक्षीरे मूर्विकायां तु मोरटा॥ वर्णाटो गायने चित्रकरे स्त्रीकृतजीवने॥ ५४॥ विकटा वज्रवाराह्यां त्रिषु रूविकरालयोः॥ शाकटं शाकटस्येदमित्यर्थे नस्यनोदरि॥ ५५॥ शैलाटो देवले सिंहे शुक्लकाचकिरातयोः॥ संसृष्टं त्रिषु संसर्गे संशुद्धे वसनादिना॥ ५६॥ ॥
टचतुः॥ ॥ उत्किंगटस्तृणगडमत्स्ये कोपनपूरुषे॥ करहाटः शिफाकंदे पद्मस्य मदनद्रुमे॥ ५७॥ स्यात्कार्यपुटः कृपणोन्मत्तानर्थकरेषु च॥ कामकूटस्तु वेश्यायाः प्रियविभ्रमयोः पुमान्॥ ५८॥ कुटन्नटं तु कैवर्तीमुस्तके पुंसि शोणके॥ कुंडकीटस्तु चार्वाकवचनाऽभिज्ञपूरुषे॥ ५९॥ पतितब्राह्मणीपुत्रदासीकामुकयोरपि॥ खड्गरीट-स्तु फलकासिधाराव्रतधारिणोः॥ ६०॥ गाढमुष्टिः कृपाणे ना कृपणे

स्त्वभिधेयवत्॥ चक्रवाटः क्रियारोहे पर्य्यंते च शिखातरौ॥ ६१॥ चतुःषष्टिः कलासंख्या भेदयोर्बहुनि स्त्रियां॥ नारकीटो ऽश्मकीटे स्यात्स्वदत्ताशाविहंतरि॥ ६२॥ परपुष्टः परभृते वारनार्यां तु योषिति॥ प्रतिकृष्टं मतं गुह्ये द्विराकृत्यां च कर्षिते॥ ६३॥ प्रतिसृष्टः प्रेषिते स्यात्प्रत्याख्याते त्ववाच्यवत्॥ वर्करादः कटाक्षे स्यात्तरुणादित्यरोचिषि॥ ६४॥ नारीपयोधरोत्संगकांतदंतनखक्षते॥ शिपिविष्टस्तु खलतौ शिवे दुश्चर्मणि स्मृतः॥ ६५॥ अथ श्रुनिकटः प्रांचल्लोहेऽहौ पापशोधने॥ ॥ टपंच॥ दशनोच्छिष्टः पुंसि स्यान्निश्वासाधरचुंबयोः॥ ६६॥ ॥ इति टांतवर्गः ॥

ठैकं॥ ॥ ठो मंडले चंद्रबिंबे शून्ये च लोकगोचरे॥ ॥ ठद्विकः॥

कठो मुनौ तदाख्यातवेदाध्येतृजयोः स्वरे॥ १॥ कंठो गले सन्निधाने ध्वनौ मदनपादपे॥ काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः॥ २॥ स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकं॥ कुष्ठं रोगे पुष्करे ऽस्त्री कुंठो ऽकर्मण्यमूर्खयोः॥ ३॥ कोष्ठः कुसूले चात्मीये मध्ये कुक्षौ गृहस्य च॥ गोष्ठं गोस्थानके गोष्ठी सभासंलापयोः स्त्रियां॥ ४॥ ज्येष्ठः श्रेष्ठे ऽतिवृद्धे च त्रिषु मासांतरे पुमान्॥ ज्येष्ठा तु गृहगोधाख्यजंतुनक्षत्रभेदयोः॥ ५॥ निष्ठा निष्पत्तिनाशांतयाच्ञानिर्बर्हणेषु च॥ प्रष्ठस्त्रिष्वग्रगे श्रेष्ठे पुंसि त्वांडालिकौषधौ॥ ६॥ पाठश्च पठने स्यात्तो विद्धपर्ण्यां तु योषिति॥ पृष्ठं चरममात्रेपि देहस्यावयवांतरे॥ ७॥ वंठः स्यादकृतोद्वाहे खर्वे कुंताऽयुधेपि च॥ शाठो मध्यस्थपुरुषे धूर्तधूस्तूरयोरपि॥ ८॥ श्रेष्ठो वरे कुबेरे च श्रोठो मूर्खेऽलसेपि च॥ षष्ठी कात्यायनीतिथ्योः स्त्रिषु षण्णां च पूरणे॥ ९॥ हठः स्यात्प्रसभे पुंस्यां हेठो बाधाविहेठयोः॥ ॥

ठत्रि॥ ॥ अपष्ठु पुंसि काले च वामे स्यादन्यलिंगकः॥ १०॥ अंबष्ठो देशभेदेपि विप्राद्वैश्यासुतेपि च॥ अंबष्ठा चाम्ललोण्यां स्यात्पाठायूथिकयोरपि॥ ११॥ कमठः कच्छपे पुंसि भांडभेदे नपुंसकम्॥ क

निष्ठोऽतियुवाऽस्वल्पानुजेस्त्रीदुर्बलांगुलौ ॥१२॥ जरठः कर्कशेपांडौ
कठिनेप्यभिधेयवत् ॥ नर्मठश्चिबुकेषिड्गे प्रतिष्ठागौरवेक्षितौ ॥१३॥
स्थानेचयागनिष्पत्तिचतुरस्रसरपद्ययोः ॥ प्रकोष्ठोमणिबंधस्यकूर्परस्यां
तरेपिच ॥१४॥ गृहपकक्ष्यांतरेपिस्याद्गरिष्ठमरिचेपिच ॥ नाम्नेक्लीबेनि
त्निरोनावरोरुत्तमयोस्त्रिषु ॥१५॥ मकुष्ठो व्रीहिभेदेनामंथरेपुनरन्यवत्
॥ लघिष्ठोऽस्वल्पकेभेलेवैकुंठः कृष्णशक्रयोः ॥१६॥ श्रीकंठोदेश
भिद्युग्रेसाधिष्ठोऽतिदृढार्ययोः ॥ ॥ठचतुः॥ ॥ कलकंठः
कलध्वानेहंसेपारावतेपिके ॥१७॥ कालकंठस्तुदात्यूहेकलविंकेचखं
जने ॥ मयूरे पीतशालेचस्यात्खंडपरशौपुमान् ॥१८॥ कालपृष्ठं क
र्णचापेपुंसिकंकविहंगमे ॥ स्याद्दंतशठोजंबीरेकपित्थेकर्मरंगके ॥
१९॥ नागरंगेपिचपुमान्स्याच्चांगेर्यांतुयोषिति ॥ पूतिकाष्ठंचसरलदेव
दारुमहीरुहे ॥२०॥ सूत्रकंठः पुमान्विप्रेखंजरीटकपोतयोः ॥ हारिकं
ठः पिकेपुंसिहारान्वितगलेत्रिषु ॥२१॥ ॥ इतिठांतवर्गः ॥
॥ ॥डैकं॥ ॥ डः पुमान्वाडवाग्नौस्याड्डाकिन्यांस्त्रीनिगद्यते ॥ ॥
डद्वि ॥ ॥ अंडंमुष्केचपेश्यांस्यादिडातुबुधयोषिति ॥१॥ सौ
रभेय्यांचवचनेवसुमत्यामपिस्त्रियाम् ॥ कांडः स्तंबेतरुस्कंधेबाणे
ऽवसरनीरयोः ॥ कुत्सितेवर्गभिन्नाडीवृंदेरहसिनस्त्रियाम् ॥ क्री
डाकेलिप्रकारस्यात्खलावज्ञानयोरपि ॥३॥ कुंडमग्न्यालयेमानभे
देदेवजलाशये ॥ कुंडीकमंडलौजारात्पतिवत्नीसुतेपुमान् ॥४॥ पिठ
रेतुनना क्ष्वेडो ध्वनौकर्णामयेविषे ॥ क्ष्वेडावंशशलाकायांसिंहनादे
चयोषिति ॥५॥ लोहितार्कपर्णफलेघोषपुष्पेनपुंसकम् ॥ दुरासदे
चकुटिलेवाच्यलिंगः प्रकीर्तितः ॥६॥ क्रोडः शनौसूकरेनानपुमानं
करसमोः ॥ खंडोस्त्रीशकलेनेक्षुविकारमणिदोषयोः ॥७॥ खंडः
पानांतरेभेदेगंडः स्यात्पुंसिखड्गिनि ॥ ग्रहयोगप्रभेदेचवीथ्यंगेपि
टकेपिच ॥८॥ चिन्हवीरकपोलेषुहयभूषणबुद्बुदे ॥ गडुः पृष्ठगुडे

कुब्जे गडो मीनांतराययोः॥ ९॥ गुडः स्याद्गोलके हस्तिसन्नाहे इक्षु
विकारयोः॥ गुडा स्नुह्यां च कथिता गुडिकायां च योषिति॥ १०॥ गौडः
पामरजातौ च हड्डना भोच नहृति॥ चंडो नातिनिडी वृक्षे यमकिंकरदैत्य
योः॥ ११॥ चंडा धनहरी शंखपुष्प्योः स्त्री षाति कोपने॥ चंडी कात्याय-
नीदेव्यां हिंस्रकोपनयोषितोः॥ १२॥ तीव्रेपि चूडा वडभी शिखायां बाहु
भूषणे॥ चोडः प्रावरणे भूम्निदेशभेदे जडा स्त्रियां॥ १३॥ शूकशिंब्यां
हिमग्रस्तमूकाप्रज्ञेषु तु त्रिषु॥ ताडस्तु ताडने घोषे मुष्टिमेय तृणादिषु
॥१४॥ ताडी पत्रद्रुमे चाथ दंडोऽस्त्री लगुडे पुमान्॥ व्यूहभेदे प्रकांडे
ऽश्वे कोणमंथानयोरपि॥ १५॥ सैन्ये काले मानभेदे चंडांशोः पारिपार्श्वि
के॥ दमे यमेऽभिमाने च नाडी नाले व्रणांतरे॥ १६॥ शिरायां गंडदूर्वायां
चर्यायां कुहनस्य च॥ तथा षट्क्षण कालेपि नीडं स्थानकुलाययोः॥ १७
पंडः पंडे धियि स्त्री स्यात् पांडुर्ना नृपतौ सिते॥ पिंडो बोले बले सांद्रे दे
हागारैकदेशयोः॥ १८॥ देहमात्रे निवापे च गोलसिल्हकयोरपि॥ ओड्र
पुष्पे च पुंसि स्यात् क्लीबमाजीवनायसोः॥ १९॥ पिंडी तु पिंडीतगरे ऽलाबु-
खर्जूरभेदयोः॥ पीडा कृपा शिरोमाला ऽपमर्दसरलद्रुषु॥ २०॥ पांडं पा
त्रे वणिङ्मूलधने भूषा ऽश्वभूषयोः॥ मंडः पंचांगुले शाकभेदे क्लीबं तु म
स्तुनि॥ २१॥ आमलक्यां स्त्रियां मंडा ऽथा ऽस्त्रियां सारपिच्छयोः॥ मुंडो
दैत्यांतरे राहुग्रहे नामुंडिते त्रिषु॥ २२॥ मुंडा मुंडीरिकायां स्यात् स्त्रियाम
स्त्री तु मूर्द्धनि॥ रंडा मूषिकपर्ण्यां च विधवायां च योषिति॥ २३॥ रोडः क्षो
दे मदे पुंसि नृत्ते तु वाच्यलिंगकः॥ रंडा तु पांसुलायां स्त्री त्रिषु हस्तादिव
र्जिते॥ २४॥ व्याडो हिंस्रपशौ सर्पे शुंडा पानगृहे मता॥ अप्यंबुहस्ति
नीवेश्या हस्तिहस्तस्फरास्फ च॥ २५॥ शौंडो मत्ते च विख्यातः पिप्पल्यां
च भवेत् स्त्रियां॥ षंडं पद्मादिसंघाते न स्त्री स्यात् क्लोपतौ पुमान्॥ २६॥

॥ ॥ डत्रि ॥ ॥ करंडो मधुकोशासिकारंडे षुदलाढ
के॥ कूष्मांडूयुमायां स्त्री पुंसि कर्कारौ च गणांतरे॥ २७॥ भ्रूणांतरे

ऽथकोदंडं चापेनानीवृदंतरे ॥ भुव्यथोगारुडं क्ष्वेडमंत्रेमरकते
पि च ॥ २८ ॥ तरंडो बडिशीसूत्र——— बद्धकाष्ठादिके प्लवे ॥ नौका
यामपि न स्त्री स्यात्तित्तिडी डिंबचिंचयोः ॥ २९ ॥ द्राविडो देशभिज्जाते
संख्याभिद्वेधमुख्ययोः ॥ निर्गुंडी नीलशेफाल्यां सिंधुवारद्रुमेपि च ॥ ३०
प्रचंडो दुर्वहे श्वेतकरवीरे प्रतापिनि ॥ प्रकांडो न स्त्री विटपे मूलशाखां
तरे तरोः ॥ ३१ ॥ शस्तेपि च पिचंड उदरे पशोरवयवे पुमान् ॥ पूत्यंडो गंधकी
टेपि तथा जंत्वंतरे पुमान् ॥ ३२ ॥ वरंडोप्यंतरे वेदीसमूहमुखरोगयोः ॥
वारुंडी द्वारपिंड्यां स्त्री फणिनां राजके पुमान् ॥ ३३ ॥ न स्त्रियां सेकपात्रे
च मलेक्ष्णः श्रवणस्य च ॥ भेरुंडा देवताभेदे यक्षिण्यंतरयोः स्त्रियां
॥ ३४ ॥ भयानके वाच्यवत्स्यान्मार्तंडः क्रोडसूर्ययोः ॥ मारुंडोंऽडे
भुजंगानां मार्गे गोमयमंडले ॥ ३५ ॥ वरंडा सारिकावर्त्तिशास्त्रभे
दे च योषिति ॥ वितंडा वादभेदे स्यात्कच्चीशाके शिलाह्वये ॥ ३६ ॥
करवीर्यामपि स्त्री स्याच्छिखंडो बर्हचूडयोः ॥ शरंडस्तु पुमान्धूर्ते
शरटे भूषणांतरे ॥ ३७ ॥ ॥ डचतुः ॥ ॥ अपोगंडस्तु
बलिभे विकलांगे शिशावपि ॥ अतिगंडो योगभेदे बृहद्गंडे तु वाच्य
वत् ॥ ३८ ॥ चक्रवाडोऽद्रिभेदे स्याच्चक्रवाडं तु मंडले ॥ जलरुं
डो जलावर्ते पयोरेणौ भुजंगमे ॥ ३९ ॥ देवताडः सैंहिकेये जीमूते च-
हुताशने ॥ अथ चातद्रुडा गात्याराजशोणितयोरपि ॥ ४० ॥ पच्छिल
स्फोटिकायां च वामायामपि योषिति ॥ ॥ इति डांतवर्गः ॥ ॥
॥ ५२० ॥ ॥ ढो ढक्कायां पुमानुक्तः शुनि तस्य च लांगुले ॥ ॥
ढद्वि ॥ ॥ गूढं रहसि गुप्ते च नद्धयोः संवृते त्रिषु ॥ १ ॥ दृढं स्थूले
नितांते च प्रगाढे बलवत्यपि ॥ माढिः स्त्री पत्रपंक्तौ च दैन्यस्यापि प्रका
शने ॥ २ ॥ मूढस्तंद्रान्विते बाले राढा स्त्री शब्दशोभयोः ॥ रूढं जाते-
प्रसिद्धे च बाढं दृढप्रतिज्ञयोः ॥ ३ ॥ व्यूढः संहतविन्यस्तपृथुलेष्वभि-
धेयवत् ॥ वोढा नाभारिके सूते शंढः स्यात्पुंसि गोपतौ ॥ ४ ॥ आरू

ष्टां डेवर्षवरेन्तृतीयाप्रकृतावपि॥ षोढातितिक्षासंयुक्तेशक्तेचाप्यभिधेयवत्॥५॥ ॥ढत्रि॥ ॥अध्यूढाकृतसापत्न्यनार्यामध्यूढईश्वरे॥ आषाढोव्रतिनांदंडेमासेमलयपर्वते॥६॥स्त्रीपूर्णिमायामालीढंपादन्यासेशितेत्रिषु॥उद्गूढंऊढेस्थूलेस्यादुपोढोनिकटोढयोः॥७॥प्रगाढःकृच्छ्रदृढयोःप्रमीढोमूत्रितेघने॥प्ररूढोजठरेवद्धमूलेवारूढइत्ययं॥८॥वरूथांचलकेपाटेऽथोपंजरेशंबलेपिच॥विरूढोंकुरितेजातेविगूढोगर्हितेपिच॥९॥गुप्तेपित्रिषुसंरूढःप्रौढेचांकुरितेत्रिषु॥समूढःपुंजितेभुग्नेसद्योजातेनुपप्लुते॥१०॥ ॥ढचतुः॥ ॥अध्यारूढंसमारूढेऽभ्यधिकेचाभिधेयवत्॥खट्वारूढःश्रितेखट्वामविनीतेचवाच्यवत्॥११॥प्रत्यालीढंतुचरणन्यासभेदेशितेत्रिषु॥ ॥छ

इतिढांतवर्गः॥ ॥५३१॥ ॥णैकम्॥ ॥णःपुमान्बिंदुदेवेस्याद्भूषणेगुणवर्जिते॥पानीयनिलयेपीतिकेचिदूचुर्विपश्चितः॥१॥ ॥णद्वि॥ ॥अणुर्व्रीहिविशेषेस्यात्पुंसिसूक्ष्मेभिधेयवत्॥अणिराणिवदक्षाग्रकीलाश्रिसीमसक्तयोः॥२॥उष्णोग्रीष्मेपुमान्दक्षाशीतयोरन्यलिंगकः॥ऊर्णामेषादिलोम्निस्यादंतरावर्तकेभ्रुवोः॥३॥कर्णः पृथाज्येष्ठसुतेसुवर्णालेश्रुतावपि॥क्षणःपर्वोत्सवव्यापारेषुमानेऽप्यनेहसः॥४॥कणाजीरकक्षुम्भीरमक्षिकापिप्पलीषुच॥कणोऽतिसूक्ष्मेधान्यांशेकाणःकाकेकचक्षुषोः॥५॥कीर्णस्तेनचविक्षिप्तेहिंसितेप्यभिधेयवत्॥कुणिस्तुन्नवृक्षेनाकुकरेत्वभिधेयवत्॥६॥कृष्णःसत्यवतीपुत्रेवायसेकेशवेऽर्जुने॥कृष्णास्याद्द्रौपदीनीलीकणाद्राक्षासुयोषिति॥७॥मेचकेवाच्यलिंगःस्यात्क्लीबेमरिचलोहयोः॥कोणोवाद्यप्रभेदेस्याद्वीणादीनांचवादने॥८॥एकदेशेगृहादीनामस्रेचलगुडेपिच॥गणःप्रथमसंख्योघेचंडासैन्यप्रभेदयोः

॥९॥ गुणोमौर्व्यामप्रधानेरूपादौसूदइंद्रिये॥ त्यागशौर्यादिस
त्वादिसंध्याद्यावृत्तिरज्जुषु॥१०॥ शुक्लादावपिवद्धांच गेष्णुर्ना
गायनेनटे॥ घ्राणंक्लीबंनासिकायांघ्रातेस्याद्वाच्यलिंगकं॥११॥
घृणाजुगुप्साकृपयोरथचूर्णीकपर्दके॥ चूर्णोधूलौक्षारभेदेचू
र्णानिवासयुक्तिषु॥१२॥ जर्णुश्चंद्रेचवृक्षेच जिष्णुर्नावासवेर्जुने
॥ जित्वरेवाच्यवज्जीर्णंपरिपक्वपुराणयोः॥१३॥ झूणिःक्रमुकभे
देपिदुष्टदैवश्रुतौस्त्रियां॥ त्राणांतुत्रायमाणायांरक्षणेरक्षितेत्रिषु
॥१४॥ तीक्ष्णंसामुद्रलवणेविषलोहाजिमुष्कके॥ क्लीबंजवाग्रजेपुं
सितिग्मात्मत्यागिनोस्त्रिषु॥१५॥ तूणीनील्यांनिषंगेना तृष्णा-
स्यात्तर्षलिप्सयोः॥ दीर्णंविदारितेभीते द्रुणंचापेऽलिनि द्रुणः॥१६
द्रुणयंबुद्रोणीकच्छप्योर्देष्णुर्दातरिदुर्गमे॥ द्रोणोऽस्त्रियामाढके
स्यादाढवापचतुष्टये॥१७॥ पुमान्कृपीपतौदग्धकाकेस्त्रीनीवृदंतरे
॥ तथाकाष्ठांबुवाहिन्यांगवादिन्यामपीष्यते॥१८॥ पणोवराटमानेस्या
न्मूल्येकार्षापणेग्रहे॥ क्रय्यशाकादिकासूत व्यवहारेभृतौधने॥१९
पर्णंपत्रेकिंशुकेना पार्ष्णिःस्यादुन्मदस्त्रियां॥ स्त्रियांद्वयोःसैन्यपृ
ष्ठेपादग्रंथ्यधरेपिच॥२०॥ प्राणोहृन्मारुतेबोलेकाव्यजीवेऽनिलेऽब
ले॥ पुल्लिंगःपूरितेवाच्यलिंगःपुंभूम्निचासुषु॥२१॥ पूर्णःशक्तेसमग्रे
नापूरितेत्वभिधेयवत्॥ फाणिर्गुडेकरंबेच स्त्रियांवाणीतुयोषिति
२२॥ श्रुतावपिसरस्वत्यांभ्रूणःस्त्रीगर्भडिंभयोः॥ मणिःस्त्रीपुंस
योरश्मजातौमुक्तादिकेपिच॥२३॥ कंठदेशेस्तनेजायालिंगाग्रेऽलिंज
रेपिच॥ मोणःशुष्कफलेनक्रमक्षिकाऽहिकरंडयोः॥२४॥ रणःकोणे
क्वणेपुंसिसमरेपुंनपुंसकं॥ रेणुःस्त्रीपुंसयोर्धूलौपुल्लिंगःपर्पटेपुनः
॥२५ वर्णोद्विजादिशुक्लादियशोगुणकथासुच॥ स्तुतौनानास्त्रि
यांभेदरूपाक्षरविलेपने॥२६॥ बाणःस्याद्गोस्तनेदैत्यभेदेकेवलकां
ड्योः॥ वाणातुवाणमूलेस्त्रीनीलझिंट्यांपुनर्द्वयोः॥२७॥ वीणाविद्यु

निबद्धवर्यां तृष्णिः पांडवचंद्रयोः ॥ त्रिषु नाथा द्वे मेषे वेणी केशस्य बं-
धने ॥ २८ ॥ नद्यादेरंतरे देवताले वेणुर्नृपांतरे ॥ त्वक्सारेपि च पुंसि-
स्याच्छाणो मासचतुष्टये ॥ २९ ॥ लौहादीनां च निघ्ने शाणी शावर-
णांतरे ॥ श्राणं पक्वे यवाग्वां स्त्री शीर्णं तनु विशीर्णयोः ॥ ३० ॥ श्रेणिः
स्त्रीपुंसयोः पंक्तौ समानशिल्पिसंहतौ ॥ शोणः कृशानौ श्योनाके लोहि
ताश्वे नदे पुमान् ॥ ३१ ॥ त्रिषु कोकनदच्छाये स्थाणुः कीले हरे पुमान् ॥ अस्त्री
ध्रुवेऽथ स्थूणा स्यात्सूर्म्यां स्तंभे गृहस्य च ३२ णत्रि अरुणोऽव्यक्तरा
गेऽर्के संध्यारागेऽर्कसारथौ ॥ निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु ३३ ॥
अरुणातिविषाश्यामामंजिष्ठात्रिवृतासु च ॥ अरणिर्वह्निमंथे ना द्वयोर्नि
र्मथ्यदारुणि ३४ अभीक्ष्णं तु भृशे नित्ये नद्युक्तक्रिययोस्त्रिषु ॥ इंद्राणी
करणे स्त्रीणां पौलोमीसिंधुवारयोः ॥ ३५ ॥ ईरिणं तूषरे शून्ये पीक्षणं दर्श
ने दृशि ॥ उषणं मरिचे क्लीबं कणायामुषणा स्त्रियाम् ॥ ३६ ॥ एषणी-
व्रणमार्गानुसारिण्यां च तुलाभिदि ॥ करुणस्तु रसे वृक्षे कृपायां करुणा
मता ॥ ३७ ॥ कत्तृणं तृणभित्सृण्योः करणं हेतुकर्मणोः ॥ वणिजादौ हस्त
लेपे नृत्यगीतप्रभेदयोः ॥ ३८ ॥ क्रियाभेदेंद्रियक्षेत्रकायसंवेशमैथुने ॥ का
यस्थे साधने क्लीबं पुंसि शूद्राविशोः सुते ॥ ३९ ॥ कल्याणमक्षयस्वर्गे मं
गलेपि नपुंसकं ॥ कंकणं करभूषायां सूत्रमंडनयोरपि ॥ ४० ॥ करेणु
र्गजयोषायां स्त्रियां पुंसि मतंगजे ॥ कार्मणं मंत्रतंत्रादियोजने कर्मठेपि
च ॥ ४१ ॥ काकिणी पणतुर्यांशे मानदंडे च दृश्यते ॥ कृष्णलैकवराटयोः
स्यादुन्मानस्यांशकेपि च ॥ ४२ ॥ कारणं करणे हेतुवधयोश्च नपुंसकम्
॥ स्त्री यातनायां कुर्वाणो भृत्यकारकयोस्त्रिषु ॥ ४३ ॥ कृपाणः खड्गे
छुरिकाकर्त्तर्योरपि योषिति ॥ कृपणस्तु क्रमौ पुंसि मंदकुत्सितयोस्त्रि
षु ॥ ४४ ॥ क्षेपणं प्रेरणे नौकादंडजालभिदोः स्त्रियां ॥ ग्रहणं स्वीका-
रदरकरोपरागोपलब्धिबंदिषु ॥ ४५ ॥ स्याद्ग्रामणीः प्रधानेऽधिपतौ
त्रिषु नापिते पुंसि ॥ ग्रामीणा नीलिकायां स्त्री ग्रामोद्भूतेऽभिधेयवत् ॥

॥४६॥ गोकर्णोऽश्वतरे सर्पे सारंगे च गणान्तरे॥ अंगुष्ठानामिकोन्माने गोकर्णी मूर्विकौषधौ॥४७॥ चरणो स्त्री बह्वृचादौ मूले गोत्रे पदेपि च ॥ चमणे भक्षणे चापि नपुंसकमुदाहृतम्॥४८॥ जरणं जीरके जाजी हिंगुसौवर्चलेपि च॥ तरुणं कुब्जपुष्पे नारुबुके यूनि तु त्रिषु॥४९॥ तरणि र्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियां॥ दक्षिणो दक्षिणोद्भूत सरल छंदवर्त्तिषु॥५०॥ आरामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्॥ द्रविणं न द्वयोर्वित्ते कांचने च पराक्रमे॥५१॥ दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे॥ द्रुघणो मुद्गरेपि स्यान् द्रुहिणे च परश्वधे॥५२॥ दुर्वर्णं त्रिषु सद्वर्णे क्लीबमेलेयरूप्ययोः॥ दौर्वीणं मृष्टपर्णे स्याद्दूर्वायां स्वरसेपि च॥ ५३॥ धर्मणस्तु पुमान्वृक्षभेदसर्पप्रभेदयोः॥ धरणं मानभेदेपि धारणे धरणी भुवि॥५४॥ धर्षणं स्यात्सरिभवेरते सत्यांतु धर्षिणी॥ धरुणः सम्मते नीरे स्वर्ल्लोके परमेष्ठिनि॥५५॥ धारणी नाडिकायां स्याद्ध्रुवोक्रमं त्रभिद्यपि॥ धारणा गेच योगस्य नपुंसि स्याद्विधारणे॥५६॥ धिषणस्त्रि दशाचार्ये धिषणा धियियोषिति॥ निःश्रेणि रधिरोहिण्यां खर्जूरीपादपे स्त्रियाम्॥५७॥ निर्याणं वारणापांगदेशे मोक्षे ध्वनिर्गमे॥ निर्माणं निर्मितौ सारे समंजसे नपुंसकं॥५८॥ निर्वाणमस्तंगमने निर्वृतौ गजमज्जने॥ संगमेप्यपवर्गे च प्रवणो ना चतुष्पथे॥५९॥ क्रमनिम्नमहीभागोदरमह्वेषु च त्रिषु॥ प्रघणस्ताम्रकुंभे स्यादलिंदे लोहमुद्गरे॥ ६०॥ प्रमाणं नित्यमर्यादाशास्त्रेषु सत्यवादिनि॥ इयत्तायां च हेतौ च क्लीबैकत्वे प्रमातरि॥६१॥ पत्रोर्णं धौतकौशेये क्लीबं स्यात्क्षोणके पुमान्॥ पक्षिणी पूर्णिमायां स्याद्विहग्यां शाकिनीभिदि॥६२ आगामिवर्तमानाहर्युक्तरात्रावपि स्त्रियाम्॥ प्रवेणिः स्त्री कुथावेण्योः पुराणं पंचलक्षणे॥ ६३॥ पणे पुंसि त्रिषु प्रत्ने पूरणः पूरके त्रिषु॥ क्लीबं पिंडप्रभेदे च पूरणी शाल्मलिद्रुमे॥६४॥ पटारंभकसूत्रेषु प्रोक्षणं सेचने वधे॥ वरुणास्तरुभेदे स्युपश्चिमाशापतावपि॥६५॥ वरुणस्तु पु

भानुनिकषाकप्राकारयोरपि॥ क्लीबंकन्यादिवरणेवेष्टनेस्त्रीनदीभि
दि॥६६॥ वारणंप्रतिषेधेस्याद्वारणस्तुमतंगजे॥ ब्राह्मणंब्रह्मसं
घातेवेदभागेनपुंसकं॥६७॥ भूमिदेवेतुपुंल्लिंगःस्पृक्कापृक्कयोःस्त्रि
याम्॥ वारुणीगंडदूर्वायांप्रतीचीसुरयोरपि॥६८॥ भरणीघोषकेऋ
क्षेभरणंवेतनेभृतौ॥ त्रपणीकाकडिकायांक्रीडाद्यायामधीशतुः
॥६९॥ भीषणोरसेसल्लक्यांनागाढेदारुणेत्रिषु॥ मसृणःकर्कशे
स्निग्धेत्रिषुमायांतुयोषिति॥७०॥ मत्कुणोनिर्विषाणेभेनिःश्मश्रुपु
रुषेपिच॥ उद्दंशोनालिकेरेच मार्गणोयाचकेशरे॥७१॥ याञ्चान्वेष
णयोःक्लीबं यंत्रणंरक्षणेस्मृतं॥ बंधनेस्यान्नियमनेरवणःशब्दने
स्वरे॥७२॥ रमणंपटोलमूलेनार्यांस्त्रीनाधवेस्मरे॥ रोषणःपारदेहे
मघर्षणोपलयोःपुमान्॥७३॥ क्रोधनेवाच्यलिंगःस्याद्रोहिणीकंठ-
रुग्भिदि॥ तडित्कटुंभरासोमवल्केषुलोहितागवोः॥७४॥ लवणंसैं
धवादौनासिंधुरक्षोभिदोरसे॥ तद्युक्तेवाच्यलिंगःस्यान्नदीभेदद्विषोः
स्त्रियाम्॥७५॥ लक्षणंनाम्निचिन्हेचसारस्यांलक्ष्मणाक्वचित्॥
लक्ष्मणात्वौषधीभेदेसारस्यामपियोषिति॥७६॥ रामभ्रातरिपुंसि
स्यात्सश्रीकेचाभिधेयवत्॥ विषाणीक्षीरकाकोल्यांअजशृंग्यांच
योषिति॥७७॥ कुष्ठनाम्न्यौषधेक्लीबंपशुशृंगेभदंतयोः॥ विपणिःप-
ण्यवीथ्यांचभवेदापणपण्ययोः॥७८॥ शरणंगृहरक्षित्रोर्वधरक्ष-
णयोरपि॥ श्रवणंचश्रुतौकर्णेनक्षत्रेननपुंसकम्॥७९॥ श्रमणोय
तिभेदेनानिंद्यजीविनितुत्रिषु॥ स्त्रियांसुदर्शनामांस्योर्मुंडीरीशबरी
भिदोः॥८०॥ श्रावणोमासिपाषंडेदध्याल्यांश्रावणास्त्रियां॥ शिं
घाणंकाचपात्रेचलोहनासिकयोर्मले॥८१॥ श्रीपर्णीकाश्मरीकुंभ्योः
क्लीबंपद्माग्निमंथयोः॥ संकीर्णंनिचितेपिस्यादशुद्धेचापिभेद्यवत्॥
८२॥ सरणिःपंक्तौमार्गेचसारणोराक्षसांतरे॥ रुग्भेदेनाप्रसारण्यां
स्वल्पनद्यांचसारणी॥८३॥ सुषेणःकरमर्देस्याद्विष्णुस्कन्धीववैद्य

योः॥ सुवर्णो ना स्वर्णकर्षे सुवर्णा तु मरवांतरे॥ ८४॥ श्रीकृष्णागुरुणि क्लीबे कांचने हरिचंदने॥ सुपर्णः स्वर्णचूडे च गरुडे कृतमालके॥ ८५॥ सुपर्णा कमलिन्यां च वैनतेयस्य मातरि॥ हरेणुर्ना सतीले स्त्री रेणुकाकुलयोषितोः॥ ८६॥ हरणं यौतकादीनां द्रव्ये भुजे हृतावपि॥ हरिणः पुंसि सारंगे विषदे त्वभिधेयवत्॥ ८७॥ हरिणी हरितायां च नारीभिद्वृत्तभेदयोः॥ सुवर्णप्रतिमायां च हर्षणो ऽक्षिरुग्गंतरे॥ ८८॥ हर्षके योगभिदे च श्राद्धदेवेऽपि च क्वचित्॥ हिरण्यं रेतसि स्वर्णे वराटे च नपुंसकम्॥ ८९॥ ॥ णान्तः॥ ॥ अंगारिणी हसंत्यां च भास्करत्यक्तदिश्यपि॥ अथर्वणिर्ना ऽथर्वज्ञब्राह्मणे च पुरोधसि॥ ९०॥ आतर्पणं प्रीणये स्यान्मंगलालेपनेऽपि च॥ आरोहणं स्यात्सोपाने समारोहे प्ररोहणे॥ ९१॥ उत्क्षेपणं तु व्यजने धान्यमर्दनवस्तुनि॥ स्यादुद्धरणमुद्धारवांतान्नोन्मूलनेष्वपि॥ ९२॥ कार्षापणो ऽस्त्री कार्षिके पणषोडशके ऽपि च॥ अथ कामगुणो रागे विषयाभोगयोरपि॥ ९३॥ चीर्णपर्णं तु निंबेऽपि खर्जूरीभूरुहे पुमान्॥ चूडामणिः शिरोरत्ने काकचिञ्चाफले पुमान्॥ ९४॥ जुहुवाणो ऽपि चाध्वर्यावपि स्याज्जातवेदसि॥ तंडुवीणः कीटमात्रे बर्बरे तंडुलोदके॥ ९५॥ त्रायमाणा वार्षिके स्त्री रक्ष्यमाणे ऽभिधेयवत्॥ तैलपर्णी मलयजे श्रीवासे सिल्हकेऽपि च॥ ९६॥ दाक्षायणी त्वपर्णायामश्विन्यादिषु उडुषु स्त्रियां॥ अथ देवमणिर्भर्गे ऽश्वावर्ते कौस्तुभेऽपि च॥ ९७॥ नारायणोऽच्युते भीरुर्गौर्यो नारायणी मता॥ अथो निगरणं क्लीबं भोजने स्याद्गले पुमान्॥ ९८॥ अथ निःसरणं मृत्यूपायमोक्षेषु निर्गमे॥ स्यान्निस्तरणमुपाये निस्तारे तरणेऽपि च॥ ९९॥ निरूपणं स्यादालोके विचारे च निदर्शने॥ पर्पशीणश्च पर्णस्य शिरायां द्यूतकंबले॥ १००॥ पर्णचूर्णरसेऽपि स्यात्पर्पशीणं तु पर्वणि॥ प्रवारणं निषेधे स्यात्काम्यदाने च नद्योः॥ १०१॥ परीरणः स्यात्कमठे दंडे च पट्टशाटके॥ परायणमभीष्टे स्यात्तत्पराश्रययोरपि॥ १०२॥

परवाणिः पुमान्धर्माध्यक्षवत्सरयोरपि ॥ परायणं समासंगक्ष-
त्स्वर्यपारगतावपि ॥ १०३ ॥ पीलुपर्णी विंबिकायां मूर्वायामौषधीभि
दि ॥ अथ पुष्करिणी चेभ्यां सरोजिन्यां जलाशये ॥ १०४ ॥ मधुपर्णी
तु गंभार्यां नीलीसंज्ञौषधावपि ॥ मीनीस्रोणा स्तु पुल्लिंगो दुर्दुरान्मेव
खंजने ॥ १०५ ॥ रक्तरेणुस्तु सिंदूरपलाशकोरके पुमान् ॥ रागचू-
र्णः पुमान्दंनधावने मकरध्वजे ॥ १०६ ॥ रेरिहाणास्तु पुंसि स्यान्मो
हादेवे वरेपि च ॥ लंबकर्णः स्मृतो कोठपादपे छगलेपि च ॥ १०७ ॥
विदारणं विडंबे च भेदे क्लीबं रणे द्वयोः ॥ अथ वैतरणी नद्यां प्रेता
नां यातुमातरि ॥ १०८ ॥ शरवाणिः शरमुखे पापिष्ठे शरजीविनि ॥
पुमानथो शिखरिणी रसालावृत्तभेदयोः ॥ १०९ ॥ नारीरत्ने मल्लि
कायां रोमावल्यामपि स्त्रियां ॥ अथ संसरणं क्लीबमसंबाधचमूग-
तौ ॥ ११० ॥ घंटापथे च संसारे रणारंभे च कुत्रचित् ॥ समीरणः स्यात्
पवने पथिके च फणिज्जके ॥ १११ ॥ हस्तिकर्णश्चोरुबूके पलाशग
णभेदयोः ॥ ॥ णपंच ॥ ॥ अवग्रहणमित्येतत्प्रतिरोधे
प्यनादरे ॥ ११२ ॥ अवतारणं भूतादिग्रहे वस्त्रांचले र्चने ॥ प्रविदा
रणमाख्यातं संपराये वदारणे ॥ ११३ ॥ परिभाषायां स निंदो पालंभने
नियमेपि च ॥ उक्तो मत्तवारणास्तु प्रक्लिन्नकटकुंजरे ॥ १४ ॥ क्लीबं
प्रासादवीथीनां कुंडवृक्ष इनावपि ॥ मंडूकपर्णी मंजिष्ठाब्राह्मण्योर्ना
तु शोणके ॥ १५ ॥ रोमहर्षणं रोमांचे भासूते च विभीतके ॥ वात
रायण उन्मत्ते निष्प्रयोजनपूरुषे ॥ १६ ॥ कांडे च परपत्रे च कूटे च पर
संक्रमे ॥ ॥ णषट् ॥ ॥ दोहदलक्षण मुक्तं वयःसंधौ च
गर्भे च ॥ १७ ॥ यौवनलक्षण मथ्याख्यातं लावण्यकुचयोश्च
॥ ॥ ॥ इति णांतवर्गः ॥ ॥ ६४९ ॥ ॥ तेकं ॥
त श्रीरामृतयुद्धेषु क्रोडे म्लेछे च कुत्रचित् ॥ अपुमांस्तरणोपुण्ये क-
थितः शब्दवेदिभिः ॥ १ ॥ ॥ तद्वि ॥ ॥ अस्तं क्षिप्तेप्यवसिते

त्रिषुनापिध्रुवमाचले॥ अंतं स्वरूपेनाशेनानस्त्रीशेषेंऽतिकेत्रि
षु॥३॥ आर्त्तिः पीडाधनुष्कोट्योः स्यादाप्तेलब्धेसमस्तयोः॥ आ
प्तिः स्त्रीयोगसंप्राप्त्योरितं स्मृतेगतेत्रिषु॥ ईति डिंबेप्रवासेति
वृष्ट्यादिषट्केचस्त्रियाम्॥ उक्तमेकाक्षरछंदस्युक्तं स्याद्भाषि
तेत्रिषु॥४॥ ऊतिःस्त्रीरक्षणेस्यूतावृतिः कल्याणवर्त्मनोः॥ जुगु
प्सासपर्ययोःस्त्रीस्यादृत मुञ्छशिलेजले॥५॥ सत्येदीप्तेपूजितेस्या
दृतुर्वर्षादिषट्कच॥ आर्तवेभास्यपिचपुमानेतः कर्बुरआगते॥६॥
क्षत्ता शूद्रात्क्षत्रियजेप्रतीहारेचसारथौ॥ भुजिष्यातनयेपिस्या-
न्नियुक्तवेधसोःपुमान्॥७॥ कर्त्ता तुकारकेवाच्यलिंगोनापरमेष्ठि
नि॥ क्रतुर्यज्ञेमुनौपुंसि कांतिः शोभेच्छयोःस्त्रियाम्॥८॥ कां
तानार्यांप्रियंगौस्त्रीशोभनेत्रिषुनाथवे॥ लोहेचचंद्रसूर्यीयःपर्या
यांतः शिलासुच॥९॥ क्षिति र्निवासेमेदिन्यांकालभेदेक्षयेस्त्रि
याम्॥ कीर्त्तिः प्रसादयशसोर्योषित् कुंतो गवेधुकायांस्यात्॥
१०॥ प्रासायुधेच कुंती गुग्गुलुपृथयोश्चशल्लुक्यां॥ कृतं युगेल
मर्थेस्याद्विहितेहिंसितेत्रिषु॥११॥ कृत्तं तुवेष्टितेछिन्ने कृतिः का
रणाहिंसयोः॥ कृत्तिश्चर्मत्वचोर्भूर्जेकृत्तिकायांहर्येस्त्रियाम्॥१२॥
केतुर्नारुक्पताकाऽरिग्रहोत्पातेषुलक्ष्मणि॥ गर्त्तास्त्रीगर्तभेदेस्या
दवटेचकुकुंदरे॥१३॥ ग्रस्तं ग्रासीकृतेपिस्याल्लुप्तवर्णपदेपिच॥
गतिःस्त्रीमार्गदशयोर्ज्ञानेयात्राभ्युपाययोः॥१४॥ नाडीव्रणसर
ण्यांचगतं विज्ञानयातयोः॥ गातुर्नाकोकिलेभृंगेगंधर्वेत्रिषुरोष
णे॥१५॥ गीतिश्छंदसिगानेस्त्रीगीतं शब्दितगानयोः गुप्तिस्त्री
प्रकरस्यांतेकारागारेचरक्षणे॥१६॥ गुप्तं स्याद्रक्षितेगूढे घातः
कांडप्रहारयोः॥ घृत माज्येजलेक्लीबंप्रदीप्तेत्वभिधेयवत्॥१७॥
चित्तं छन्नेत्रिषुचिता चित्यायांसंहतौस्त्रियाम्॥ चितिश्चिं
त्यावृंदयोःस्त्रीजातं व्यक्तौघजन्मसु॥१८॥ क्लीबंत्रिलिंगमुत्पन्ने

जातिः स्त्री गोत्रजन्मनोः॥ अश्मंतिकामलकयोश्च सामान्यछंदसो-
रपि ॥१९॥ जातीफले च मालत्यां ज्ञातिस्तात सगोत्रयोः॥ पुमानथ
ततं व्याप्ते विस्तृते चाभिलिंगकं ॥२०॥ क्लीबं वीणादिवाद्ये स्यात्पुल्लिंग-
स्तु समीरणे॥ तातो ऽनुकंप्ये जनके तिक्तो रसस्फगंधयोः॥ २१॥ ति
क्ता तु कटुरोहिण्यां पर्पटे तु नपुंसकम्॥ तूस्तं रेणौ च विख्यातं जटा
यां च नपुंसकम् ॥२२॥ त्रेता युगे ऽग्नित्रितये दत्तं विश्राणिते ऽर्पिते त्रि
षु। दंतो ऽद्रिकटके कुंजे दशाने ऽथौषधौ स्त्रियाम् ॥२३॥ दांतस्तु द
मिने पि स्यात्तपः क्लेशसहे त्रिषु॥ दितिर्दैत्यजनन्यां च खंडने पि च यो
षिति॥ २४॥ दीप्तं निर्भासिते दग्धे ज्वलिते ऽथ द्रुतं त्रिषु॥ शीघ्रे विलीने वि
द्राणे द्युतिः स्त्री रश्मिशोभयोः॥ २५॥ दृतिश्चर्मपुटे मत्स्ये ना धातु
र्नेंद्रियेषु च॥ शब्दयोनिमहाभूतं तद्गुणेषु रसादिषु॥२६॥ मनःशिला
दौ श्लेष्मादौ विशेषाद्गैरिके स्थि च॥ धाता हिरण्यगर्भे ना पालके त्रिष्व
थो धुतं ॥२७॥ त्यक्ते विधूते धूतं तु कंपिते भर्त्सिते त्रिषु॥ धूर्तं तु ख
ण्डलवणे धूर्तस्तु रेना विटे त्रिषु ॥२८॥ धृतिर्नैष्ठ्यो स्त्रियां तुष्टौ योगभिद्धै
र्यधारणे॥ नतं तगरपाद्यां स्यात्क्लीबं कुटिलनम्रयोः॥ २९॥ त्रिषु नीति
र्नये पि स्यात्प्रापणे पि च योषिति॥ पंक्तिः स्त्री गौरवे पाके पत्तिर्ना पदगे
स्त्रियां॥ ३०॥ गता वेकरथैकेभत्र्यश्वपंचपदातिके॥ पंक्तिः दशाक्षरं
छंदो दशसंख्याल्लिषु स्त्रियाम् ॥३१॥ पतिर्धवे ना ऽप्यधीशे प्राप्तं ल
ब्धे समंजसे॥ पातो निपातने त्राते त्रिषु प्राप्तिर्महोदये॥३२॥ लाभे-
पि च स्त्रियां प्रातिः पूर्तिप्रादेशयोः स्त्रियाम्॥ पीतिर्ना ऽश्वे स्त्रियां पाने
प्रीतं हर्षितनर्मणोः॥३३॥ पीतं पाने हरिद्रायां स्त्रियां गौरे ऽभिधेयव
त्॥ प्रीतिर्योगांतरे प्रेम्णि स्मरपत्नीमुदोः स्त्रियाम् ॥३४॥ पुस्तं क्लीबे
पुस्तके च लेप्यादिशिल्पकर्मणि॥ प्लुतं तुरंगमगतौ क्लीबं पुंसि त्रिमा
त्रके॥३५॥ पूतं त्रिषु पवित्रे च शारिते बहुलीकृते॥ पूर्तं त्रिषु पूरिते
स्यात्क्लीबं खातादिकर्मणि ॥ ३६॥ प्रोतं नपुंसकं वस्त्रे स्यूते वाच्य

लिंगकं॥ प्रेतोभूतांतरेपुंसिमृतेस्याद्वाच्यलिंगकः॥ ३७॥ पोतःशि
शौबहित्रेचगृहस्थानेचवाससि॥ वृत्तिस्त्रीवरणेऽपिस्याद्वेष्टनेऽपिच
योषिति॥ ३८॥ भर्त्तास्वामिनिपुंसिस्यात्त्रिषुधातरिपोष्टरि॥ भक्ति
र्विभागेसेवायांस्त्रियांभ्रांतिस्तुयोषिति॥ ३९॥ मिथ्यामतौचभ्रम
णेभित्तिःकुड्यप्रदेशयोः॥ भीतिर्भयेस्त्रियांभीतंभयेऽथभीतु
तेत्रिषु॥ ४०॥ भूतिर्भस्मनिसंपत्तौहस्तिशृंगारयोःस्त्रियाम्॥ भूतं
क्ष्मादौपिशाचादौजंतौक्लीबंत्रिषूचिते॥ ४१॥ प्राप्तेवृत्तेसमेसत्येदेवयो
न्यंतरेतुना॥ कुमारेऽपिभृतिःस्त्रीस्यान्मूल्येऽपिभरणेऽपिच॥ ४२॥ मतं
तुसम्मतेज्ञानेमतिःस्त्रीच्छाधियोःस्मृतौ॥ मंतुःपुंस्यपराधेऽपिमनुष्येऽपि
प्रजापतौ॥ ४३॥ मातागौर्यादिजननीगोब्राह्मण्यादिभूमिषु॥ मातिर्मा
नेऽप्यवच्छेदेमुक्तिर्मोक्षेचमोक्षणे॥ ४४॥ मात्रादयःस्त्रियांमुक्तःप्राप्त
मोक्षेचमोचिते॥ त्रिषुस्त्रीमौक्तिकेमूर्त्तिःकायकाठिन्ययोःस्त्रियाम्
॥ ४५॥ मूर्त्तंस्यात्त्रिषुमूर्छालेकठिनेमूर्त्तिमत्यपि॥ मृतंतुयाचितेमृत्यौ
क्लीबंमृत्युमतित्रिषु॥ ४६॥ यतिःस्त्रीपादविच्छेदेनिकारयतिनोःपु-
मान्॥ यंतामेठेचसूतेनायुक्तिःस्त्रीन्याययोगयोः॥ ४७॥ युतो यु
क्तेऽपृथग्भूतेक्लीबंहस्तचतुष्टये॥ रक्तोऽनुरक्तेनील्यादिरंजितेलो-
हितेत्रिषु॥ ४८॥ क्लीबंतुकुंकुमेताम्रेप्राचीनामलकेसृजि॥ रतिः
स्त्रीस्मरदारेषुरागेस्यात्रतगुह्ययोः॥ ४९॥ रत्नंवर्त्मनिनद्यांस्त्रीरतं
सुरतगुह्ययोः॥ रिक्तंशून्येवनेरीतिःस्त्रियांस्पंदप्रचारयोः॥ ५०॥
पित्तलेलोहकिट्टेचलताप्रियंगुशाकयोः॥ पृक्काज्योतिष्मतीवल्ली
लताकस्तूरिकासुच॥ ५१॥ माधवीदूर्वयोर्लिप्तंवलिप्तेविषदिग्ध
योः॥ भुक्तेलूतातूर्णनाभपिपीलिकागदांतरे॥ ५२॥ वप्तातुजनकेपुं
सिवापकेऽप्यभिधेयवत्॥ वक्तातुपंडितेऽपिस्याद्वाग्मिन्यप्यन्यलिंग
कः॥ ५३॥ व्यस्तंतुव्याकुलेव्याप्तेव्यक्तःस्फुटमनीषिणोः॥ वस्ति
र्द्वयोर्निरूहेनाभ्यधोभूमिदशासुच॥ ५४॥ वर्त्तिर्भेषजनिर्माणेन

यनांजनलेखयोः॥ गात्रानुलेपनीदीपदशादीपेषुयोषिति॥ ५५॥ वा
र्तातुवर्तनेवार्तिंगणेकृष्याद्युदंतयोः॥ निःसारारोग्ययोः क्लीबंवृत्तिर्म
ह्लारुजोः स्त्रियां॥ ५६॥ व्याप्तंख्यातेसमाक्रांते व्याप्तिर्व्यापनलंभ
योः॥ स्त्रियांवित्तिर्विचारेचलाभसंभावयोःस्त्रियां॥ वित्तंक्लीबंध
नेवाच्यलिंगंख्यातेविचारिते॥ ५७॥ वीतमसारगजेस्यादंकुशकर्म-
ण्यसारतुरगेऽपि॥ वीतिर्गतौचदीप्तौप्रजनाशनधावनेषुस्त्री॥ ५८॥
वृत्तिर्विवरणाजीवकैशिक्यादिप्रवर्तने॥ ५९॥ स्त्रीवृत्तंप्रसवबंधेघ
टीधाराकुचाग्रयोः॥ वृत्तोऽधीतेप्यतीतेनिवर्तुलेपिवृतेमृते॥ ६०॥ वृंदे
ऽन्यलिंगंवाक्लीबंछंदश्चारित्रवृत्तिषु॥ शक्तिरस्त्रांतरेगौर्यामुत्साहा-
दिबलेस्त्रियां॥ ६१॥ शस्तंक्षेमेप्रशस्तेचशांतिः स्त्रीमंगलेशमे॥ शा
स्तासमंतभद्रेनाशासकेपुनरन्यवत्॥ ६२॥ शांतोऽभियुक्तरसयोः
पुंसित्रिषुशमान्विते॥ अव्ययंवारणेशांतं शातं शितंचदुर्बले
॥ ६३॥ निशितेचशितिर्भूर्जेनासितासितयोस्त्रिषु॥ शीतंहिमगु
णेक्लीबंशीतलालसयोस्त्रिषु॥ ६४॥ वानीरेबहुवारेनाशक्तंपूताम्ल
निष्ठुरे॥ श्रुतिःश्रोत्रेचतत्कर्मण्याम्नायवार्तयोःस्त्रियाम्॥ ६५॥
शुक्तिःकपालशकलेशंखेशंखनखेपिच॥ नख्यश्चावर्त्तदुर्नाममु
क्तास्फोटेषुचस्त्रियां॥ ६६॥ श्रुतमाकर्णितेशास्त्रे श्वेतोद्वीपाद्रिभे
दयोः॥ श्वेतावराटिकाकाष्ठपाटलाशंखिनीषुच॥ ६७॥ क्लीबंरूप्ये
ऽन्यवच्छुक्लेसन्साधौधीरसत्तयोः॥ मान्येसत्येविद्यमानेत्रिषुसाध्व्यु
मयोस्त्रियां॥ ६८॥ सातिर्दानेऽवसानेस्त्रीस्वांतंचेतसिगह्वरे॥ स्थि
तंप्रतिज्ञातवतिचोर्ध्वनिश्चलयोस्त्रिषु॥ ६९॥ स्थितिःस्त्रियामवस्था
नेमर्यादायांचसीमनि॥ सितमवसितेचबद्धे धवलेत्रिषुधवलायां-
स्त्री॥ ७०॥ सीतालांगलपद्धतिवैदेहीस्वर्गगंगासु॥ सुतस्तुपार्थि
वेपुंस्यपत्येतुसुतास्मृता॥ ७१॥ सुप्तिःस्पर्शाज्ञतानिद्राविश्रंभे
षुस्त्रियाम्॥ सूतस्तुसारथौतक्ष्णिक्षत्रियाद्ब्राह्मणीसुते॥ ७२॥ वंदि

तिः स्यादायुधज्वालासूर्यतेजः सुयोषिति॥ ॥ तत्रि॥ ॥
अमृतं यज्ञशेषे स्यात्पीयूषे सलिले घृते॥७६॥ अयाचिते च मोक्षे च
नाधन्वंतरिदेवयोः॥ अमृता मागधीपथ्यागुडूच्यामलकीषु च॥७७॥
अनृतं कृषावसत्येप्यजितो नाहरौ त्रिषु॥ अनिर्जिते चाच्युतस्तु
हरौ पुंसि त्रिषु स्थिरे॥७८॥ अर्दितं याचितेपि स्याद्वातव्याधौ च हिंसि
ते॥ अक्षतं न द्वयोः पंडे लाजेषु त्रिष्वहिंसिते॥७९॥ यवेपि क्वचिदव्य
क्तो हरौ स्मरहरे पुमान्॥ परमात्ममहदाद्योः क्लीबं स्यादस्फुटे त्रिषु॥
॥८०॥ अनंतः केशवे शेषे पुमाननवधौ त्रिषु॥ अनंता च विशल्यायां
शारिवादूर्वयोरपि॥८१॥ कणादुरालभापथ्यापार्वत्यामलकीषु च॥ वि
श्वंभरागुडूच्योः स्यादनंतं सुरवर्त्मनि॥८२॥ अश्मंतमक्षमे चुल्यां म
रणे नवधावपि॥ क्षेत्रेप्यथाऽयतिः पुंसि हिमदीधितिकालयोः॥८३
॥ अर्हंस्तु क्षपणे बुद्धे पुंसि मान्येऽन्यलिंगकः॥ अर्हंतश्चापि सुगते
क्षपणेपि च दृश्यते॥८४॥ अगस्तिः कुंभयोनौ च वंकसेनतरौ पुमान्
अर्वती कुंभदास्यां च वडवायां च योषिति॥८५॥ अंगतिः पुंस्यग्नि-
होत्रब्रह्मवन्हिष्वथादितिः॥ भूदेवमात्रो रंहतिस्त्यागे रोगेप्युभे स्त्रि
यौ॥८६॥ आपातः पुंसि पतने तदात्वे च प्रकीर्तितः॥ आघ्रातं शिं-
घिते क्रांते प्याख्यातं भाषिते तिङि॥८७॥ आध्मातः शब्दिते दग्धे
वातरुग्भेदसंयुते॥ आप्लुतः स्नातके स्नातेऽप्यादृतः सादरेऽर्चिते॥
८८॥ आचितः शकटोन्मेये पलानामयुतद्वये॥ पुल्लिंगः संगृहीतेपि
छन्नेपि स्यात्त्रिलिंगकः॥८९॥ आहतं गुणिते चापि ताडिते च मृषार्थ
के॥ स्यात्पुरातनवस्त्रेपि नववस्त्रे च नाऽनके॥९०॥ आनर्तो देशभेदे

पिवृत्यस्थानेजलेरणे॥ आवर्त्तश्चिंतनेवारिभ्रमेचावर्त्तनेपुमान्॥९१
॥ आस्फोतंतुपुमानर्कपर्णेस्यात्कोविदारके॥ आस्फोतागिरिकर्ण्यां
चवनमल्ल्यांचयोषिति॥९२॥ आयस्तस्तेजितेक्षिप्तेक्लेशितेकुपितेह
ते॥ आयतिस्तुस्त्रियांदैर्घ्येप्रभावागामिकालयोः॥९३॥ आय
त्तिस्तुस्त्रियांस्नेहेवशित्वेवासवेबले॥ आकृतिस्तुस्त्रियांरूपेसा
मान्यवपुषोरपि॥९४॥ आसत्तिःसंगमेलाभेस्त्रियामापत्तिरापदि
॥ प्रापणेपिचयोषित्स्यादुदंतःसाधुवार्त्तयोः॥९५॥ उषितंव्युषितेदग्धे
प्युदात्तस्तुस्वरांतरे॥ दयात्यागादिसंपन्नेकाव्यालंकारकृत्ययोः॥९६
उत्तप्तंशुष्कमांसेथत्रिषुतप्तेपरिप्लुते॥ उचितंतुभवेन्न्यस्तेमितेज्ञाते
समंजसे॥९७॥ उद्धृतंस्यात्रिषूत्क्षिप्तेपरिभुक्तोज्झितेपिच॥ उशि
तंस्यात्रिषूसन्नेप्रोद्यतेवृद्धिमत्यपि॥९८॥ उद्घातस्तुपुमान्पादस्ख
लनेसमुपक्रमे॥ पवनाभ्यासयोगस्यकालभेदेचकीर्त्तितः॥९९॥ उत्तुं
गेमुद्गरेपिस्यादुदितंतूक्तआगते॥ उद्भूतंत्रिषुसंजातेसमुन्नद्ध
प्रवृद्धयोः॥१००॥ उन्मत्तउन्मादवतिधूस्तूरमुचुकुंदयोः॥ उद्भ्रांतो
निर्मदगजेपुमानुद्भ्रमितेत्रिषु॥१०१॥ एधतुःपुरुषेग्नौना कलितं
विदिताप्तयोः॥ कपोतःस्याच्चित्रकंठपारावतविहंगयोः॥१०२॥ अथ
क्रंदितमाह्वानेरुदितेपिनपुंसकं॥ क्षारितःस्रावितेक्षारेअभि
शस्तेपिचत्रिषु॥१०३॥ कापोतारुचकेक्लीबेकपोतोघंजनांतरे॥
किरातोम्लेच्छभेदेस्याद्भूनिंबेऽल्पतनावपि॥१०४॥ स्त्रियांचामर
धारिण्यांकुट्टिनीदुर्गयोरपि॥ कृतांतोयमसिद्धांतदैवाकुशलकर्म-
सु॥१०५॥ गर्जितंवारिवाहादिध्वनौनामत्तकुंजरे॥ ग्रंथितंगु
फितेक्रांतेहिंसितेचत्रिलिंगकम्॥१०६॥ गभस्तिःकिरणेसूर्ये
नास्वाहायांतुयोषिति॥ गर्भुत्स्त्रीस्वर्णलतयोर्गोपतिःशिवषं
ढयोः॥७॥ नृपभास्करयोःपुंसिचेष्टितंगतिचेष्टयोः॥ जगत्स्यात्
पिष्टपेक्लीबंवायौनाजंगमेत्रिषु॥८॥ जगतीभुवनेक्ष्मायांछंदोभेदे

रंटयोरपि॥ जृंभितं करणे स्त्रीणामीहास्फोटितयोरपि॥ १२॥ त्वरि
तं प्रजवे शीघ्रे त्रिगर्तो गणितांतरे। देशेपिनाघुर्घुरिकाकामुकांगन
योः स्त्रियां॥ १३॥ तृणता धनुषि तृणत्वे दंशितं माफजालदंशितेपि
स्यात्॥ कवचाचिते द्विजाति विंप्राण्डजयोश्च पुंल्लिंग॥ १४॥ दुर्जातं
व्यसने क्लीबे सम्यग्जाते ऽन्यलिंगके॥ दुर्गतिर्नरके नैस्व्ये स्त्री दृष्टांत
उदाहृतौ॥ १५॥ शास्त्रेच मरणे धीमान् पंडितेच बृहस्पतौ॥ निर्ऋतिः
स्यादलक्ष्म्यां स्त्री दिशांपालांतरे पुमान्॥ १६॥ निकृतं विप्रलंभे स्या
न्नीचे विप्रकृतेपि च॥ निर्मुक्तस्त्यक्तसंगे स्यान्मुक्तकंचुकभोगिनि॥
१७॥ निरस्तस्त्रिषु निष्ठ्यूते प्रेषिते षोद्भुतोदिते॥ संत्यक्तेच प्रतिहते
निमित्तं हेतु लक्ष्मणोः॥ १८॥ निवातो दृढसन्नाहे वातशून्येपि चाश्र
ये॥ निशांतं त्रिषु शांते स्यात्क्लीबं तु भवनोषसोः॥ १९॥ निकृतिर्भ-
र्त्सने क्षेपे शठे शाठ्येपि च स्त्रियां॥ निर्वृतिः सुस्थिता वस्तंगमने च
स्वस्वे स्त्रियां॥ २०॥ नियतिर्नियमे दैवे स्त्री पतन्पातुके खगे॥
प्रहतं वितते क्षुण्णे पर्यस्तः पतिते हते॥ २१॥ प्रभूतमुद्गते प्राज्ये पं
डितः सिल्हके कवौ॥ पलितं शैलजे तापे केशपाके च कर्दमे॥ २२॥ प्र
सृतः सप्रसारे स्याद्विनीते वेगिते त्रिषु॥ अर्द्धांजलौ तु पुंल्लिंगो जंघा
यां प्रसृता मता॥ २३॥ प्रसूतं कुसुमे क्लीबं त्रिषु संजातसूतयोः॥ प्र
णीतः संस्कृताग्नौ नायज्ञपात्रांतरे स्त्रियां॥ २४॥ त्रिषु क्षिप्तोपसंपन्न
विहिते षु प्रवेशिते॥ प्रतीतः सादरे ज्ञाते हृष्टप्रख्यातयोस्त्रिषु॥ २५॥
प्रमीतं वाच्यलिंगं स्यात्प्रोक्षिते पि मृते पि च॥ परेतो वाच्यलिंगः स्यान्
मृते भूतांतरे पुमान्॥ २६॥ पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः॥

देवमुन्यंतरेशैले प्रपातो निर्झरे ऽतटे॥ २७॥ पर्याप्तं तु यथेष्टे स्यात्तृ
प्तौ शक्ते निवारणे॥ पंचता पंचभावे स्यान्मरणेपि च योषिति॥ २८॥ प-
क्षतिश्च भवेत्पक्षमूले च प्रतिपत्तिथौ॥ प्रसूतिरुद्भवेपि स्यात्तनयेदु
हितर्यपि॥ २९॥ प्रततिर्विस्तृतौ वल्यां पद्धतिः पंक्तिवर्त्मनोः॥ प्रवृत्ति
स्तु प्रवाहे स्यादुदंते च प्रवर्त्तने॥ ३०॥ आवंत्यादौ च पर्याप्तिः प्रका-
मप्राप्तिरक्षणे॥ प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः॥ ३१॥
॥ योनौ लिंगे पौरवर्गे ऽमीपक्षस्त्यादयः स्त्रियां॥ पार्वती सल्लकी दुर्गा
गोपालपुत्रिकास्तु च॥ ३२॥ प्रार्थितं याचिते शत्रुसंरुद्धे भिहते त्रि
षु॥ पतत्रिविहंगमे पुंसि पतने क्लीं पुनस्त्रिषु॥ ३३॥ पिशितं मांसे मां-
स्यां स्त्री॥ पिंडितं गुणिते घने॥ पीडितं करणे स्त्रीणां यंत्रिते बाधिते-
पि च॥ ३४॥ पुटितं स्याद्धस्तपुटे पाटितस्यूतयोरपि॥ पृषन्मृगे पु
मान्बिंदौ नद्वयोः पृषतोपि ना॥ ३५॥ अनयोश्चात्रिषु श्वेतबिंदुयुक्ते-
प्युभाविमौ॥ प्रोक्षितं निहते सिक्ते बृहती वसनांतरे॥ ३६॥ छंदो
भित्क्षुद्रवार्ताकी वारिधानीषु वाच्यपि॥ कंटकारीमहत्योश्च भवद्यु
ष्मत्तत्तो स्त्रिषु॥ ३७॥ स्त्री बाणभेदे भरतो नाट्यशास्त्रमुनौ नटे॥ रा
मानुजे च दौष्यंतौ भास्वान्भास्वरसूर्ययोः॥ ३८॥ भारतं ग्रंथभेदे स्या
द्वर्षभेदेऽथ भारती॥ वचने च सरस्वत्यां पक्षिवृत्तिप्रभेदयोः॥ ३९॥
भासंतः सुंदराकारे भिषुना भासपक्षिणि॥ भावितं वासिते प्राप्ते भू
भृन्नाडी महीपतौ॥ १४०॥ महती वल्लकीभेदे राज्ये स्यात्तु नपुंसकं॥
तत्त्वभेदे पुमान्वृद्धे वाच्यवन्मथितं पुनः॥ ४१॥ क्लीबं निर्जलघोले
स्यात्त्रिष्वालोडितघृष्टयोः॥ मरुद्देवे समीरे ना ग्रंथिपर्णे नपुंसकम्॥
४२॥ मुषितं स्तेनखंडितयोर्मूर्छितमपि सोच्छ्रये च मूढे च॥ रजतं
त्रिषु शुक्ले स्यात्क्लीबं हारे च दुर्वर्णे॥ ४३॥ रमतिर्नायके नाके पुंसि स्या
द्रसितं पुनः॥ रुतस्वानितयोः क्लीबं स्वर्णादिखचिते त्रिषु॥ ४४॥ रेव
ती हलिपत्न्यां स्यात्ताराभिन्मातृभेदयोः॥ रैवतस्तु सुवर्णाले शैलभे

णेच त्रिषु तद्वति ॥ ४८ ॥ वर्द्धितं प्रसिते छिन्ने पूरिते वर्द्धिते गंधि ॥
सन्निवेशे पुंसि वहतुः पथिके वृषभे पुमान् ॥ ४९ ॥ वनिता जातराग-
स्त्री स्त्रियो स्त्रिषु च याचिते ॥ सेविते वापितं बीजाकृतमुंडितयो-
स्त्रिषु ॥ ५० ॥ वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने ॥ व्या
यतं व्यापृते दीर्घे दृढे चातिशयेऽन्यवत् ॥ ५१ ॥ व्याघातो योगभे
दे स्यादंतराय प्रहारयोः ॥ वासिता करणी नार्योर्वासितं भाविते
रुते ॥ ५२ ॥ वासंती माधवी यूथ्योरुष्ट्रेनावहिते त्रिषु ॥ विविक्तं-
त्रिषु संपृक्ते रहः पूतविवेकिषु ॥ ५३ ॥ वस्कनंदेना विहस्तः पंडिते व्या
कुले त्रिषु ॥ विनीतः स्ववहाश्वे स्याद्वणिज्यपि पुमान् स्त्रिषु ॥ ५४ ॥
जितेंद्रियेऽपनीते च निभृते विनयान्विते ॥ विश्वस्तो जातविश्वा
से विश्वस्ता विधवस्त्रियाम् ॥ ५५ ॥ विद्युत्तडिति संध्यायां स्त्रि
यां त्रिषु तु निष्प्रभे ॥ विवृताक्ष द्रुमभेदे विस्तृतेऽभिधेयवत् ॥
॥ ५६ ॥ विनेताऽ ऽदेशके राज्ञि ना विधाता तु वेधसि ॥ स्मरे ना
विनता तार्क्ष्यजनन्यां पिटकाभिदि ॥ ५७ ॥ विनतः प्रणते भुग्ने
शिक्षिते चाभिधेयवत् ॥ विकृतं त्रिषु बीभत्सरोगिते संस्कृतेपि च
५८ ॥ विच्छित्ति रंगरागे विच्छेदे हारभेदे स्त्री ॥ विदितं बुधितार्थि
तयो विपत्तिरपि यातनापदोर्योषित् ॥ ५९ ॥ वृत्तांतः प्रक्रियायां
स्यात्कार्त्स्न्ये वार्त्ताप्रभेदयोः ॥ प्रस्तावे वेष्टितं रुद्धे लासके करणांतरे ॥
६० ॥ वेल्लितं गमने क्लीबं कुटिले विधुते त्रिषु ॥ विवर्तः समुदाये स्या
दपवर्तननृत्ययोः ॥ ६१ ॥ शकुंतः कीटभेदे स्याद्भासपक्षिविहंग
यो ॥ श्रीमांस्तिलकवृक्षे ना मनोज्ञ ज्ञानक त्रिषु ॥ ६२ ॥ श्रीपतिः

पुंसिपृथिवीनाथेचमधुसूदने॥शुद्धांतोंतःपुरेक्ष्माभृत् रहःकक्षांत
रेपिच॥६३॥स्रवंतीतुतरंगिण्यांगुल्मस्थानौषधीभिदोः॥संव
र्तःभल्लयेमुन्यंतरेकर्षफलेपिच॥स्खलितंचलितेभ्रेषे संहतंसं
गतेदृढे॥संस्कृतःकृत्रिमेशस्तेभूषितेप्यन्यलिंगकः॥६५॥क्लीबं-
तुलक्षणोपेते स्थपतिःकंचुकिन्यपि॥जीवेष्टियाजकेशिल्पिभे
देनासत्तमेत्रिषु॥६६॥संघातःपुंसिघातेचसंहतौनरकांतरे॥
संवित्तिःप्रतिपत्तौस्यादविवादेजनस्यच॥६७॥संततिःस्या
त्संक्तौगोत्रेपारंपर्येपुत्रपौत्राणाम्॥संगतिःसंगमेज्ञानेसन्नतिःप्र
णतौध्वनौ॥६८॥समितिःसंपरायेस्यात्सभायांसंगमेपिच॥स
माप्तिरवसानेस्यात्समर्थनेऽथसंमतिः॥६९॥अभिलाषेप्यनुज्ञा
यांसंवित्स्याद्धास्तयोषिति॥स्थापितंनिश्चितेन्यस्तेस्तिमि
तोऽचंचलार्द्रयोः॥७०॥सिकतास्त्रीसिकतिलेवालुकायांतुभू
म्नि॥सुरतंस्यान्निधुवनेदेवत्वेसुरतास्मृता॥७१॥सुकृतं
तुशुभेपुण्येक्लीबंस्याद्विहितेत्रिषु॥सुव्रतासुखसंदोह्याशोभन
व्रतयोरपि॥७२॥सुनीतिःशोभननयेध्रुवमातरियोषिति॥सूनृ
तंमंगलेपिस्यात्प्रियसत्येवचस्यपि॥७३॥हरिद्दिशिस्त्रियांपुं-
सिहयवर्णविशेषयोः॥अस्त्रियांस्यात्तृणेचाथहर्मितंक्षिप्तदग्ध
योः॥७४॥हरितास्त्रीचदूर्वायांहरिद्वर्णयुतेऽन्यवत्॥हसंत्यंगा
रधान्यांचमल्लिकाशाकिनीभिदोः॥७५॥हरीतःपक्षिभेदेस्यान्मु
निभेदेचकैतवे॥हृषितंविस्मितेभीतेप्रहतेहृष्टलोमनि॥७६॥

॥ ॥तन्वतुः॥ ॥अवसितमृद्धेज्ञातेप्यवसानगतेचवा
च्यलिंगंस्यात्॥अर्थपतिःपुल्लिंगोधनाधिनाथेचनरनाथे॥ ॥
७७॥अवदातःसितेगौरेविशुद्धेप्यन्यलिंगकः॥अवगीतंतु
निर्वादेत्वदृष्टगर्हितयोरपि॥७८॥अंतर्गतंविस्मृतेस्यान्मध्यग्र
स्तेचवाच्यवत्॥अंगारितंतुदग्धेस्यात्पलाशकलिकोद्गमे॥७९

हसंसांचलतामात्रेनदीभेदेचयोषिति॥ अपावृतस्त्वपिहितेस्वतं
त्रेपिचवाच्यवत्॥१८०॥ अत्याहितंमहाभीतौजीवानपेक्षकर्म
णि॥ अभिनीतंत्रिषुन्याय्येसंस्कृतामर्षिणोरपि॥८१॥ अभि
जातःकुलीनेस्यान्न्याय्यपंडितयोस्त्रिषु॥ अभियुक्तःपरैरुद्धेत
त्परेप्यभिधेयवत्॥८२॥ अतिमुक्तस्तुनिःसंगेवासंत्यांतिनिशेपि
च॥ अवध्वस्तःपरित्यक्तेनिंदितेप्यवचूर्णिते॥८३॥ अधिक्षिप्तः
प्रणिहितेकुत्सितेभर्त्सितेत्रिषु॥ अंशुमान्भास्करेशालपर्ण्यामं
शुमतीस्मृता॥८४॥ भवेदपचितिःपूजाव्ययनिष्कृतिहानिषु॥
अथानुमतिरूनेंदुपूर्णिमानुज्ञयोरपि॥८५॥ अभिशस्तिःप्रा
र्थनापवादयोश्चत्रयंस्त्रियां॥ आयुष्मान्योगभेदेनावाच्यवच्चिर
जीविनि॥८६॥ उपाहितोनलोत्पातेपुमानारोपितेत्रिषु॥ उपाहू
तोध्वरहतपशौनोपहूतेत्रिषु॥८७॥ उदास्थितःप्रतीहारेप्रव्र-
ज्यावसितेचरे॥ स्यादुल्लिखितमुत्कीर्णेतनूकृतेचवाच्यवत्॥८८
उद्ग्राहितमुदीर्णेस्याद्बद्धग्राहितयोस्त्रिषु॥ भवेदुपचितंदग्धेस
मृद्धेवाच्यलिंगकं॥८९॥ उज्जृंभितंप्रफुल्लेचचेष्टायांतुनपुंसकं
॥उपरक्तोव्यसनार्तेराहुग्रस्तेंदुसूर्ययोः॥९०॥ उपसत्तिःसंगमा
त्रेसेवायामपियोषिति॥ ऋष्यप्रोक्ताशतावर्यांतिबलाशूकशिंबि
षु॥९१॥ ऐरावतोभ्रमातंगेनारंगेलकुचद्रुमे॥ नागभेदेचपुंसि-
स्याद्विद्युत्तद्भेदयोःस्त्रियां॥९२॥ नपुंसकंमहेंद्रस्यऋजुदीर्घशरास
ने॥ कलधौतंस्वर्णेस्याद्रजतेचनपुंसकं॥९३॥ भवेत्कुहरितं
क्लीबंपिकालापेरतध्वनौ॥ कुमुद्वान्कुमुदप्रायदेशेस्याद्वाच्य
लिंगकः॥९४॥ कुमुद्वतीकुमुदिन्यांकुशपत्न्यांचयोषिति॥ कृ-
ष्णवृंतापाटलायांमाषपर्ण्यांचयोषिति॥९५॥ अथगंधवतीपृ
थ्वीपुराभिद्व्यासमातृषु॥ सुरायांचगरुत्मांश्चपक्षिमात्रेखगाधि
पे॥९६॥ भवेद्गृहपतिःपुंसिगृहस्थेपिचमंत्रिणि॥ चंद्रकांतस्तु

पुंसि स्यान्मणिभेदे च कैतवे ॥ चर्मण्वती नदीभेदे कदलीपादपे स्त्रियाम् ॥ चित्रगुप्तस्तु पुंसि स्याद्यमेतस्य च लेखके ॥ १९८ ॥ दिवाभीतः कुंभिले स्यादुलूके कुमुदाकरे ॥ दिवाकीर्तिस्तु पुंसि स्यान्नापितांतावसायिनोः ॥ १९९ ॥ द्वीपवान्सिंधुनद्योर्द्वीपवत्यापगाभुवोः ॥ दृषद्वती नदीभेदे कात्यायन्यामपि स्त्रियाम् ॥ २०० ॥ स्याद्धूमकेतुरुत्पातभेदे वैश्वानरे पुमान् ॥ नंद्यावर्तः पुमान्वेश्मप्रभेदे भगवद्द्रुमे ॥ २०१ ॥ नदीकांतः समुद्रे स्याद्विज्जले सिंदुवारके ॥ नदीकांता स्त्रियां जंब्वां काकजंघौषधावपि ॥ २०२ ॥ नागदंतो द्विपरदे गृहान्निर्गतदारुणि ॥ नागदंती तु कुंभायां श्रीहस्तिन्यामपि स्त्रियाम् ॥ ॥ २०३ ॥ निष्काशितो निर्गमिते ऽप्याहिते ऽधिकृते ऽपि च ॥ अथ निस्तुषितं त्यक्ते ऽत्वग्विहीने लघूकृते ॥ ४ ॥ निराकृतिरनाकारे ऽस्वाध्याये वा रणे त्रिषु ॥ परिगतं त्रिषु प्राप्ते विस्मृतज्ञातचेष्टिते ॥ ५ ॥ अथ प्रणिहितं न्यस्ते प्राप्ते ऽपि च समाहिते ॥ अथ पल्लवितं लाक्षारक्ते सपल्लवे तते ॥ ६ ॥ भवेत्प्रणिहितं दृष्टे प्रतिस्खलितवद्धयोः ॥ प्रतिक्षिप्तं वारिते स्यात्प्रेषिते पंचकं त्रिषु ॥ ७ ॥ परिवर्तो विनिमये कूर्मराजे प्रवर्तने ॥ परिस्रुता स्त्री वारुण्यां स्यन्ने स्याद्भिधेयवत् ॥ ८ ॥ प्रधूपिता क्लेशितायां सूर्यगंतव्यदिश्यपि ॥ पंचगुप्तस्तु चार्वाकदर्शने कमठे पुमान् ॥ ९ ॥ प्रजापतिश्च दक्षादौ महीपाले विधातरि ॥ प्रतिपत्तिः प्रवृत्तौ च प्रागल्भ्ये गौरवेऽपि च ॥ १० ॥ संप्राप्तौ न प्रबोधे च पदप्राप्तौ च योषिति ॥ अथ प्रव्रजिता मांसी मुंडीरी तापसीषु च ॥ ११ ॥ प्रतिकृतिरर्चायां प्रतिनिधिप्रतीकारयोश्च स्त्री ॥ पाशुपतो बकपुष्पे स्यात्पशुपत्यधिदेवते च तद्भक्ते ॥ १२ पारिजातः सुरतरौ पारिभद्रतरावपि ॥ पारावती गोपगीते नदीभिल्लुवल्लीफले ॥ १३ ॥ पारावतः कलरवे तत्र्यामर्कटतिंदुके ॥ पुष्पदंतस्तु दिङ्नागभेदे विद्याधरांतरे ॥ १४ ॥ पुरस्कृतोऽभिशस्तारिग्रस्ताग्रेकृ

तपूजिते॥ भगवान्नाजिनेगौर्य्यांस्त्रियांपूज्येतुवाच्यवत्॥१५॥ अथभो गवतीनागपुरीनद्योरहीपुमान्॥ रंगमातातुकुट्टिन्यांवृक्षरोगांतरेस्त्रि यां॥१६॥ लक्ष्मीपतिःपुमान्वासुदेवेनरपतावपि॥ व्यतीपातोमहो- त्पातेयोगभेदापयोनयोः॥ १७॥ वनस्पतिर्नोद्रुमात्रेविनापुष्पफलि द्रुमे॥ विनिपातोनिपातेस्याद्दैवादिव्यसनेपुमान्॥ १८॥ विजृंभि तंतुचेष्टायांक्लीबंत्रिषुविकस्वरे॥ विवस्वान्विबुधेसूर्येतन्नगर्यांवि वस्वती॥१९॥ वैजयंतोगृहेशक्रध्वजप्रासादयोःपुमान्॥ वैजयंतीप ताकायांजयंतीपादपेपुमान्॥२०॥ भवेच्छतधृतिःपुंसिशक्रेचपर मेष्ठिनि॥ शुभ्रदंतीस्फुदंत्यांस्यात्सुष्पदंतेभयोषिति॥ २१॥ समुद्धृतं समुत्क्षिप्तेप्यपनीतेचवाच्यवत्॥ सदागतिर्नाकवातनिर्वाणेषुसदी श्वरे॥ २२॥ सरस्वांश्चनदेचाब्धौनान्यवद्रसिकेस्त्रियां॥ वाणीस्त्री रत्नवाग्देवीगोनदीषुनदीभिदि॥ २३॥ मनुपत्न्यामपिसत्यवतीव्या सस्यमातरि॥ नारदर्चीकयोःपत्न्यांस्त्रियांपुंसिनृपांतरे॥ २४॥ समु द्रांतातुकार्पासीपृक्कादुरालभास्वच॥ समाहितःसमाधिस्थेप्युक्तसि द्धांतआहिते॥२५॥ निर्विवादीकृतेपिस्यात्प्रतिज्ञातेचवाच्यवत्॥ स माघातोवधेयुद्धेसंख्यावान्पंडितेपुमान्॥२६॥ संख्यायुक्ते ऽन्यलिं- गोऽथस्कंधाग्निःपुमानमरवे॥ चंद्रस्काभाषितोबुद्धेपुमान्सूक्तेनपुंसकं ॥२७॥ सूर्यभक्तस्तबंधूकेपुंसित्रिष्वर्कपूजके॥ सेनापतिःकार्त्तिकेये प्यनीकाधिपतौपुमान्॥ २८॥ हिमारातिःपुमान्वातिहोत्रेकिरणमालि नि॥ हैमवत्यभयास्वर्णक्षीर्योःश्वेतवचोमयोः॥२९॥ ॥

तपंच॥ ॥अवलोकितोनालोकनाथेत्रिषुनिरीक्षिते॥ अपराजितईशानेष्वंतरेनाऽजितेत्रिषु॥ ३०॥ गिरिकर्णीजया दुर्गाशनपर्णीषुयोषिति॥ उपधूपितआसन्नमरणेपरिधूपिते॥३१ स्याद्गणाधिपतिःपुंसिशंकरेपिगजानने॥ भवेत्सिपनिषन्नपित्सौत्रिषु पुंसिविहंगमे॥ ३२॥ पृथिवीपतिस्तभूपालेऋषभाख्यौषधौपुमान्

॥ मूर्धाभिषिक्तो भूपाले मंत्रिणि क्षत्रियेपि च ॥ ३३ ॥ यादसांपतिरंभो
धौ पश्चिमाशापतावपि ॥ वसंतदूतश्चैत्रे स्यात्पिकपंचमरागयोः ॥ ३४ ॥
वसंतदूती पाटल्यामभियुक्ते च योषिति ॥ ॥ तषट् ॥ ॥
अर्द्धपारावतश्चित्रकंठे तित्तिरिपक्षिणि ॥ ३५ ॥ तसप्त ॥
समुद्रनवनीतं स्यात्क्लीबं पीयूषचंद्रयोः ॥ ॥ इति तांतवर्गः
॥ ॥ थैकं ॥ ॥ थं रक्षणे मंगले च साध्वसे च नपुंसकं ॥
शिलोच्चये पुमानेव क्वचित्तु भयरक्षके ॥ १ ॥ ॥ थद्वि ॥ ॥
अर्थो विषयार्थनयोर्धनकारणवस्तुषु ॥ अभिधेये च शब्दानां निवृ
त्तौ च प्रयोजने ॥ २ ॥ आस्था त्वालंबनास्थानयत्नापेक्षासु योषिति ॥ कं
था स्यान्मयभित्तौ च तथा प्रावरणांतरे ॥ ३ ॥ क्वाथः स्यादतिदुःखेपि नि-
ष्पाके पि द्रवस्य च ॥ कुथः स्त्रीपुंसयोर्वर्णकंबले पुंसि बर्हिषि ॥ ४ ॥
कोथो नानेत्ररोगस्य भेदे च शटिते त्रिषु ॥ ग्रंथो ग्रथनाधनयोः स्याच्छ्ला
स्त्रा क्षरसंख्ययोः ॥ ५ ॥ ग्रंथिस्तु ग्रंथिपर्णे ना बंधे रुग्भेदपर्वणोः ॥ गा
था श्लोके संस्कृतान्यभाषायां गेयवृत्तयोः ॥ ६ ॥ तीर्थं शास्त्राध्वरक्षेत्रो
पायनारीरजःसु च ॥ अवतारर्षिजुष्टांबुपात्रोपाध्यायमंत्रिषु ॥ ७ ॥ तु
त्थमंजनभेदे स्यान्नीलसूक्ष्मैलयोः स्त्रियाम् ॥ दुःस्थः स्याद्दुर्गते मूर्खे दुः
खेन तिष्ठति त्रिषु ॥ ८ ॥ प्रस्थोऽस्त्रियां मानभेदे सानावुन्मितवस्तुनि ॥
पाथोऽर्के ऽग्नौ जले क्लीबं पृथुः स्यान्महति त्रिषु ॥ ९ ॥ त्वक्पण्यां कृष्णजी
रे ऽस्त्री पुमानग्नौ नृपांतरे ॥ प्रोथोऽस्त्री हयघोणायां ना कट्यामध्वगे
त्रिषु ॥ १० ॥ मंथः स्यात्पुंसि मंथाने साक्तवे च दिवाकरे ॥ यूथं तिर्यक्स-
मूहे ऽस्त्री पुष्पभेदे च योषिति ॥ ११ ॥ रथः पुमानवयवे स्यंदने वेतसेपि
च ॥ वीथी पंक्तौ गृहांगे च रूपकांतरवर्त्मनोः ॥ १२ ॥ संस्थस्त्वरे ऽवस्थि
ते स्त्री स्थितौ सादृश्यनाशयोः ॥ सार्थो वणिक्समूहे स्यादपि संघातमा
त्रके ॥ १३ ॥ सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकं ॥ ॥ ॥
थत्रिः ॥ ॥ अतिथिः कुशपुत्रे स्यात्पुमानागंतुके त्रिषु ॥ १४ ॥ ॥

अश्वत्थः पिप्पलद्रौस्यादश्वत्थापूर्णिमातिथौ ॥ अव्यथोनिर्व्यथे-
सर्पेचारटीपथ्ययोः स्त्रियां ॥ १५ ॥ उन्माथः कूटयंत्रेस्यान्मारणेघा
तकेपुमान् ॥ उपस्थः शेफशिश्नोडेनथामदनमंदिरे ॥ १६ ॥ उद्-
थोरथकालेस्यात्ताम्रचूडाख्यपक्षिणि ॥ क्षवथुर्नाक्षुते कासे का
यस्थः परमात्मनि ॥ १७ ॥ नरजातिविशेषेनाह र्थतक्यांतु योषिति
॥ कापथः कुत्सितपथेउशीरेक्लीबमिष्यते ॥ १८ ॥ गोग्रंथिर्नाक
रीषेस्याद्गोष्ठगोजिह्विकौषधौ ॥ दमथस्तुपुमान्दंडे दामेचपरिकी-
र्तितः ॥ १९ ॥ निशीथस्तुपुमानर्धरात्रेस्याद्रात्रिमात्रके ॥ निर्ग्रंथो
नग्नकेपिस्यान्निःस्वबालिशयोरपि ॥ २० ॥ प्रमथाःस्याद्धरीतक्यांह
रपारिषदेपुमान् ॥ वरूथोरथगुप्तौस्यात् वरूथंचर्मवेश्मनोः ॥
२१ ॥ मन्मथः कामचिंतायांकपित्थेकुसुमायुधे ॥ वयस्थातुस्त्रि
यांब्राह्मीगुडूच्यामलकीषुच ॥ २२ ॥ सूक्ष्मैलायांचकाकोल्यांपथ्यालीं
तरुणेत्रिषु ॥ वमथुः पुंसिवमनेगजस्यकरशीकरे ॥ २३ ॥ विदथो
योगिकृतिनोः शमथः शांतिमंत्रिणोः ॥ षड्ग्रंथातुवचायांस्त्री-
स्यात्करंजांतरेपुमान् ॥ २४ ॥ समर्थस्तुहितेशक्तेसंबद्धेप्यन्यलिंग
कः ॥ सिद्धार्थस्तुपुमान्शाक्यसिंहेचसितसर्षपे ॥ २५ ॥ ॥ थ
चतुः ॥ ॥ अनीकस्थोरणगतेहस्तिशिक्षाविचक्षणे ॥ राज
रक्षिणिचिह्नेचवीरमर्दनकेपिच ॥ २६ ॥ भवेदितिकथापार्थयाच्ञ
श्रद्धेयनष्टयोः ॥ चतुष्पथं चतुर्मार्गेसंगमेब्राह्मणेपिना ॥ २७ ॥ ॥
अथचित्ररथः सूर्यगंधर्वांतरयोःपुमान् ॥ दशमीस्थोनष्टवीर्ये
स्थविरेप्यन्यलिंगकः ॥ २८ ॥ प्राणनाथोयमेनास्यान्निष्टप्राणाधिपे
मतः ॥ वानप्रस्थोमधूकेपिस्यात्तृतीयाश्रमेपुमान् ॥ २९ ॥ भवेदुद
रथिः पुंसिसमुद्रेचवियन्मणौ ॥ ॥ इतिथांतवर्गः ॥ ॥
११४ ॥ ॥ देकं ॥ ॥ दः पुमानचलेदत्तेस्त्रियांशोधनदान
योः ॥ छेदोपतापरक्षासुपुमांस्तुदातरिस्मृतः ॥ १ ॥ ॥ द्विदं ॥ ॥

अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान् ॥ कंदोस्त्री सूरणे श
स्यमूलेजलधरेपुमान् ॥२॥ अंदूः स्त्रियांस्यान्निगडेप्रभेदे भूषणस्य
च ॥ कुंदो माघ्येऽस्त्री मुकुंदभ्रमिनिध्यंतरेषुना ॥३॥ क्षोदःस्या
त्सुंक्षिरजसिपेषणेचप्रकीर्तितः ॥ गदोभ्रातरिविष्णोःस्यादामयेना
सुधेगदा ॥४॥ छदः पलाशेगरुतिग्रंथिपर्णतमालयोः ॥ छंदोवशे
प्यभिप्राये धीदा पुत्रीमनीषयोः ॥५॥ नंदिर्द्यूतांगआनंदेऽस्त्रीनंदि
केश्वरेपुमान् ॥ नदीसरितिशोणादौना नंदास्याद्दलिंजरे ॥६॥ गौर्यांति
थिविशेषेस्त्रीनिधिराजभिदोःपुमान् ॥ निंदास्यादपवादेपि कुत्सायाम
पियोषिति ॥७॥ पदंशब्देचवाक्येचव्यवसायप्रदेशयोः ॥ पादतच्चिन्ह
योःस्थानत्राणयोरंकवस्तुनोः ॥८॥ श्लोकपादेपिचक्लीबंपुल्लिंगःकिरणे
पुनः ॥ पादोबुध्नेतुरीयांशेशैलप्रत्यंतपर्वते ॥९॥ चरणेचमयूरवेचवं-
द्यालतांतरेस्मृता ॥ भिक्षुक्यामपिवंद्यांच विंदुर्दंतक्षतांतरे ॥१०॥ भ्रु
वोर्मध्येरूपकार्यप्रकृतौपृषतेपुमान् ॥ वेदितर्यन्यलिंगःस्यात् भद्रंक
ल्याणशर्मणोः ॥ ११ ॥ भेदोद्वैधेविशेषेस्यात्उपजापेविदारणे ॥ मदो
रेतसिकस्तूर्यांगर्वेहर्षेभदानयोः ॥ १२ ॥ मंदोऽतीक्ष्णेचमूर्खेचस्वैरेचा
भाग्यरोगिणोः ॥ अल्पेचत्रिषुपुंसिस्याद्‌गजात्यंतरेशनौ ॥१३॥ मृ
दुःस्यात्कोमलेऽतीक्ष्णेरदोदंतेविलेखने ॥ विदाज्ञानेचनिर्दिष्टाम-
नीषायांचयोषिति ॥१४॥ वेदःश्रुतौचवृत्तेचवेदिःस्यात्पंडितेपुमान्
॥ स्त्रियामंगुलिमुद्रायांस्यात्परिष्कृतभूतले ॥१५॥ शादःस्यात्कर्दमे
शष्पेस्वादुर्मिष्टमनोज्ञयोः ॥ सूदस्तुकथितःसूपकारेचव्यंजनांत
रे ॥१६॥ स्वेदस्तुस्वेदनेघर्मेह्रदक्लीबंबुकचिन्नयोः ॥ ॥

॥ दत्रिः ॥ ॥ अंगदः कपिभेदेनाकेयूरेतुनपुंसकं ॥ १७ ॥
अंगदायाम्यदिग्दंतिहस्तिन्यामपियोषिति ॥ अर्द्धेंदुरर्द्धचंद्रेस्या
द्गलहस्तनखांकयोः ॥१८॥ अर्द्धेंदुःस्याद्दतिप्रौढस्त्रीयोन्यंगुलियोजने
॥ अर्बुदोमांसकीलेस्यात्पुरुषेदशकोटिषु ॥ १९ ॥ महीधरविशेषेना

ऽथास्पदं पदकृत्ययोः॥ आमंदो वासुदेवे स्यात्खड्गभेदे च योषिति
॥२०॥ आक्रंदः क्रंदने ह्वाने मित्रदारुणयुध्ययोः॥ भ्रातर्यपि च पुं
सि स्यादामोदो गंधहर्षयोः॥२१॥ ककुद् स्त्री ककुदोऽप्यस्त्री वृषां
केराड्ध्वजे वरे॥ क्षणदो गणके रात्रौ क्षणदा क्षणदं जले॥२२॥
कपर्दः खंडपरशोर्जटाजूटे वराटके॥ कर्णादुः क्षिप्तिकायां कर्ण
पाल्यामपि स्त्रियां॥२३॥ क्रव्याद्रक्षसि पुंसि स्यान्मांसाशिन्यन्यलिं
गकः॥ कामदा कामधेनौ स्त्री कामदातरि वाच्यवत्॥२४॥ कुमुद्
त्रिषु स्यात्कृपणे कैरवे तु नपुंसकं॥ कुमुदं कैरवे रक्तपद्मे स्त्री कुंभि-
कौषधौ॥२५॥ गंधार्यां पुंसि दिङ्नागनागशाखामृगांतरे॥ कुसीदं जी
वने वृद्ध्या क्लीबं त्रिषु कुसीदिके॥२६॥ कौमुदः स्यात्कार्तिके चंद्रि-
कायां तु कौमुदी॥ गोष्पदं गोपदश्वभ्रे गवां चरणिगोचरे॥२७॥ गो
विंदो वासुदेवे स्याद्गवाध्यक्षे बृहस्पतौ॥ गोनर्दमपि कैवर्तीमुस्तके
पुंसि सारसे॥२८॥ जलदो मुस्तके मेघे जीवदो वैद्यविद्विषोः॥ तरद्
स्त्रियां प्लवेऽपि स्यात्कारंडे च विहंगमे॥२९॥ तोयदो मुस्तके मेघे पुमा
नाज्ये नपुंसकं॥ दरद् स्त्रियां प्रपातेऽपि भयपर्वतयोरपि॥३०॥ दार-
दो विषभेदे स्यात्पारदे हिंगुले पुमान्॥ दायादस्तु भवेत्पुंसि सपिंडे त
नयेऽपि च॥३१॥ दृषद् निष्पेषणशिलापट्टप्रस्तरयोः पुमान्॥ ध-
नदस्तु कुबेरे स्यात्पुल्लिंगो दातरि त्रिषु॥३२॥ नलदं स्यात्पुष्परसो
शीरमांसीषु नद्वयोः॥ नर्मदः केलिसचिवे नर्मदा सरिदंतरे॥३३॥
निर्वादः स्याल्लोकवादे परिनिश्चितवादयोः॥ निषादः स्वरभेदे स्या
च्चंडाले धीवरांतरे॥३४॥ प्रमदः संमदे मत्ते स्त्रियामुत्तमयोषिति॥
प्रसादोऽनुग्रहे काव्यगुणस्वास्थ्यप्रसत्तिषु॥३५॥ प्रणादस्तु पु
मांस्तारशब्दे च श्रवणामये॥ प्रासादो देवनृपयोर्गृहेऽथ वरदा स्त्रि
यां॥३६॥ कन्यायां वाच्यलिंगस्तु प्रसन्ने च समर्द्धके॥ भसद् स्त्री-
भास्वरे योनौ मर्यादा सीमनि स्थितौ॥३७॥ माकंदः सहकारेऽ

स्त्रीधात्रीनगरभेदयोः॥ मुकुंदोनिधिभिद्विष्णुरत्नभेदेचकुंदुरौ
॥ ३८॥ मेनादस्तुपुमान्केकिमार्जारच्छगलेषुच ॥ विशादः पांड
रेवक्तेशरद्स्त्रीवत्सरेप्यृतौ॥ ३९॥ शारदोऽब्देस्त्रियांतोयपि
प्पलीसप्तपर्णयोः॥ सस्येक्लीबंशारज्ज्ञाननूतनाप्रतिभेत्रिषु॥ ४०॥
षड्बिंदुः स्यात्कीटभेदपुंडरीकाक्षयोःपुमान्॥ संपत्भूतौगुणोत्क
र्षेहारभेदेपिचास्त्रियां॥ ४१॥ संविद्स्त्रियांप्रतिज्ञायामाचारज्ञान
संगरे॥ संभाषणेक्रियाकारेसंकेतानामितोषणे॥ ४२॥ संभेदःस्यु
दनेसंगेसुनंदारोचनोमयोः॥ दचतुः अभिष्यंदोति
वृद्धौस्यादास्रावेक्षिगदेपिच॥ ४३॥ अष्टापदोऽस्त्रीकनकेशा
रिफलकेपिच॥ अष्टापदीचंद्रमल्ल्यांशरभेमर्कटेपुमान्॥ ४४
अववादस्तुनिंदायामाज्ञाविश्रंभयोरपि॥ अभिमर्दस्तुपुंसिस्या-
दवमर्देसंपरायेच॥ ४५॥ एकपदंतत्कालेनपुंसकंवर्त्मनिस्त्रीस्या
त्॥ कटुकंदःपुमान्शिग्रौशृंगवेररसोनयोः॥ ४६॥ कुरुविंदोर
त्नभेदेमुस्ताकुल्माषयोःपुमान्॥ अथकोकनदंरक्तकुमुदेरक्तपं
कजे॥ ४७॥ चतुष्पदीतुपद्येनापशौचकरणांतरे॥ भवेज्जनपदो
जानपदोपिजनदेशयोः॥ ४८॥ तमोनुदग्नींद्वर्केनाप्रतिपत्स्त्री
नि थौमतौ॥ परिवादोपवादेस्याद्वीणावादनवस्तुनि॥ ४९॥ प्रियं
वदःखेचरेनाप्रियवाचितुवाच्यवत्॥ पीठमर्दोऽतिधृष्टेस्यान्नाय
कस्यप्रियेपिच॥ ५०॥ पुटभेदोनदीवक्रेपत्तनातोद्ययोरपि॥ महा
नादःकुंजरेस्याद्दर्शुकाब्देमहास्वने॥ ५१॥ मुचुकुंदोवृक्षभेदेमांधा
तृतनयेपिच॥ मेघनादस्तुवरुणेतनयेरावणस्यच॥ ५२॥ विशार
दःपंडितेचधृष्टेविष्णुपदंतुखे॥ क्षीरोदश्चास्त्रियांगंगारविसंक्रां
निभेदयोः॥ ५३॥ शशबिंदुःपुमान्वासुदेवेराजांतरेपिच॥ शतानं
दोमुनिभेदेदेवकीनंदनेपिच॥ ५४॥ शतह्रदास्त्रियांवज्रेसौदा
मिन्यांचकीर्तिता॥ समर्यादःसमीपेनामर्यादासहितेत्रिषु॥ ५५॥

॥ दपंच ॥ भवेदुपनिषद्धर्मवेदांतविजनेस्त्रियां॥ सहस्रपादः कारंडेमार्तंडेयज्ञपूरुषे॥५६॥ ॥इतिदांतवर्गः॥ ॥धेकं॥ ॥धोनाधर्मेकुबेरेचक्लीबंतुवस्रुनिस्मृतं॥ धो धाचब्रह्मणिख्यातो धातुःस्याद्धारकेपिच॥१॥ धीर्ज्ञानेज्ञानभेदेपि धूः स्मृताधूननेस्त्रियां॥ ॥धद्विः॥ ॥अर्द्धसमांशेखंडेनाऽब्धिर्नासरसिवारिधौ॥२॥ अंधः स्यात्तिमिरे क्लीबंच-क्षुर्हीनेभिधेयवत्॥ आधिः पुमांश्चित्तपीडाप्रत्याशाबंधकेषुच॥३॥ व्यसनेचाप्यधिष्ठाने विद्धमातपदीप्तयोः॥ ऋद्धं संपन्नधान्येवसुसमृद्धेचवाच्यवत्॥४॥ ऋद्धिस्त्रस्त्र्योषधीभेदेसमृद्धावपियोषिति॥ गंधः प्रतिवेश्यामोदलेशसंबंधगंधके॥५॥ गाधः स्थानेचलिप्सायांगोधातलनिहाकयोः॥ दधिक्षीरोत्तरावस्थाभावेश्रीवाससर्जयोः॥६॥ दग्धं प्लुष्टेऽन्यलिंगंस्यात्स्थितार्केदिशिचस्त्रियां॥दिग्धोविषाक्तबाणेस्यात्पुंसिलिप्तेऽन्यलिंगकः॥७॥ दुग्धं प्रपूरितेक्षीरे दुग्धीक्षीराविकौषधौ॥ दोग्धार्थोपजीविकवौवत्सगोपालयोःपुमान्॥८॥ धद्धोवद्धतयोह्नते बंध आधौचबंधने॥ बंधुः स्यात्पुंसिबंधूके मित्रेभ्रातरिबांधवे॥९॥ बाधादुःखेनिषेधेचबुधः सौम्येचपंडिते॥ बुद्धोजिनेलब्धवर्णेपुंसिस्याद्बुधितेऽन्यवत्॥१०॥ बोधिः पुंसिसमाधेश्चभेदेपिप्पलपादपे॥ मधुपुष्परसेक्षौद्रेमद्येनातुमधुद्रुमे॥११॥ वसंतदैत्यभिच्चैत्रेस्याज्जीवंत्यांतुयोषिति॥ मिद्धं चित्ताभिसंस्वेपे क्लीबमालस्यचित्तयोः॥१२॥ मुग्धस्त्रसुंदरेमूढे मेधाबुद्धौक्रतौपुमान्॥ राधोमासांतरेराधाविद्युभेदेचधन्विनो॥१३॥ गोपीविशाखामलकीविष्णुक्रांतास्रविस्फृति॥ लुब्ध आकांक्षिणिव्याधेवधूः स्त्रीशारिवौषधौ॥१४॥ स्नुषाशटीनवोढास्त्रभार्यास्पृक्कांगनासुच॥ व्याधिःकुष्ठेचरोगेना व्याधोमृगयुदुष्टयोः॥१५॥ नारामयेखेचविधुर्नाकर्पूरेंदुहारिषु॥ विद्धंस्यादेधि-

तेक्षिप्तेसदृशेबाधिर्नेत्रिषु ॥१६॥ विधिर्नानियतौकालेविधानेपरमेष्ठि
नि ॥ विधागजासनेरुद्धौप्रकारेवेतनेविधौ ॥१७॥ वृद्धोजीर्णेप्रवृद्ध
ज्ञेत्रिषुक्लीबंतुशैलजे ॥ वृद्धिस्तुवर्द्धनेयोगेप्यष्टवर्गौषधांतरे ॥१८
कालांतरेचाभ्युदयेसमृद्धावपियोषिति ॥ श्रद्धाऽदरेचकांक्षायां
श्राद्धंश्रद्धान्वितेत्रिषु ॥१९॥ हव्यकव्यविधौक्लीबंशुद्धंस्यात्रिषुकेव
ले ॥ निर्दोषेचपवित्रेचसंधास्थितिप्रतिज्ञयोः ॥२०॥ स्पर्द्धासंघर्षणे
पिस्यात्साम्येक्रमसमुन्नतौ ॥ संधिःपुमान्स्फरुंगायांभगेसंघट्टने-
पिच ॥ २१ ॥ रूपकानांमुखाद्यंगेसावकाशेपिकीर्तितः ॥ स्कंधःस्या
न्नृपतावंसेसंपरायसमूहयोः ॥२२॥ कायेतरुप्रकांडेचभद्रादौछंद
सोभिदि ॥ साधुर्वार्धुषिकेचारौसज्जनेचाभिधेयवत् ॥ २३ ॥ सि
द्धोनाव्यासादौभेदेयोगस्यदेवयोनेश्च ॥ त्रिषुनिष्पन्नेस्निग्धंस्ने
हयुतेचिक्कणेपिस्यात् ॥ २४ ॥ सिंधुर्वमथुदेशाब्धिनदेनासरिति
स्त्रियां ॥ सिद्धिःस्त्रीयोगनिष्पत्तिपादुकांतर्द्धिवृद्धिषु ॥२५ ॥ स्र
धास्त्रीलेपनेमूर्व्यांस्नुहीगंगेष्टकामृते ॥ ॥ धत्रिः ॥ ॥
अवधिस्त्ववधानेस्यात्सीम्निकालेबिलेपुमान् ॥२६॥ अगाध
मतलस्पर्शेत्रिषुश्वभ्रेनपुंसकं ॥ अनद्धंमुरजादौचक्लीबंस्यात्संदि
तेत्रिषु ॥२७॥ आविद्धोवाच्यलिंगस्यात्कुटिलेचपराहते ॥ आब
द्धोदृढबंधेस्यात्प्रेमालंकारयोर्द्वयोः ॥२८॥ उत्सेधस्तूच्छ्रयेनस्त्री-
क्लीबंसन्नहनेपिच ॥ उपाधिर्धर्मचिंतायांकुटुंबव्यापृतेछले ॥ विशेष
णेपुंस्युपधिःपुंसिव्याजरथांगयोः ॥ कबंधोऽस्त्रीक्रियायुक्तव्यपमू
र्धकलेवरे ॥३०॥ क्लीबंजलेपुंस्युदरेबाहुरक्षोविशेषयोः ॥ दुर्विधोवा-
च्यलिंगःस्याद्दुर्गतेपिखलेपिच ॥ ३१ ॥ न्यग्रोधस्तुपुमान्व्यामवटयो
श्चशमीतरौ ॥ न्यग्रोधीवृषचित्रायांनिरोधोनाशरोधयोः ॥ ३२ ॥
निषधःकठिनेदेशेतद्राजेपर्वतांतरे ॥ परिधिर्नायज्ञियद्रुशाखा
यामुपसूर्यके ॥ ३३ ॥ प्रसिद्धोभूषितेख्यातेप्रणिधिर्नाऽनुचरेच

रे॥ मागधी स्त्रीकणायूथ्योर्वाच्यवन्मगधोद्भवे॥ ३४॥ पुंसि वैश्या ऽऽक्षत्रियाजे शुक्लजीरक बंदिनोः॥ विवधो वीवधश्चापि पर्याहारेऽध्व भावयोः॥ ३५॥ विश्रब्धोऽभुद्दष्टेपि स्याद्गाढविश्वस्तयोस्त्रिषु॥ विबुधो ज्ञे सुरे वीरुल्लताविटपयोः स्त्रियां॥ ३६ सन्नद्धो वर्मिते व्यूढे संबाधः संकटे भगे॥ संनिधिः सन्निधानेपि पुमानिंद्रियगोचरे॥ ३७ संसिद्धिः प्रकृतौ सिद्धौ मदोन्मायामपि स्त्रियां॥ संबोधो बोधने क्षेपे समाधिर्नासमर्थने॥ ३८॥ ध्याननीवाक्नियमे काव्यस्य च गुणांतरे॥ धचतुः ॥ अवरोधस्तिरोधाने राजदारेषु तद्गृहे ॥ ३९॥ अवष्टब्धोऽविदूरे स्यादाक्रांते चावलंबिते॥ अनुबंधस्तु बंधे स्याद्दोषोत्पादे विनश्वरे॥ ४०॥ मुख्यानुयायि बाले च प्रकृतस्यानिवर्तने॥ अनुबंधी तु हिक्कायां तृष्णायामपि योषिति॥ ४१॥ अनिरुद्ध उषानाथे पुंसि चाऽबंधनेऽन्यवत्॥ आशाबंधः समाश्वासे पुंसि मर्कट जालके॥ ४२॥ इष्टगंधः सुगंधौ स्यात् त्रिषु क्लीबं तु वालुके॥ इक्षुगंधा कोकिलाक्षे क्रोष्ट्यां काशे च गोक्षुरे॥ ४३ उपलब्धिर्मितौ प्राप्ताव विज्ञाने च योषिति॥ उग्रगंधाजमोदायां वचायां छिक्किकौषधौ॥ ४४॥ कालस्कंधस्तमाले स्यात्तिंदुके जीवकद्रुमे॥ तीक्ष्णगंधा वचाराजिकयोः शोभांजने पुमान्॥ ४५॥ तृणगोधा चित्रकोले कृकलासेपि योषिति॥ परिव्याधस्तु पुंसि स्याद्वेतसे च द्रुमोत्पले॥ ४६॥ ब्रह्मबंधुरधिक्षिते निर्देशे ब्राह्मणस्य ना॥ महौषधं तु शुंठ्यां स्याद्विषायां लशुनेपि च॥ ४७॥ समुन्नद्धः समुद्धूते पंडितंमन्यगर्विते॥ ॥ धपंच॥ योजनगंधा कस्तूर्यां सीतायां व्यासमातरि॥ ४८॥ ॥ इति धांतवर्गः॥ ॥ नैकम्॥ ॥ नः पुमान्सुगते बंधे हिंडे प्रस्तुते पि च॥ ॥ नद्विः॥ ॥ अग्निर्वैश्वानरेपि स्याच्चित्रकाख्यौषधौ पुमान्॥ १॥ अन्नं भक्ते च भुक्ते स्यादिनः पत्यौ नृपार्कयोः॥ उन्नं क्लिन्ने च स्फुरते कृत्स्नं सर्वांबुकुक्षिषु॥ २॥ घनं स्यात्कांस्यताला

दिवाद्यमध्यमनृत्ययोः॥ नामुस्ताब्धौ घदार्ढ्येषु विस्तारे लोहमुद्गरे॥
३॥ त्रिषु सांद्रे दृढे चाथ चिन्हं लक्ष्मपताकयोः॥ चीनो देशांशकव्रीहि
भेदे तंतौ मृगांतरे॥ ४॥ छन्नं तु रहसि क्लीबं छादिते वाच्यलिंगवत्॥
छिन्नं कृत्ते त्रिलिंगं स्याद्गुडूच्यामपि योषिति॥ ५॥ जनो लोके महर्लो
कात्परलोके च पामरे॥ जनी सीमंतिनी वध्वोरुत्पत्तावौषधीभिदि॥ ६॥
जन्हुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने॥ ज्यानिर्जीर्णे च हानौ च तटि
न्यामपि योषिति॥ ७॥ जिनोर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु॥ ज्यो
त्स्ना चंद्रातपेपि स्याज्ज्योत्स्नायुक्तनिशि स्मृता॥ ८॥ ज्योत्स्नी पटोलि
कायां स्याज्ज्योत्स्नायुक्तनिशि स्त्रियां॥ तनुः काये त्वचि स्त्री स्यात्त्रि
ष्वल्पे विरले कृशे॥ ९॥ दानं गजमदे त्यागे पालनच्छेदशुद्धिषु॥ दानुर्दा
तरि विक्रांते दीना स्त्री मूषिके स्त्रियां॥ १०॥ वाच्यवद्दुर्गते भीते द्युम्नं
वित्ते बलेपि च॥ धनुः पुमान्प्रियालद्रौ राशिभेदे शरासने॥ ११॥ धनं तु
गोधने वित्ते धाना भृष्टयवेपि च॥ धान्याके भिन्नबोड्न्ने धेनी नद्यां न
दे पुमान्॥ १२॥ नग्नो बंदिक्षपणयोः पुंसि त्रिषु विवाससि॥ न्यूनं गर्ह्योन
योः पानं पीतिभाजनरक्षणे॥ १३॥ भानुर्नाकिरणे सूर्ये भिन्नः स्यात्
त्रिषु दारिते॥ संगतेऽन्यत्र फुल्ले च मानश्चित्तोन्नतौ ग्रहे॥ १४॥ क्लीबं प्रमा
णे प्रस्थादौ मीनो राश्यंतरे झषे॥ मुनिः पुंसि वसिष्ठादौ वंकसेनतरौ जिने
॥ १५॥ मृत्स्ना मृत्सा तु वर्योः स्त्री यानं स्याद्वाहने गतौ॥ योनिः स्त्री पुं
सयोश्च स्यादाकरे स्मरमंदिरे॥ १६॥ रत्नं स्वजातिश्रेष्ठेपि मणावपि नपुंस
कं॥ रास्ना च स्याद्भुजंगाक्ष्यामेलापर्ण्यामपि स्त्रियाम्॥ १७॥ लग्नं राश्यु
दये क्लीबं सक्तलज्जितयोस्त्रिषु॥ वस्नस्त्ववक्रये पुंसि वेतने स्यान्नपुंस
कम्॥ १८॥ वनं नपुंसकं नीरे निवासालयकानने॥ वन्हिर्वैश्वानरेऽपि
स्याच्चित्रकाख्यौषधौ पुमान्॥ १९॥ वानं शुष्कफले शुष्कस्यूतिकर्मकटे
गतौ॥ विन्नं विचारिते लब्धे बुध्नो नामूलरुद्रयोः॥ २०॥ श्वा पुमान्कुक्कु
रे स्यात्तः स्यानभेदे च वास्तन॥ शीनो मूर्खे चाजगरे श्येनः पक्षिणि पा

दूरे॥२१॥ स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्॥ सानुरस्त्रीवने
प्रस्थे वात्यामार्गाग्रकोविदे॥२२॥ स्थानं सादृश्ये ऽवकाशे स्थितौ वृद्धिक्ष
येतरे॥ स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि॥२३॥ स्नानं स्ना
नीये ऽभिषवे सूनं प्रसवपुष्पयोः॥ सूना पुत्र्यां वधस्थाने गलशुंडिकयोः
स्त्रियां॥२४॥ सूनुः पुत्रेनुजेर्के ना सूनुः किरणसूर्ययोः॥ हनुर्हट्टवि
लासिन्यां स्नावरुज्ये गदे स्त्रियां॥२५॥ द्वयोः कपोलावयवे हीनं गर्ह्योन
योस्त्रिषु॥ ॥नत्रिः॥ ॥अंजनं कज्जले चाक्तौ सौवीरे च र-
सांजने॥२६॥ पुंसि ज्येष्ठादिग्गजयो रंजना वानरीभिदि॥ अंजनी ले
प्यनार्यां चावनं प्रीतौ च रक्षणे॥२७॥ अयनं पथि भानोरप्युदग्दक्षि-
णतो गतौ॥ अपानं तु गुदे क्लीबं पुंसि स्यात्तस्य मारुते॥२८॥ असनं
क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे॥ अंगनं प्रांगते याने कामिन्यामंग
नामना॥२९॥ अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः॥ मातुरेकसुते
पि स्यात्सुल्लिंगो धवलेऽन्यवत्॥३०॥ नपुंसकं तृणे नेत्रगदे चाप्यर्जुनी
गवि॥ उषायां बाहुदानद्यां कुट्टिन्यामपि च क्वचित्॥३१॥ अम्लानो महा
सहायां नान्यलिंगस्तु निर्मले॥ अर्शोघ्नी तालमूल्यां स्यादर्शोघ्नः सूर
णेपि च॥३२॥ असिक्नी स्यादवृद्धान्तःपुरप्रेष्यानदीभिदोः॥ अशनिः
स्त्रीपुंसयोः स्याच्चंचलायां पवावपि॥३३॥ अरत्निर्ना सप्रकोष्ठततांगु
लिकरेपि च॥ कफोणावप्यथाली स्याद्वृश्चिके भ्रमरे पुमान्॥३४॥ अ
र्थी पुमान्याचके स्यात्सेवके च विवादिनि॥ अध्वा ना पथि संस्थाने-
स्यादवस्कंद कालयोः॥३५॥ अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिंगकः॥
आसनं द्विरदस्कंधे पीठे यात्रानिवर्तने॥३६॥ आसनी विपणौ स्थि
स्यामासनो ना तु जीरके॥ आदानं ग्रहणेपि स्यादलंकारे च वाजिनाम्
॥३७॥ आपन्नः सविपत्तौ च प्राप्ते वाच्यवदीरितः॥ आत्मा पुंसि स्व
भावेपि प्रयत्नमनसोरपि॥३८॥ धृतावपि मनीषायां शरीरब्रह्मणोर
पि॥ आलानं करिणां बंधस्तंभे रज्जौ च नास्त्रियां॥३९॥ ईशानं ज्यो

षिक्लीबंपुल्लिंगःस्यात्त्रिलोचने॥ उत्तानमगभीरेस्यादूर्ध्वास्यशयिते त्रिषु॥ ४०॥ उत्थानमुद्यमेतंत्रेपौरुषेपुस्तकेरणे॥ प्रांगणोद्गमहर्षेषुमलरोगेपिनद्वयोः॥ ४१॥ उद्यानंस्यान्निःसरणेवनभेदेप्रयोजने॥ उदानोप्युदरावर्तेवायुभेदेभुजंगमे॥ ४२॥ उद्धानमुद्गनेवाच्यलिंगंचुल्यांनपुंसकम्॥ ओदनंनस्त्रियांभक्तेबलायामोदनीस्त्रियां॥ ४३॥ कमनःकामुकेकामेऽभिरूपेःशोकपादपे॥ कंपनंनद्वयोःकंपेकंप्रेस्यादभिधेयवत्॥ ४४॥ कठिनमपिनिष्ठुरेस्यात्स्तब्धेपित्रिषुनपुंसकंस्थाल्यां॥ कठिनीखटिकायामपिकठिनागुडशर्करायांच॥ ४५॥ क्रंदनंरोदनेपिस्यादाह्वानेप्यथकल्पना॥ करिणःसज्जनायांस्त्रीक्लीबंक्लृप्तौचकल्पने॥ ४६॥ कर्त्तनंनद्वयोश्छेदेनारीणांसूत्रनिर्मितौ॥ कर्मास्त्रीव्याप्यक्रिययोःकदनंमर्दपापयोः॥ ४७॥ कांचनःकांचनारेस्याच्चंपकेनागकेसरे॥ उदुंबरेचधत्तूरेहरिद्रायांचकांचनी॥ ४८॥ क्लीबेञ्जकेसरेहेम्निकामिनीभीरुवंद्योः॥ कामीतुकामुकेचक्रवाकेपारावतेप्यिच॥ ४९॥ कानीनःकन्यकाजाततनयेव्यासकर्णयोः॥ काकिनीपणपादेपिमानपात्रवराटके॥ ५०॥ काननंविपिनेगेहेपरमेष्ठिमुखेप्यिच॥ कुहनंमृत्तिकाभांडविशेषेकाचभाजने॥ ५१॥ कुहनादंभचर्यायामीर्ष्यालौकुहनंत्रिषु॥ कृतीस्यात्पंडितेयोग्येकेतनंतुनिमंत्रणे॥ ५२॥ गृहेकेतौचकृत्येथकेशीकेशवनित्रिषु॥ दैत्येनान्तौरपुष्प्यांस्त्रीकौलीनंगुह्यजन्ययोः॥ ५३॥ कुकर्मणिकुलीनस्तेयुद्धेपश्वहिपक्षिणां॥ कौपीनंस्यादकार्येचचीरगुह्यप्रदेशयोः॥ ५४॥ खलिनीखलवृंदेस्यात्तालपर्ण्यामपिस्त्रियां॥ खंजनंखंजरीटेस्त्रीसर्षप्यांखंजनंगतौ॥ ५५॥ खड्गीनागंजकेमंजुघोषेखड्गधरेत्रिषु॥ गर्जनंनिनदेकोपेगहनंकलिलेत्रिषु॥ ५६॥ नपुंसकंगह्वरेस्याद्दुःखकाननयोरपि॥ गंधनमुत्साहेस्यात्प्रकाशनेसूचनेपिहिंसायां॥ ५७॥ ग्रामीनःशुनिकाकेपुंसित्रिषुसंभृतेग्रामे॥ ग्रावातुप्रस्तरेपृथ्वी-

धरेपुंस्यथगर्जनम् ॥५८॥ विषदग्धपशोर्मांसेक्लीबंपुंसिरसोनके
॥गोस्तनो हारभेदेस्याद्द्राक्षायांगोस्तनीस्त्रियाम्॥५९॥गोमी
शृगालेपुंसिस्यात्त्रिषुगोमत्युपासके॥ घटना चलनावृत्त्योश्चंदनी
तुनदीभिदि॥६०॥ चंदनोऽस्त्रीमलजयेभद्रकाल्यांनपुंसकं॥च
लनंभ्रमणेकस्येकंपेतुवाच्यलिंगकम्॥६१॥ चलनीवस्त्रयोषि-
त्स्यांचारीभेदेपिचक्वचित्॥ चक्री जालिकभित्कोककुलालाजाहि
सूचके॥६२॥ चर्मीफलकपाणौस्याद्भूर्जेभृंगरिटावपि॥चर्मकृन्तो
चफलकेचेतनासंविदिस्त्रियाम्॥६३॥वाच्यवत्प्राणयुक्तेथ छद्म
व्याजापदेशयोः॥ छर्दनंवमनेक्लीबंनिंबालंबुषयोःपुमान्॥६४॥
छदनं छदनेपक्षेपिधानेछेदनंभिदि॥ कर्तनेजगनुःपुंसिजंतौवै
श्वानरेपिच॥६५॥जवनंतुस्यदेवेगिहयेनावेगिनित्रिषु॥ जन
नीतुदयामात्रोर्जननंवंशजन्मनोः॥६६॥जयनंस्यात्तुरंगादिस
न्नाहेविजयेऽपिच॥जघनंचस्त्रियाःश्रोणिपुरोभागेकटावपि॥६७
ज्ञानीस्यात्पुंसिदैवज्ञेज्ञानयुक्तेन्यलिंगकः॥ जीवनंवर्त्तनेनीरमा
णधारणयोरपि॥६८॥ जीवनीजीवनाचापिजीवंतीभेदयोःक्रमा
त्॥तपनोरुष्करेपिस्याद्भास्करेनिरयांतरे॥६९॥ तलूनःपवनेयूनि
युवत्यांतलुनीस्मृता॥ तलिनंविरलेस्तोकेस्वच्छेपिवाच्यलिंगकम्
॥७०॥ तमोघ्नःसूर्यवह्न्यिंदुबुद्धशंकरविष्णुषु॥ त्यागीदातरिशूरेऽथ
तेवनंकेलिकानने॥७१॥क्रीडायांतेमनंत्वार्द्रीकरणेव्यंजनेपिच॥ ते
जनःपुंसिवंशेस्यात्तेजनीतृणपूलके॥७२॥ तोदनंव्यथनेतोत्रे
दंशनंदंशवर्मणोः॥ दर्शनंनयनस्वप्नबुद्धिधर्मोपलब्धिषु॥७३॥शा
स्त्रदर्पणयोश्चाथ दमनःपुष्पधीरयोः॥दशनःशिखरेदंतेकवचेतु-
नपुंसकम्॥७४॥दहनश्चित्रकेभल्लातकेग्नौदुष्टचेष्टिते दशानंज्यो
तिषिक्लीबंपुल्लिंगःस्याद्द्रोन्वने॥७५॥देवनंव्यवहारेस्याज्जिगीषा-
क्रीडयोरपि॥ देवनोऽक्षेतुपुंसिस्याद्ध्वजीतुपृथिवीधरे॥७६॥

रथब्राह्मणयोश्चापिभुजंगमतुरंगयोः॥धन्वीधनुर्धरेपिस्यादर्ह-
णेककुभद्रुमे॥७७॥धन्वातुमरुदेशेनाक्लीबंचापेस्थलेपिच॥
धमनोऽनानलेभस्त्राऽध्मापकक्रूरयोःस्त्रिषु॥७८॥धमनी
तुशिराहट्टविलासिन्योश्चयोषिति॥धावनंगमनेशुद्धौपृश्निप-
र्ण्यांतुधावनी॥७९॥धामदेहेगृहेरश्मौस्थानेजन्मप्रभावयोः
नंदनंवासवोद्यानेनंदनोहर्षकेसुते॥८०॥नंदीहरप्रतीहारे
गर्दभांडेवनद्रुमे॥नंदिन्युमायांगंगायांननांदृधेनुभेदयोः॥८१
नलिनीपद्मिनीव्योमनिम्नगाकमलाकरे॥नपुंसकंनीलिकायां
नपुंसिसरसीरुहे॥८२॥निदानंकारणेवत्सदामादिकारणक्षये
निधनंस्यात्कुलेनाशेप्रधनंदारणेरणे॥८३॥पवनंकुंभकार
स्यपाकस्थानेनपुंसकम्॥निष्पावमारुतौपुंसिप्रज्ञानंबुद्धिचि
ह्नयोः॥८४॥प्रधानंस्यान्महामात्रेप्रकृतौपरमा त्मनि॥प्रज्ञा
यामपिचक्लीबमेकत्वेतूत्तमेसदा॥८५॥पद्मिनीपद्मसंघाते
स्त्रीविशेषेसरोरुहे॥प्रसन्नास्त्रीसुरायांस्यात्स्वच्छसंतुष्टयोस्त्रिषु
॥८६॥प्रसूनोवाच्यवज्जातेक्लीबंतुफलपुष्पयोः॥पत्रीश्येनेपत्र
रथेकांडद्रुरथिकादिषु॥८७॥पर्वक्लीबंमहेग्रंथौप्रस्तावेलक्षणांत
रे॥दर्शप्रतिपदोःसंधौविषुवत्प्रभृतिष्वपि॥८८॥सूक्ष्मसूत्रादिसू
क्ष्मांशेकिंजल्केनेत्रलोमनि॥पाठीनोमीनभेदेस्यात्पाठकेगुग्गुल
द्रुमे॥८९॥पावनंतुजलेकृच्छ्रेनाव्यासेपावकेपिच॥पाचनं
दशमूल्यादौप्रायश्चित्तेचवनानले॥९०॥वाच्यवत्पाचयितरिहरीत
क्यांतुयोषिति पाशीव्याधेचवरुणेपिशुनंकुंकुमेपिच॥क-
पिवक्त्रेचकाकेनासूचककूरयोस्त्रिषु॥पृक्कायांपिशुनास्त्री
स्यात्पीतनंपीतदारुणि॥९२॥कुंकुमेहरितालेचपुमानाम्रातके
मतः॥पूतनातुहरीतक्यांदानवीरोगभेदयोः॥९३॥पृतनातु
स्त्रियांसेनामात्रसेनाविशेषयोः प्रेमानावासवेवातेप्रेमा:

स्त्री स्नेहहर्षयोः॥९४॥ फलिन्यग्निशिखायां स्त्री फलिन्यां फलिनं त्रिषु॥ फाल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे॥९५॥ तपस्यसंज्ञे मासे तत्पूर्णिमायां तु फाल्गुनी॥ ब्रध्नस्तु लवणे वेदे न द्वयोः पुंसि वेधसि॥९६॥ क्लिष्ट्योगभिदोर्विघ्ने बंधनं वधबंधयोः॥ वंदनी नतिजीवातु कटीमाचलकर्मसु॥९७॥ वाहिनी स्यात्तरंगिण्यां सेनासैन्यप्रभेदयोः॥ वाणिनी नर्तकीमत्ताविदग्धवनितासु च॥ ९८॥ बुधानस्तु गुरौ विज्ञे बोधनं गंधदीपने॥ बोधिनी बोधिपिप्पल्योर्भर्मस्यात्कांचने भृतौ॥९९॥ भंडनं कवचे युद्धे खलीकारेपि न द्वयोः॥ भट्टिनी द्विजभार्यायां नाट्योक्त्यां राजयोषिति॥१००॥ भवनं स्याद्गृहे भावे भाजनं योग्यपात्रयोः॥ भावना तु ननाध्याने पर्यालोचेधिवासने॥१॥ भुवनं पिष्टपेपि स्यात्सलिले गगने जने॥ भोगी भुजंगमेपि स्याद्ग्रामपालेनृपेपुमान्॥२॥ विहाय महिषीमन्यराजयोषिति भोगिनी॥ मदनः स्मरवसंतद्रुभिद्रूस्तूरसिक्थके॥३॥ मलनः पटवासे नामर्दनं तु नपुंसकम्॥ मलिनं दूषिते कृष्णे ऋतुमत्यां तु योषिति॥४॥ मंडनं भूषणे क्लीबं स्यात्त्रिष्वलंकरिष्णुनि॥ मार्जनं न द्वयोर्मार्ष्टौ पुंसि स्याल्लोध्रशाखिनि॥५॥ मालिनी मातृकाछंदभिदोर्मालिकयोषिति॥ गौरीचंपानगर्योश्च मंदाकिन्यां नदीभिदि॥६॥ मानिनी तु स्त्रियां फल्यां मानी मानवति त्रिषु॥ मिथुनं तु द्वयो राशिभेदे स्त्रीपुंसयुग्मके॥७॥ मुंडनं वपने त्राणे मेहनं मूत्रशिश्नयोः॥ मैथुनं सुरतेपि स्यात्संगतेपि नपुंसकम्॥८ यमनं बंधने चोपरतौ क्लीबं यमे पुमान्॥ यवनो देशभेदे नावेगिवेगाधिकाश्वयोः॥९॥ यावान्यौषधिभेदे स्त्री वाच्यवद्गिनि स्मृता॥ यापनं वर्तने कालक्षेपे निरसने पि च॥१०॥ युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि॥ युंजानः सारथौ विप्रे योजनं परमात्मनि॥११॥ चतुः क्रोशयां च योगेऽथ रसनं स्वदने ध्वनौ॥ जिह्वायां तु न पुंसि स्या

द्वास्नायां रसना स्त्रियाम् ॥१२॥ रंजानो रागजनने रंजनं रक्त
चंदने॥ शुंडारोचनिकानीलीमंजिष्ठासु च रंजनी ॥१३॥ रजनी
नीलिनी रात्रिहरिद्राजतुकासु च॥ राधनं साधने प्राप्तौ राधना
भाषणे स्त्रियाम् ॥१४॥ राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ॥
यक्षे शक्रे च पुंसि स्याद्रागी रक्तेऽपि कामुके ॥१५॥ रेचनी त्रिवृता
दंत्यो रेचनी कर्कशे स्त्रियाम्॥ रोचना रक्तकल्हारे गोपित्तवर
योषितोः॥१६॥ रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु॥ रो
दनं क्रंदनेऽस्रेऽपि दुरालभौषधौ स्त्रियाम्॥१७॥ रोही रोहितकेऽश्व
त्थवटपादपयोः पुमान्॥ लंघनं तूपवासे स्यात्क्रमणे प्लवनेऽपि
च॥१८॥ ललना कामिनीनारीभेदजिह्वासु योषिति॥ लक्ष्म
चिह्ने प्रधाने च लांछनं मानचिह्नयोः॥१९॥ खेलनं छर्दने भ्र
ंशे लिपिन्यासेऽथ वर्जनम्॥ हिंसात्यागयोर्वपनं बीजाधाने च मुं
डने॥२०॥ वसनं छादने वस्त्रे वमनं छर्दनेऽर्दने॥ वर्द्धनं छेदिव
र्द्धिष्णुच्छेदे स्यात्तु वर्द्धिनी॥२१॥ व्यंजनं तेमने चिह्ने श्मश्रुण्य
वयवे हनि॥ व्यसनं त्वशुभे सक्तौ पानस्त्रीमृगयादिषु॥२२॥ दै
वानिष्टफले पापे विपत्तौ निष्फलोद्यमे॥ वर्तनो वामने क्लीबं वृत्तौ
स्त्री प्रेषणाध्वनोः॥२३॥ नपुंसि तु ललनालायां तर्कुपीठे च जीवने॥
वर्तिष्णौ त्रिषु वज्री तु कुलिशे देवाधिपे पुमान्॥२४॥ वचक्नुस्तु पु
मान्विप्रे वावदूकेऽभिधेयवत्॥ वर्णी स्याल्लेखके चित्रकरेऽपि ब्र
ह्मचारिणि॥२५॥ वर्ष्म देहप्रमाणातिसुंदराकृतिषु स्मृतम्॥ व
र्त्मनेत्रच्छदे मार्गे वाजी वाणाश्वपक्षिषु॥२६॥ वामनो न्यूनाति
खर्वे च त्रिषु पुंसि तु दिग्गजे॥ ह्रस्वांकोठवृक्षेऽथ वासनं धूपने
ऽपि च॥२७॥ वारिधान्यां च वस्त्रे च प्रत्याशाज्ञानयोः स्त्रियाम्॥
वाग्मी पटौ सुराचार्ये विज्ञानं ज्ञानकर्मणोः॥२८॥ वितु-
न्नं सुनिषण्णे च शैवाले च नपुंसकम्॥ विमानो व्योमयाने-

चसार्वभौमगृहेपिच॥ २९॥ घोटकेयानपात्रेचपुंनपुंसकयोर्मतः॥ वितानोयज्ञउल्लोचेविस्तारेपुन्नपुंसकम्॥ ३०॥ क्लीबंवृत्तविशेषेस्यात्त्रिलिंगोमन्ततुच्छयोः॥ विक्लिन्नोजरसाजीर्णेशीर्णेचार्द्रेचवाच्यवत्॥ ३१॥ विपन्नंविपदाक्रांतेत्रिषुपुंसिभुजंगमे॥ विच्छिन्नंचसमालब्धेविभक्तेप्यभिधेयवत्॥ ३२॥ विलग्नंनस्त्रियांमध्येत्रिषुस्याल्लग्नमात्रके॥ विषघ्नस्तुशिरीषेनागुडूचीत्रिवृतोःस्त्रियाम्॥ ३३॥ व्युत्थानंस्वातंत्र्यकृत्येविरोधाचरणेपिच॥ वृजिनंकल्मषेक्लीबंकेशेनाकुटिलेत्रिषु॥ ३४॥ वृषाकर्णेमहेंद्रे ना वेदनाज्ञानदुःखयोः॥ वेष्टनंकर्णशष्कुल्यामुष्णीषेमुकुटेवृतौ॥ ३५॥ व्योमवारिणिचाकाशेभास्करस्यार्चनाश्रये॥ शकुनिःपुंसिविहगेसौबलेकरणांतरे॥ ३६॥ शयनंसुरतेनिद्राशय्ययोश्चनपुंसकं॥ शमनंशांतिवधयोःशमनःश्राद्धदेवने॥ ३७॥ श्वसनंस्वसितेपुंसिमारुतेमदनद्रुमे॥ शकुनस्तुपुमान्पक्षिमात्रपक्षिविशेषयोः॥ ३८॥ शुभशंसिनिमित्तेचशकुनंस्यान्नपुंसकं॥ शंखिनीश्वेतचुक्रायांचौरपुष्प्यांवधूभिदि॥ ३९॥ शंबरीहरोसमुद्रेनाशंखवत्यभिधेयवत्॥ शतघ्नीशस्त्रभेदेस्यात्वृश्चिकाल्यांकरंजके॥ ४०॥ शासनंराजदत्तोर्व्यांलेखाज्ञाशास्त्रशांतिषु॥ शाखीस्यात्पादपेवेदेतुरुष्काख्यजनेपुमान्॥ ४१॥ शिखीवन्हौबलीवर्देशरेकेतुग्रहेद्रुमे॥ मयूरेकुक्कुटेपुंसिशिखावत्यन्यलिंगकः॥ ४२॥ शिल्पीतुवाच्यवत्कारौस्त्रियांकोलदलौषधौ॥ शृंगीशृंगयुतेनागेवृषपर्वतयोरपि॥ ४३॥ श्लेष्मघ्नीमल्लिकायांचज्योतिष्मत्यांचयोषिति॥ शोभनोयोगभेदेनासुंदरेवाच्यलिंगकः॥ ४४॥ सवनंत्वध्वरेस्नानेसोमनिर्दलनेपिच॥ स्तननंध्वनिमात्रेस्यान्मेघशब्देचकुंथिते॥ ४५॥ समानःसत्समैकेषुत्रिषुनाभिमारुते॥ संतानःसंततौगोत्रेस्यादपत्येसुरद्रुमे॥ ४६॥ स्पर्शनोमारुतेपुंसिदानेस्पर्शेनपुंसकम्॥ संस्थानमाकृतौमृत्यौसन्निवेशेचतुष्पथे॥ ४७॥ स्यंदनंतुस्रुतौनीरेतिनिशेनारथेऽस्त्रि

याम्॥ सज्जनं तु भवेत्क्लीबमुपरक्षणघट्टयोः॥ ४८॥ वाच्यलिंगं कुलीने स्यात्कल्पनायां तु योषिति॥ संधानं स्यादभिषवे तथा संघट्टनेपि च॥ ४९॥ संपन्नं साधितेपि स्यात्संपत्तिसहितेन्यवत्॥ संधिनी वृषभाक्रांता कालदुग्धोस्त्वयोः स्त्रियाम्॥ ५०॥ सद्मस्यान्मंदिरेनीरे संव्यानं छादनेंशुके॥ सदनं मंदिरे तोये स्वामी प्रभुविशाखयोः॥ ५१॥ सादी तुरंगमातंगरथारोहेषु दृश्यते॥ स्थापनं रोपणे पुंसि वने पार्गौषधौ स्त्रियां॥ ५२॥ सावनो यज्ञकर्मांते यजमान प्रचेतसोः॥ साधनं मृतसंस्कारे सैन्ये सिद्धौषधौ गतौ॥ ५३॥ निर्वर्तनोपायमेद्रदापनेऽनुगमे धने॥ सामक्लीबमुपायस्य भेदे वेदांतरेपि च॥ ५४॥ सीमा घाटस्थितिक्षेत्रेष्वंडकोषेऽपि च स्त्रियां॥ सूचना व्यधने दुष्टेगंधनेऽभिनयेपि च॥ ५५॥ सेचनं रक्षणे सेके नौकायाः सेकभाजने॥ सेनानीः स्यात्पुमान्कार्तिकेये सेनापतावपि॥ ५६॥ सेवनं सीवनोपास्त्योर्हलीरामे च कर्षके॥ हस्तिनी गजयोषायां जातिभेदे च योषितः॥ ५७॥ हसनं च द्वयोर्हासे ऽगारधान्यां तु योषिति॥ हायनो नस्त्रियां वर्षे पुंस्यर्चिर्व्रीहिभेदयोः॥ ५८॥ ह्रादिनी वज्रतडितोर्हिंडनं भ्रमणे रते॥ ॥

नचतुः॥ ॥ अवलग्नो ऽस्त्रियां मध्ये त्रिषु स्याल्लग्नमात्रके॥ ५९ अनूचानो विनीते स्यात्सांगवेदविचक्षणे॥ अवाचीनमवाग्रंधे विपर्यस्ते न वाच्यवत्॥ ६०॥ अभिपन्नो ऽपराधे भिग्रस्ते चापद्गतेत्रिषु॥ अवदानं खंडने स्यादतिवृत्तेच कर्मणि॥ ६१॥ अभिमानो ऽर्थादिदर्पे ऽज्ञाने प्रणयहिंसयोः॥ अनीकिनी स्त्रियां सेनामात्रसेनाविशेषयोः॥ ६२॥ अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेपि च॥ अन्वासनं स्नेहवस्तावुपास्त्यावनुशोचने॥ ६३॥ अर्यमा तु पुमान्सूर्ये पितृदेवांतरेपि च॥ अथर्वा ब्राह्मणे पुंसि वेदे तु स्यान्नपुंसकम्॥ ६४॥ पुवेदभिजनः ख्यातो जन्मभूम्यां कुलध्वजे॥ कुलेपि च पुमानायोधनं युद्धवधेपि च॥ ६५॥ स्यादाकलनमाकांक्षापरिसंख्यानबंधने॥

आतंचनंप्रतीवापपवनाप्यायनेषुच॥ ६६॥ आराधनंचपचनेप्रा
प्तौसंतोषणेपिच॥ आच्छादनंसंपिधानेवस्त्रेःपत्त्रतिमात्रके॥६७
आस्कंदनंतिरस्कारेरणेसंशोषणेपिच॥ आवेशनंशिल्पिशाले
भूतावेशप्रवेशयोः॥६८॥ आत्मयोनिःपुमान्कामदेवेचपरमेष्ठिनि
॥उपधानंविषेगंडोप्रणयेपिनपुंसकं॥६९॥ उत्सादनंसमुल्लेखो
द्वाहनोद्वर्तनेषुच॥ स्यादुत्पतनमुत्पत्तौतयोर्ध्वगमनेऽपिच॥७०॥
उद्वर्तनमुत्पतनेविलेपनेघर्षणेक्लीबं॥ उद्दयनमुदयेक्लीबंचसेशा
गस्त्ययोःपुंसि॥७१॥ उद्वाहनंप्रणीतेस्यात्स्त्री मुद्वाहनीमता॥उ
पासनंशराभ्यासेप्युपास्तावासनेपिच॥७२॥ कर्पाननोगर्दभांड
शिरीषाम्रातकेषुच॥ अश्वत्थेचकलापीतुप्लक्षबर्हिणयोःपुमान्॥
७३॥ कलध्वनिःपुमान्पारावतेपिकमयूरयोः॥ कन्युक्यंतःपुरा-
ध्यक्षेषिड्गेःहौजोंगकद्रुमे॥७४॥ कात्यायनोवररुचौविशेषेचमु
नेःपुमान्॥ काषायवस्त्रेविधवाईजरत्पुमयोःस्त्रियाम्॥७५॥कुं
भयोनिरगस्त्येस्याद्वसिष्ठद्रोणयोःपुमान्॥ कुचंदनंचपत्त्रांगेद्रुमे
देरक्तचंदने॥७६॥ कुंडलीवरुणेकेकि भोगिनोश्वसकुंडले केस
रीतुरगेसिंहेपुन्नागेनागकेसरे॥७७॥ क्रौंचादनंतुघेंचुल्यां चिंचो
टकमृणालयोः॥ खड्गधेनुःस्त्रियांखड्गपुत्रिकागंडकस्त्रियोः॥७८
॥गवादनींद्रवारुण्यांगवांघासादनाश्रये॥ गदयित्नुःपुमान्का
मेजल्पाकेकामुकेपिच॥७९॥ घनाघनोवर्षुकाब्देमत्तघातुककुंज
रे॥ चक्रेच घोषयित्नुस्तुविप्रकोकिलयोःपुमान्॥ ८०॥ चित्रभा
नुःपुमान्वैश्वानरेचाहस्करेपिच॥ चोलकीतुकर्थरेस्यान्नारंगे-
विष्कुपर्वणि॥८१॥ जलाटनोलोहपृष्ठेजलौकायांजलाटनी॥
तपस्वीतापसेचानुकंप्येत्रिष्वथयोषिति॥८२॥ मांसिकाकटुरो
हिण्योस्तरस्वीशूरवेगिनोः॥तपोधनस्तापसेस्यान्मुंडिर्यांतुतपो
धना॥८३॥ द्विजन्मादशनेविप्रेदुर्नामक्लीबमर्शसि॥ स्याद्दीर्घको

षिकायांस्त्री देवसेनातुवज्रिणः॥ ८४॥ सुनायामपिसेनायांदेवना
नांचयोषिति॥ नागांजनेभस्कंदर्यांनागयष्टौचयोषिति॥ ८५॥ भवे
न्निधुवनंकंपेस्फुरतेचनपुंसकं॥ निर्वासनंहिंसनेस्यान्नगराद
बहिष्कृतौ॥ ८६॥ निर्भर्त्सनंखलीकारेऽलक्तकेपिनपुंसकं॥ नि
र्यातनंवैरशुद्धौदानेन्यासार्पणेपिच॥ ८७॥ निशामनंदर्शनेस्या
दालोचनेचनद्वयोः॥ निशमनमुक्तंदृष्टौश्रुतौनिरसनंवधेप्र
निक्षेपे॥ ८८॥ निष्ठीवनेप्रजननंयोनौजन्मन्यपिक्लीबं॥ प्रसह
नमपिभंगेस्यात्क्षेपेपंचाननःशिवेसिंहे॥ ८९॥ प्रहसनमपि
प्रहासेरूपकभेदेचपरिहासे॥ प्रणिधानंप्रयत्नेस्यात्समाधौचप्र
वेशने॥ ९०॥ प्रयोजनंकार्यहेत्वोः पलाशीवृक्षरक्षसोः॥ अथ
प्रवचनंवेदेप्रकृष्टवचनेऽपिच॥ ९१॥ प्रतिपन्नोऽन्यलिंगःस्याद्विज्ञा
तेंगीकृतेपिच॥ प्रस्फोटनंतुशूर्पेस्यात्ताडनेचविकाशने॥ ९२॥ प्र-
तिमानंप्रतिछायागजकुंभांतरालयोः॥ प्रतियत्नस्तुसंस्कारलि-
प्सोपग्रहणेषुच॥ ९३॥ प्रत्यर्थीवाच्यलिंगःस्याच्छत्रौचप्रतिवादिनि
॥ परिज्वातुपुमानिंदौयाज्ञिकेपरिचारके॥ ९४॥ प्रसाधनीतुकंक
त्यांसिद्धौवेशेप्रसाधनं॥ पयस्विनीनदीधेन्वोर्विभावर्यांचयोषि
ति॥ ९५॥ अथपुण्यजनोयक्षेराक्षसेसज्जनेपिच॥ पृथग्जन
स्तुपुल्लिंगःकथितोनीचमूर्खयोः॥ ९६॥ फलकीमत्स्यभेदेनावा-
च्यवत्फलकान्विते॥ वारकोशत्रुचित्राश्वपर्णौजीवपयोधिषु॥ ९७
॥ भूतात्मापुंसिनिर्दिष्टोदेहेचपरमेष्ठिनि॥ महाधनंमहामूल्येसु
वर्णेसिल्हकेपिच॥ ९८॥ महासेनः कार्तिकेयेमहासैन्यपतावपि
॥ मदयित्नुर्मेघमदनेपुमान्मद्येनपुंसकं॥ ९९॥ महामुनिरगस्त्ये
नाकुस्तुंबुरुणिनद्वयोः॥ मातुलानीकलायेस्याद्भंगायांमातुलस्त्रि
याम्॥ २००॥ मालुधानोमातुलाहौमालुधानीलतांतरे॥ मेधावी-
नाशुकेब्राह्म्यांस्त्रियांमेधाविनीत्रिषु॥ २०१॥ रसायनंविषेपिस्या

ज्जराव्याधिजिदौषधे॥पुल्लिंगः पक्षिराजेचविडंगाख्यौषधेपिच॥
२॥राजादनंक्षीरिकायांपियालेकिंशुकेपिच॥ललामस्यात्प्रभा
वेचलांछनध्वजवाजिषु॥३॥शृंगेप्रधानेभूषायामपिवालधिपुंड्र
योः॥लांगलीनालिकेरेद्रौरेवतीरमणेपुमान्॥४॥वनश्वागंधमा
र्जारेवंचकव्याघ्रयोःपुमान्॥वर्धमानःपुरभेदेशरावेरंडविष्णु
षु॥५॥विस्मापनःस्यात्कुहकेगंधर्वनगरेस्मरे॥विसर्जनंप-
रित्यागेदानेसंप्रेषणेपिच॥६॥विरोचनःप्रल्हादस्यतनयेऽर्केऽ
ग्निचंद्रयोः॥विहेठनंतुहिंसायांमर्दनेचविडंबने॥७॥भवेद्विहन
नंविघ्नहिंसयोस्तूलपिंजने॥विषयीविषयासक्तेवाच्यवत्क्लीब
मिंद्रिये॥८॥पुंसिस्यान्नृपतौकामदेवेवैषयिकेपिच॥विष्वक्सेना
फलिन्यांस्याद्विष्वक्सेनोजनार्दने॥९॥विलेपनीसुवेषस्त्रीयवा
ग्वोरपियोषिति॥विलासीभोगिनिव्यालेविष्वक्सेनेऽग्निचंद्रयोः
॥१०॥वृक्षादनश्चलदलेमधुच्छत्रकुठारयोः॥वृक्षादनीतुवंदा
यांविदारीकंदकेपिच॥११॥वैरोचनिस्तुसुगतेबलिदैत्यार्कपुत्र
योः॥शिखरीस्यादपामार्गेशैलपादपयोःपुमान्॥१२॥शिखंडि
नीयूथिकायांगुंजायामपियोषिति॥शिखंडीनाकलापेस्याद्भृंगे
यारिमयूरयोः॥१३॥शृंगारीपूगगजयोःसशृंगारसुवेषयोः॥अ
थश्लेष्मघनामल्यांकेतक्यामपियोषिति॥१४॥संमूर्छनमभि
व्याप्तावुच्छ्रायमोहयोरपि॥समुत्थानंसमुद्योगेव्याधीनांनिर्णये
पिच॥१५॥सदादानोऽभ्रमातंगेहेरंबेगंधहस्तिनि॥स्यात्संव
दनमालोचेवशीकारेनपुंसकम्॥१६॥समादानंसमीचीनग्रह-
णेसौगतनान्हिके॥संवाहनंवाहनेस्याद्भारादेरंगमर्दने॥१७॥स
मापनंपरिच्छेदेसमाप्तिवधयोरपि॥सनातनःशाश्वतेऽजेपितृ
तिथ्यंतरेहरे॥१८॥स्तनयित्नुःपुमान्वारिधरेपिस्तनितेपिच॥
सरोजिनीतुकमलाकरेपद्मेचयोषिति॥१९॥समापन्नंसमाप्ते

स्यात्स्रासेक्लिष्टेवधेपिच ॥ संबाधनंद्वाःसदनेशूलाग्रद्वारपालयोः
२०॥ संयमनीयमपुर्यांसंयमनेबंधनेव्रतेऽपिस्यात् ॥ सारसनम
प्युरस्त्रेनस्त्रीणांमेखलायांच॥२१॥ सामिधेनीतुधाय्यायांसमि
ध्यपिचयोषिति॥ समयोनिस्तुसामोत्थेब्रह्मकुंजरयोरपि॥२२
सुदर्शनोहरेश्चक्रेमेरुजंबुद्रुमेपुमान्॥ नद्योःशक्रनगरेऽप्यौष
धिभिदोःस्त्रियाम्॥२३॥ सुयामुनोवत्सराजेप्रासादेप्यांतरेच्युते
॥ सुकर्मातुपुमान्योगभेदेस्याद्देवशिल्पिनि॥२४॥ सुधन्वा
भेदधात्रुष्केत्रिषुनाविश्वकर्मणि॥२५॥ सुपर्वानाशरेवंशेपर्व
धूमसुरेपिच॥२५॥ सुदामातुपुमान्वारिधरपर्वतभेदयोः॥
सौदामन्यप्सरोभेदेतडित्तद्भेदयोःस्त्रियाम्॥२६॥ हर्षयित्नुः
पुमान्पुत्रेकांचनेतुनपुंसकम्॥ ॥ नपंच॥ ॥अथा
तिसर्जनंदानेवधेपिचनपुंसकम्॥२७॥ अपवर्जनंतुदानेनिर्वा-
णत्यागयोरपि॥ अपसर्जनमाम्नातेपरिवर्जनदानयोः॥२८॥
अग्रजन्माद्विजेज्येष्ठभ्रातरिब्राह्मणिस्मृतः॥ अथानुवासनं
स्नेहवस्तिधूपनयोरपि॥२९॥ अभिनिष्ठानोप्यक्षरमात्रेपिस्या
द्विसर्जनीयेच॥ अंतेवासीशिष्येस्याच्चांडालेप्रांतगेचापि॥३०॥
स्यादुपस्पर्शनंस्पर्शेस्नानाचमनयोरपि॥ उपसंपन्नमुद्दिष्टंनि
हतेचसुसंस्कृते॥३१॥ कारंधमीकांस्यकारेधातुवादरतेपिच॥
कामचारीकामुकेस्यात्स्वच्छंदकलविंकयोः॥३२॥ किष्कुपर्वापु
मानिक्षौवेणौपोटगलेपिच॥ कृष्णवर्त्मापुमानग्नौदुराचारेविधु
तुदे॥३३॥स्याद्गंधमादनोभृंगेगंधकेवानरांतरे॥ स्त्रीसुरायांन
गेनस्त्री चिरजीवीद्विकाजयोः॥३४॥ तिक्तपर्वाहिलमोचीगु
डूच्यांयष्टिषुस्त्रियाम्॥ दंतधावनःखदिरेदंतशुद्धौनपुंसकम्
३५॥स्यात्धूमकेतनःपुंसिकेतुग्रहहुताशयोः॥ स्यान्नंदिवर्ध
नोगर्भेपक्षांतेतनयेपिच॥३६॥ प्रतिपादनंतुदानेप्रतिपत्तौच

बोधने॥ स्यात्पृष्टहायनो धान्यविशेषे च मतंगजे॥ ३७॥ प्रचला
की मयूरे स्याद्भुजंगे चापि दृश्यते॥ स्यात्पद्मलांछनो लोके श्वरे ब्रह्म
णि भास्करे॥ ३८॥ धनदे च स्त्रियां तारा लक्ष्मी वाग्देवतासु च॥ पीतचंद
नमुद्दिष्टं कालीयक हरिद्रयोः॥ ३९॥ पृष्ठशृंगी पुमान्मेषे भीरौ षंढे वृ
कोदरे॥ वरचंदनमाख्यातं कालीये देवदारुणि॥ ४०॥ वरवर्णिनी
तु लाक्षा हरिद्रा रोचना सु च॥ फलिन्यामुत्तमा नारी साध्वीयस्यामपि
स्त्रियां॥ ४१॥ मधुसूदनस्तु पुंसि भ्रमरे वनमालिनि॥ महारजन
मुद्दिष्टं शातकुंभ कुसुंभयोः॥ ४२॥ स्यान्मृत्युवंचनः शंभौ श्रीफले द्रो
णकाकयोः॥ वनमाली तु गोविंदे वाराह्यां वनमालिनी॥ ४३॥ वि
षयायी पुमान्राज्ञि विषयि कजने पि च॥ इंद्रिये कामदेवे च विषयासक्त
पूरुषे॥ ४४॥ विश्वकर्मा सहस्रांशौ मुनिभिद्देवशिल्पिनोः॥ विघ्नका-
री स्मृतो घोरदर्शने पि विघातिनि॥ ४५॥ वृषपर्वा पुमान्दैत्यभेदे प्यंध
कसूदने॥ व्योमचारी तु निर्दिष्टो देवतायां विहंगमे॥ ४६॥ शाकुला
दनी स्त्रियां कृष्णभेदी कटुकशाकयोः॥ शालंकायन उद्दिष्टो मुनिभे
दे च नंदिनि॥ ४७॥ शिवकीर्तनस्तु पुंसि भृंगरीटे स्मरद्विषि॥ श्वेत
वाहन इत्येष स्याधाम्नि धनंजये॥ ४८॥ श्वेतधामा पुमानिंदौ घन
साराब्धिफेनयोः॥ स्यात्षष्टिहायनो धान्यविशेषे कुंजरे पुमान्॥ ४९
॥ संप्रयोगी कलाकेलौ कामुके सप्रयोजने॥ हरिचंदनमस्त्री स्या-
त्त्रिदशानां महीरुहे॥ ५०॥ नपुंसकं तु गोशीर्षे ज्योत्स्ना कुंकुमयोरपि॥
हरिवाहनस्तु पुंसि शचीपति विवस्वतोः॥ ५१॥ ॥ नषट्
अंतावसायी श्वपचे मुनिभेदे च नापिते॥ कलानुनादी रोलंबे क
लविंक कपिंजले॥ ५२॥ जायानुजीवी पुंसि स्यान्नटे च बकपक्षिणि
॥ सहस्रवेधि क्लीबं स्याद्रामठे नाम्लुवेतसे॥ ५३॥ ॥ इति नां
तवर्गः॥ ॥ पैकम्॥ ॥ पो ना वातांड पूतेषु पापात
स्त्वकीर्तितः॥ स्त्रियां तु रसणे पाने पूने पूरितके च सः॥ १॥ ॥

पद्विः॥ ॥ कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने॥ कपि
र्ना सिल्हके शाखामृगे च मधुसूदने॥ २॥ कूपः कूपकमृन्माने गर्त्ते धुरु
णवृक्षके॥ कूपौ द्रोणशालके स्याद्द्रोणपद्यां कूपी स्मृता॥ ३॥ कृपा
दयायां क्षेपस्तु निंदाविक्षेपलेपने॥ गर्वप्रेरणयोश्चाथ खष्पः क्रोधे
बलात्कृतौ॥ ४॥ गोपो गोपालके गोष्ठाध्यक्षे पृथ्वीपतावपि॥ ग्रामस्या
धिकृते पुंसि शारिवाख्यौषधौ स्त्रियां॥ ५॥ छुपः क्षुपस्पर्शनयोस्त्व
पुंसी सकरंगयोः॥ तल्पमट्टे कलत्रे च शयनीये च नद्वयोः॥ ६॥ त्रपा
लज्जाकुलटयोस्तापः संतापकृच्छ्रयोः॥ तापी नद्यंतरे दर्पः कस्तू
र्यामप्यहंकृतौ॥ ७॥ नीपः कदंबबंधूकनीलाशोकद्रुमेषु च॥ दीपः
प्रदीपोत्तरीये स्याल्लूतायां च भस्तके॥ ८॥ पुष्पं विकाशिकुसुमस्त्री
रजःस्वनपुंसकं॥ रूपं स्वभावसौंदर्ये नालोकपशुवृंदयोः॥ ९॥ ग्रंथा
वृत्तौ नाटकादावाकारश्लोकयोरपि॥ रेपः स्यान्निंदिते क्रूरे रोपो रोप
णबाणयोः॥ १०॥ लेपः प्रलेपने जग्धौ वपा विवरमेदसोः॥ बाष्पउष्म
णि लोहे थ शष्पं बालतृणे स्मृतं॥ ११॥ पुंसि स्याच्छपनिर्भाहानौ शाप-
आक्रोशादिव्ययोः॥ शिल्पं स्रुवे क्रियायां च स्वापः शयननिद्रयोः॥
१२॥ स्पर्शाज्ञतायामज्ञाने सूपो व्यंजनसूदयोः॥ ॥ पत्रि॥ ॥
अनूपो महिषे नाऽबुप्रायदेशे तु वाच्यवत्॥ १३॥ अस्त्रपा तु जलौ
कायां डाकिन्यां राक्षसे तु ना॥ आवापो भांडवपने परिक्षेपालवाल-
योः॥ १४॥ आक्षेपो भर्त्सना ऽऽकृष्टिकाव्यालंकृतिषु स्मृतः॥ आक
ल्पः कल्पने वेशेप्युडुपं तु प्लवे स्त्रियाम्॥ १५॥ चंद्रे पुंस्युलपो ना स्त्री
गुल्मिन्यां ना तृणांतरे॥ कच्छपी वल्लकीभेदे द्वुलौ स्युद्गदांतरे॥ १६॥
पुंसि निध्यंतरे कूर्मे मल्लबंधांतरेपि च॥ कलापः संहतौ बर्हे कांच्यां
भूषणतूणयोः॥ चंद्रे विदग्धे व्याकरणभेदेपि कथ्यते बुधैः॥ १७॥ क
शिपुर्भक्ताच्छादनयोरेकोक्त्या पृथक्तयोः पुंसि॥ काश्यपउक्तो मु
निभेदे कणादे च काश्यपी क्ष्मायां॥ १८॥ कुतपो स्त्रियां दौहित्रे वा

द्येछागलकंबले ॥ कुनौदिनस्याष्टमेंशेनास्त्रूर्येकुणपीपुनः ॥ विड्सा रिकायांकुणपःपूतिगंधोशवेपिच ॥ जिह्वापःश्वनिमार्जारेप्रता पस्तापतेजसोः ॥२०॥ पादपःपादपीठदौपादुकायांतुपादपा ॥ र क्तपास्याज्जलौकायांडाकिन्यांनातुराक्षसे ॥२१॥ विटपोनस्त्रियां स्तंबशाखाविस्तारपल्लवे ॥ विटाधिपेनाविकल्पःपुंसिभ्रांतौचक ल्पने ॥२२॥ ॥ पचतुः ॥ ॥ अभिरूपोबुधेरम्येःपलापः प्रेम्णयपङ्कवे ॥ अवलेपस्तुगर्वेस्याल्लेपनेभूषणेपिच ॥२३॥ उप तापस्त्वरायांस्यादुत्तापगदयोरपि ॥ जलकूपीकूपगर्तेपुष्करिण्यां चयोषिति ॥ नागपुष्पस्तुपुन्नागनागकेसरचंपके ॥ परिवाप स्तुपर्युप्तेजलस्थानेपरिच्छदे ॥२५॥ परितापस्तुपुंसिस्याद्दुःखेच नरकांतरे ॥ परिकल्पोभयेकंपेप्राप्तरूपोज्ञरम्ययोः ॥२६॥ पिंड पुष्पमशोकेचजवायांचकुशेशये ॥ बहुरूपःशिवेविष्णौधूनके- सरतेस्मरे ॥२७॥ मेघपुष्पंतुपिंडाभ्रांबुनादेयेहरेर्हये ॥ विप्रला पोविरोधोक्तावपार्थवचनेपिच ॥२८॥ बीजपुष्पंमरुबकेनथाम दनकेपिच ॥ वृकधूपस्तुसरलद्रवकृत्रिमधूपयोः ॥२९॥ वृषाक पिःपुमान्कृष्णेशंकरेजातवेदसि ॥ हेमपुष्पमशोकेचजवापुष्पेनपुं सकं ॥३०॥ ॥ पपंच ॥ ॥ भवेच्चामरपुष्पंतुपूगेकाशाम्र केतके ॥३१॥ ॥ इतिपांतवर्गः ॥ ॥१३०२॥ ॥

॥ फेकं ॥ ॥ फोयक्षसाधनेस्फानेझंझावातेपिपुंस्ययं ॥ फक्को कोफूत्कृतौचतथानिःफलभाषणे ॥१॥ ॥ फद्वि ॥ ॥ गुंफ स्तुगुंफनेबाहोरलंकारेचकीर्त्यते ॥ रेफोरवर्णेपुंसिस्यात्कुत्सितेपुन रन्यवत् ॥२॥ शफंमूलेतरूणांस्यात्गवादीनांखुरेपिच ॥ शिफाज टायांसरितिमांसिकायांचमातरि ॥३॥ ॥ इतिफांतवर्गः ॥ ॥ १३०५॥ ॥ बेकं ॥ ॥ बःपुमान्वरुणेसिंधौभगेतोयेगतेतु गंधनेतंतुसंतानेपुंस्येववपनेस्मृतः ॥१॥ ॥ बद्वि ॥ ॥ कंबुः

शंखेस्त्रियांपुंसि शंबूकेवलयेगजे॥ कंबिरंशोच्चवंशस्यखजाका-
यांस्त्रियामपि॥२॥ क्लीबंस्यात्संडकेनस्त्रीवाच्यलिंगस्त्वविक्रमे॥
खर्वंसंख्यांतरेक्लीबंनीचेवामनकेत्रिषु॥३॥ गर्वोऽभिमानेवलेपे
जंबुःस्यात्पादपांतरे॥ तथास्त्रमेरुसरितिद्वीपभेदेपिचस्त्रियाम्
॥४॥ डिंबोभयध्वनावंडेफुप्फुसप्लीहवेप्लवे॥ दर्वीस्त्रियांख-
जाकायांफणायामुरगस्यच॥५॥ पूर्वंतुपूर्वजेपि स्यात्पूर्वःप्रागा
द्ययोस्त्रिषु॥ लंबापद्मालयागौर्योस्त्रिक्ततुंब्यामपिस्त्रियाम्॥६
बिंबंतुप्रतिबिंबेपिमंडलेपुंनपुंसकं॥ बिंबिकायाःफलेक्लीबंकृक
लासेपुनःपुमान्॥७॥ शंबःस्यान्मुसलग्रंथलोहमंडलकेपवौ॥
शुभान्वितेत्रिषुस्तंबोभकांडद्रुमगुच्छयोः॥८॥ ॥बत्रिः॥
कदंबंनिकुरंबेस्यान्नीपसिद्धार्थयोःपुमान्॥ कलंबीशाकभेदे
स्यात्कडंबशरयोःपुमान्॥९॥ कादंबःस्यात्पुमान्पक्षिविशेषे-
सायकेपिच॥ गजाह्वाकरिपिप्पल्यांगजाह्वंहस्तिनापुरे॥१०॥
गंधर्वःपशुभेदेस्यात्पुंस्कोकिलतुरंगयोः॥ अंतराभवसत्वेचगाय
नेस्वेचरेपिच॥११॥ गोडुंबःशीर्णवृंतेचगवादन्यांतुयोषिति॥ द्वि
जिह्वःस्त्रकखलेसर्पेनितंबःस्कंधरोधसोः॥१२॥ स्त्रियाःपश्चात्क
टिनटेकटकेकटिमात्रके॥ प्रलंबोदैत्यभेदेस्यात्त्रपुषेपिपयोधरे॥
१३॥ तालांकुरेपिशालायांहारभेदेप्रलंबने॥ भूजंबूरपिगोधूमेविकं
कतफलेस्त्रियाम्॥१४॥ हेरंबोविघ्नराजेस्यान्महिषेशौर्यगर्विते॥
बचतुः॥ ॥राजजंबूस्तुजंबूभिसिंडरकर्जूरयोस्त्रियाम्॥
१५॥ ललज्जिह्वोऽन्यवह्निस्तेक्रमेलकश्वनोःपुमान्॥ शातप
र्वीचदूर्वायांवचाभार्गवयोषितोः॥१६॥ ॥बपंच॥ ॥
धूलीकदंबोनीपेस्यात्तिनिशेवरुणद्रुमे॥ शृंगालजंबूर्गोडिंबे
तथाघोटाफलेस्त्रियाम्॥१७॥ ॥इतिबांतवर्गः॥
१३२२॥ ॥भेकं॥ ॥भंनक्षत्रेगभं... स्तौस्त्रीपुंसिस्याद्व

वेदंतेजंबीरभक्षणयोः॥ जृंभा विकाशजृंभणयोः स्त्रीषु डिंभोपि
बालिशेबाले॥४॥ दंभस्तु कैतवेकल्के हृग्भूः स्त्रीसर्पवज्रयोः॥ ना
भिर्मुख्यनृपेचक्रमध्यक्षत्रिययोः पुमान्॥५॥ द्वयोः प्राणिप्रतीकेस्या
त्स्त्रियांकस्तूरिकामदे॥ निभस्तु कथितो व्याजे पुल्लिंगः सदृशोन्यवत्
॥६॥ रंभाकदल्यप्सरसोर्ना वेणौ वारणांतरे॥ विभुः प्रभौ सर्वग
ते शंकरब्रह्मणोस्तु ना॥७॥ शंभुः पुंसि महादेवे परमेष्ठिनि चार्हति
शुभो योगे शुभं क्षेमे वाच्यवत् क्षेमशालिनि॥८॥ स्वसंचारि
पुरे स्त्री तु शोभा कांतीच्छयोर्मता॥ सभा सामाजिके गोष्ठ्यां द्यूत
मंदिरयोरपि॥९॥ स्वयंभूर्ना ब्रह्मणि हरौ स्तंभः स्थूणाजडत्वयोः
॥ ॥ भत्रिः॥ ॥ आरंभस्तु त्वरायां स्यादुद्यमे वधदर्पयोः
१०॥ आत्मभूर्ना विधौ कामे ऋषभस्त्वौषधांतरे॥ स्वरभिद्वृष
योः कर्णरंध्रकुंभीरपुच्छयोः॥११॥ उत्तरस्थः स्मृतश्चैषु स्त्री नराका
रयोषिति॥ शूकशिंब्यां शिरालायां विधवायां क्वचिन्मता॥१२॥
ककुप् स्त्रियां प्रवेण्यां दिक्शोभासु चंपकस्रजि॥ ककुभो राग-
भेदेपि वीणांगेऽर्जुनपादपे॥१३ करभो वृक्षभेदेपि ज्योतिष्म
त्यामपि स्त्रियाम्॥ करभो मणिबंधादिकनिष्ठांतोष्ट्रतत्सुते॥१४
कुसुंभं हेमनि महारजके ना कमंडलौ॥ गर्दभं श्वेतकुमुदे गर्दभो गं
धभिद्यपि॥१५॥ रासभे गर्दभी क्षुद्रजंतुरोगविशेषयोः॥ दुर्ल
भस्त्रिषु दुष्प्रापे कचूरे दुंदुभिः पुमान्॥१६॥ वरुणे दैत्यभेदे यो-
श्चन्यक्षबिंदुत्रिकद्वये॥ निकुंभः कुंभकर्णस्य तनये दंतिकौष-
धौ॥१७॥ वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरंगमे॥ वर्षाभूः

स्त्रीन्वशोथ घ्नांभूलता पूर्वयोःपुमान्॥१८॥ विष्कंभो योगभेदे स्याद्
स्तारप्रतिविंबयोः॥रूपकांगप्रभेदेच बंधभेदेच योगिनां॥१९॥ विश्रंभः
केलिकलहे विश्वासे प्रणयेऽपिच॥ विष्टंभः प्रतिबंधे स्यात्प्रभेदे चाम
यस्यच॥२०॥ वृषभः श्रेष्ठ वृषयो वैदर्भी शीतिभिद्यपि॥ वैदर्भ्यंग
क्यवैकल्ये शरभस्तु पशोर्भिदि॥२१॥ करभे वानरभिदि सनाभि
र्ज्ञातितुल्ययोः॥ सुरभिः शल्लकीमातृभिन्सुरागोषुयोषिति॥२२॥
चंपकेच वसंतेच तथा जातीफले पुमान्॥ स्वर्णगंधोत्पले क्लीबं स्त्रग्गं-
धिकांतयोस्त्रिषु॥२३॥ विख्याते सन्निवेधीरे चैत्रेपिच पुमानयं॥ ॥
भन्वतुः॥ ॥अनुष्टुप् स्यात्सरस्वत्यांछंदोभेदेच योषिति॥२४
॥ अवष्टंभः सुवर्णे च स्तंभप्रारंभयोरपि॥ शातकुंभं सुवर्णे स्यान्शा
तकुंभोश्वमारके॥२५॥ ॥इतिभांतवर्गः॥ ॥मेकम्
॥ ॥ मोयमे समयेपि स्याद्वृषे च मधुसूदने॥ मा स्त्री पद्मालयायां
स्यात्पुंल्लिगश्चंद्रशेखरे॥१॥ ॥मद्विः॥ ॥आमोरुक्तद्विदोः
पुंसि स्यादपक्वेऽन्यलिंगकः॥ उमाऽतसी हैमवती हरिद्राकीर्तिकांति
षु॥२॥ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभंगयोः॥ वस्त्रसंकोच
रेखायां वेदनापीडयोरपि॥३॥ क्रमश्चानुक्रमे शक्तौ कंपे चाक्रमणे-
पिच॥ क्षमा भूमौ तितिक्षायां स्त्रियां युक्ते नपुंसकं॥४॥ वाच्यवच्छक्त
हितयोः कामः स्मरेच्छयोः पुमान्॥ रेतस्यपि निकामे च काम्येपि स्या
न्नपुंसकं॥५॥ कामिर्ना कामुके त्वांस्त्री किंक्षेपवितर्कयोः॥ निंदा
यांच परिप्रश्ने वाच्यलिंगमुदाहृतं॥६॥ क्रिमिर्नाकृमिवत्कीटे ला
क्षायां कृमिलेखरे॥ क्रिमीं पलाशेशाखायां हेमपुष्यांच योषिति॥७
॥ क्षुमाऽतसी नीलिकयोः क्षेमो स्त्री लुब्धरक्षणे॥ चंडायां नाशुभे
नस्त्री कात्यायन्यां तु योषिति॥८॥ क्षौमम ट्टे दुकूले ऽस्त्री क्षौमं वल्क
जांशके॥ शशजेऽतसिजे स्वर्मपौरुषे कोष जांशुके॥९॥ गमोनाऽ
क्षविवर्ते स्यादपर्यालोचनेऽध्वनि॥ ग्रामः स्वरे संवसथे ग्रीष्मऽउष्मर्तु

मंदेक्लीबंनगरपादपे॥१३॥ तोक्मंकर्णमलेपुंसिहरितेब्रह्मयेस्वरे
दमस्तुदमथेदंडेकर्दमेदमनेपुमान्॥१४॥ दस्मस्तुयजमानेस्या
दपिचौरेहुताशने॥ द्रुमोमहीरुहेपारिजातेकिंपुरुषेश्वरे॥१५॥
धर्मोस्त्रीपुण्यआचारेस्वभावोपमयोःक्रतौ॥ अहिंसोपनिषन्याये
नाधनुर्यमसोमपे॥१६॥ ध्यामंदमनकेगंधात्तृणोथध्यामलेत्रिषु॥
नेमिर्नातिनिशेकूपत्रिकाचक्रांतयोःस्त्रियां॥१७॥ नेमःकालेव
धौरवंडेप्राकारेकैतवेपिच॥ पद्मोस्त्रीपद्मकेव्यूहनिधिसंख्यांतरेषु
जे॥ नागागेस्त्रीफंजिकाश्रीचारटीपन्नगेषुच॥ ब्रह्मीतुफंजिकायां
स्याच्छाकमत्स्यप्रभेदयोः॥१९॥ ब्राह्मीतुभारतीसोमवल्लरीब्र
ह्मशक्तिषु॥ भ्रमोंबुनिर्गमेभ्रांतौकुंदभ्रमणयोरपि॥२०॥ भामः
क्रोधेरवौदीप्तौभीष्मोगांगेयभीमयोः॥ भीमोम्लवेतसेघोरेशं
भौमध्यमपांडवे॥२१॥ भूमिर्वसुंधरायांस्यात्स्थानमात्रेपिचस्त्रि
यां॥ भौमःकुजेचनरकेपुंसिभूमिभवेत्रिषु॥२२॥ यमोव्यलिंगोय
मजेनाकाकेशमनेशनौ॥ शरीरसाधनापेक्षनित्यकर्मणिसंयमे॥२३॥
यामस्तुपुंसिप्रहरेसंयमेपिप्रकीर्तितः॥ यामिःकुलस्त्रीस्वस्रोःस्त्री
युग्मोधनुषिसंयुगे॥२४॥ रश्मिःपुमान्दीधितौचपक्ष्मप्रग्रहयोर
पि॥ रमालक्ष्म्यांरमःकांतेरक्ताशोकद्रुमेस्मरे॥२५॥ रामायोषा
हिंगुनद्योःक्लीबंवास्तुककुष्ठयोः॥ नारायवेचवरुणेरेणुकेयेहलायुधे
॥२६॥ हयेचपशुभेदेचत्रिषुचारौसितेऽसिते॥ रुमासुग्रीवदारेषु
विधिशलवणाकरे॥२७॥ रुक्मंचकांचनेलोहेलक्ष्मीःसंपत्तिशो-
भयोः॥ ऋद्ध्योषधेचपद्मायांवृद्धिनामौषधेपिच॥२८॥ स्त्रीफलि-

न्यांचमिवंतोस्त्रियांपुंसिहुताशने॥ वामंधनेहरेपुंसिकामदेवेपयोध
रे॥२९॥वल्गुप्रतीपसव्येषु त्रिषुनार्यांस्त्रियामथ॥ वामीशृगालीव
डवारासभीकरभीषुच॥३०॥शमीसक्तुफलायांचशिंबिकायांचवा
गुजौ॥श्यामोवटेप्रयागस्थवारिदेवृद्धदारके॥३१॥पिकेचकृष्णह
रितोःपुंसिस्यात्तद्वतित्रिषु॥मरिचेसिंधुलवणेक्लीबंस्त्रीशारिवौष-
धौ॥३२॥अप्रसूतांगनायांचप्रियंगावपिलागुजौ॥यमुनायांत्रि
यामायांकृष्णात्रिवृतिकौषधौ॥३३॥नीलिकायामथश्रामोमा
सेमंडपकालयोः॥सुषमंतेजसिसूर्यनासमासंवत्सरेस्त्रियाम्॥
३४॥सर्वसाधुसमानेषुसमंस्यादभिधेयवत्॥सीमाघाटस्थिते
क्षेत्रेषंडकोषेऽपिचस्त्रियाम्॥३५॥सूक्ष्मंस्यात्कैतवेऽध्यात्मेपुंस्य
णौत्रिषुचाल्पके॥सूक्ष्मासीरेचनप्रासिसोमस्तुहिमदीधितौ॥३६
वानरेन्द्रकुबेरेचपितृदेवसमीरणे॥वसुप्रभेदेकर्पूरेनीरेसोमल
तौषधौ॥३७॥हिमंतुषारमलयोद्भवयोःस्यान्नपुंसकं॥शीतले
वाच्यलिंगोथहोमिनीपावकेघृते॥३८॥ ॥मत्रिः॥ ॥
अधमःस्याद्गर्ह्यहीनेप्यागमःशास्त्रआगमे॥आश्रमोब्र-
ह्मचर्यादौवानप्रस्थेवनेमठे॥३९॥अस्त्रियामुत्तमादुग्धिकायां
त्रिषुचमुख्यके॥उद्दामोबंधरहितेस्वतंत्रेचप्रचेतसि॥४०॥कल
मःपुंसिलेखन्यांशालौपाटच्चरेपिच॥कुसुमंस्त्रीरजोनेत्ररोगयोः
फलपुष्पयोः॥४१॥कृत्रिमंलवणभेदेनासिल्हकेरचितेत्रिषु॥
गोलोमीश्वेतदूर्वायांस्याद्वचाभूतकेशयोः॥४२॥गोधूमोना
गरंगेस्यादौषधिव्रीहिभेदयोः॥गौतमोनामुनौबुद्धेरोचनादुर्ग
योःस्त्रियाम्॥४३॥नलिमंकुट्टिमेतल्पेचंद्रहासेवितानके॥
दाडिमस्तुत्रिलिंगस्यादेलायांकरकेत्रिषु॥४४॥निष्क्रमोबुद्धि
संपत्तौनिर्गमेदुष्कुलेपिच॥निगमोवाणिजेपूर्यांकटेवेदेवणिक्
पथे॥४५॥नियमोमंत्रणायांचप्रतिज्ञानिश्चयेव्रते॥नैगमःस्या

प्रक्रमःक्रमेवसरेप्युपक्रमेप्यजन्यवत् ॥४९॥ गुल्मस्तुरुग्भे
देशोप्यवलग्नेतुनस्त्रियाम् ॥ स्त्रियांहृष्टरजोनार्यांकर्णिकांगुलि
भेद्योः ॥५०॥ अक्षरच्छंदसितथाललामंलांछनेध्वजे ॥ शृंगेप्रधा
नेभूषायांरम्येवालधिपुंड्रयोः ॥५१॥ तुरंगेचप्रभावेथव्यायामःपौ
रुषेश्रमे ॥ विषमेदुर्गसंचारेविश्रमोभ्रांतिहावयोः ॥५२॥ विद्रु
मोरत्नवृक्षेपिप्रवालेपिपुमानयम् ॥ विलोमस्तुप्रतीपेस्या-
द्भुजंगेवरुणेशुनि ॥५३॥ आमलक्यांविलोमीन्त्रविलोमंवारघ
यंत्रे ॥ विक्रमस्तुपुमान्क्रांतिमात्रेस्याच्छक्तिसंपदि ॥५४॥
संक्रमः क्रमणेपुंसिनस्त्रीस्याद्दुर्गसंचरे ॥ संभ्रमःसाध्वसे
पिस्यात्संवेगादरयोरपि ॥५५॥ सत्तमःस्यात्पूज्यतमेसाधीयस्यु
त्तमेत्रिषु ॥ सरमाकुक्कुरीदेवशुन्योःस्याद्राक्षसीभिदि ॥५६॥ सु
षमानंतशोभायांस्त्रीचारौचसमेत्रिषु ॥ सुषीमःशीतलेचारौत्रिषु
नापन्नगांतरे ॥५७॥ ॥मचतुः॥ ॥भवेदनुपमास्त्रप्र
तीकिन्यांस्त्रीत्रिषूत्तमे ॥ अभ्यागमोविरोधाभियानाभ्युद्गमनां
तिके ॥५८॥ उपक्रमस्तूपधायांज्ञात्वारंभविचक्रमे ॥ चिकित्सा-
यामुपगमःस्वीकारेंतिकसर्पणे ॥५९॥ जलगुल्मोजलावर्तेकच्छ
पेजलचत्वरे ॥ दंडायामस्तुनाशेदिवसेकुंभसंभवे ॥६०॥ पूर्व
गमस्तुमंडूकेतथाशरवामृगेपिच ॥ पराक्रमोविक्रमेस्यादुद्यमो
द्योगयोरपि ॥ महापद्मःपुमान्नागनिधिसंख्यांतरेषुच ॥ यात-
यामोन्यवज्जीर्णपरिभुक्तोज्झितेषुच ॥६१॥ सार्वभौमस्तुदिङ्
नागेसर्वपृथ्वीपतावपि ॥ ॥मपंच॥ ॥अभ्युप

गमस्तु पुंसि स्त्री कारेंतिकसमागमे च ॥ ८३ ॥ नक्षत्रनेमिरुक्ता रेव
त्यां नाध्रुवे चंद्रे ॥ ॥ इति मांतवर्गः ॥ ॥ येकम्

योगोपायो यमने ध्यायाचा स्तिधूमितत्यागेषु ॥ वारणयोगस
मज्ञायानेषु पुमांस्तु गंतरि रथ्यातः ॥ १ ॥ ज्या मातरि वसुधायां-
मौर्व्यां ध्रु क्लीबमङ्गिगमने च ॥ नाज्वालने द्यौ स्त्रिदशालय त्रिदश
वर्त्मनोः पौषिति ॥ २ ॥ अथर्व्यं शिलाजतुन्यथ्यौ बुधे न्याय्ये च न वाच्य
वत् ॥ अंत्यस्तु पुंसि मुस्तायामंतोद्भूते ऽधमे त्रिषु ॥ ३ ॥ अनर्घ्यमर्घ
स्ययोग्ये स्याद्घार्थे पि च वाच्यवत् ॥ अन्यो सदृशेतरयोरर्थ्यः स्व
स्वामि वैश्ययोः ॥ ४ ॥ आस्यं मुखे तन्मध्ये तद्भवे च स्त्रियां स्थितौ ॥
इज्या दाने ऽध्वरे ऽर्चायां संगमे स्त्री गुरौ त्रिषु ॥ ५ ॥ इभ्या करेणुश
ल्लक्योः स्त्रियामाढ्ये च वाच्यवत् ॥ कथ्यं त्रिषु कथार्हे स्यान्न क्लीबं
यावश्यमध्ययोः ॥ ६ ॥ कन्या कुमारिका नार्योरोषधी राशिभेदयोः ॥
क्षयो रोगांतरे वैश्यः कल्यं तापच येषु च ॥ ७ ॥ कल्यं प्रभाते क्लीबं
स्यात् कल्यो वाक्श्रुतिवर्जिते ॥ सज्ये नीरोगदक्षेषु कल्याणवचने
पि च ॥ ८ ॥ उपायवचनेपि स्यात्त्रिषु मद्ये तु योषिति ॥ कक्ष्या गृह
निकायां स्यात् कांच्यां मध्येभबंधने ॥ ९ ॥ हर्म्यादीनां प्रकोष्ठे च का-
र्ये हेतौ प्रयोजने ॥ काव्यं ग्रंथे पुमान् शुक्रे कव्या स्यात् पूतनाधि
योः ॥ १० ॥ कांस्यं वाद्यांतरे पानपात्रे स्यात्तैजसांतरे ॥ कायः क
दैवते मूर्तौ संघे लक्ष्यस्वभावयोः ॥ ११ ॥ मनुष्यतीर्थे कायं स्यात्
क्रिया तूपायचेष्टयोः ॥ आरंभे निष्कृतौ पूजा संप्रधारण कर्मसु ॥
१२ ॥ शिक्षा चिकित्साकरणे कुड्यं भित्तौ विलेपने ॥ कुल्यं स्यात्
कीकसे सुद्रोण्यां शूर्पामिषेषु च ॥ कुल्या पयःप्रणाल्यां च नद्यां
जीवंतिकौषधौ ॥ कुलोद्भवे कुलहिते त्रिषु मान्ये पुनः पुमान् ॥ १४ ॥
कृत्या क्रियादेवतयोस्त्रिषु विद्विष्टकार्ययोः ॥ गयः स्यात्सप्तरा
जर्ष्योर्भेदे तीर्थे पुनर्गया ॥ १५ ॥ गव्यं नपुंसकं ज्यायां रागद्रव्ये

पथस्त्रियां॥ गोसमूहे त्रिलिंगं तु गोदुग्धादौ च गोहिते॥१६॥ ग्राम्यं स्त्री-
करणे क्लीबे अश्लीलप्राकृमयोस्त्रिषु॥ गुह्यं रहस्युपस्थे च गुह्यः कमठ
दंभयोः॥१७॥ गृह्यं गुदे ग्रंथभेदे क्लीबं शाखापुरे स्त्रियां॥ गृह्यासक्तमृ
गादीनां त्रिषु चास्वैरिपक्षयोः॥१८॥ गेयं तु गीते गेयः स्याद्गानव्ये गाय
ने त्रिषु॥ गोप्यो दासीसुते पुंसि रक्षणीयेऽभिधेयवत्॥१९॥ चव्यं
तु चविके क्लीबं चव्यायामपि योषिति॥ चयः समूहे प्राकारमूलबंधे समा
हृतौ॥२०॥ चित्यं मृतकचैत्ये स्याच्चित्या मृतचितौ स्त्रियां॥ चैत्यमा
यतने बुद्धवंद्ये चोद्देश्यपादपे॥२१॥ चोद्यं स्यादद्भुते प्रश्ने चोदनार्हे तु वा
च्यवत्॥ छाया स्यादातपाभावे प्रतिबिंबार्कयोषितोः॥२२॥ पालनोत्कोच
योः कांतिसच्छोभापंक्तिषु स्त्रियाम्॥ जया जयंती तिथिभित्पथ्योमानस
खीषु च॥२३॥ अग्निमंथे नाजयंते विजये च युधिष्ठिरे॥ जन्यं हृद्देवरीवा
दे संग्रामे च नपुंसकं॥२४॥ जन्या मातृवयस्यायां जन्यः स्याज्जनके
पुमान्॥ त्रिषु स्याद्यजनियोऽश्वनवोढाज्ञातिभृत्ययोः॥२५॥ वरस्निग्धे
थ जन्युः स्यात्पुंसि प्राण्यग्निधातृषु॥ त्रयी त्रिवेद्यां त्रितये नना तार्क्ष्यो
ऽश्वसर्पयोः॥२६॥ गरुडाग्रजे स्कवर्णे च पुंसि क्लीबे रसांजने॥ तिष्यो
नक्षत्रभेदे स्यात्कलौ धात्र्यां च योषिति॥२७॥ द्रव्यं स्याज्जतले वित्ते प
थ्यादौ च विलेपने॥ क्लीबं च भेषजे भव्ये द्रुविकारे च वाच्यवत्॥२८॥ द
स्युश्चौरे पुंसि रिपौ दायस्त्वौलुंठभाषणे॥ विभक्तव्यपितृद्रव्ये तथाह
रणदानयोः॥२९॥ दिव्यं लवंगे धात्र्यां स्त्री वल्गौ दिविभवे त्रिषु॥ दू-
ष्यं त्रिषु दूषणीये क्लीबं वस्त्रे च तद्गृहे॥३०॥ दूत्यं दूतस्वभावे च भावक
र्मण्यपि स्मृतं॥ दैत्योऽसुरे मुरायां तु दैत्या चंडौषधावपि॥३१॥ धन्या
धात्र्यामलक्योः स्याद्धन्यं पुण्यवति त्रिषु॥ धान्यं व्रीहिषु धन्याके धि
ष्ण्यं स्यान्नाग्निसद्मसु॥३२॥ शक्ता दृक्षेप्यथ नयो नीतिद्यूतविशेषयोः॥
नाड्यं नौर्यत्रिके लास्ये नित्यं स्यात्संतते ऽपि च॥३३॥ शाश्वते त्रिषु प-
थ्या स्त्री हरीतक्यां हिते त्रिषु॥ पद्यं श्लोके पुमान् शूद्रे पद्या वर्त्मनि-

कीर्तिता॥३४॥ पाक्यंविडाख्यलवणेयवक्षारेपुनःपुमान्॥ प्रायो-
मरणानशनेमृत्यौबाहुल्यतुल्ययोः॥३५॥ प्रियोहृद्येऽन्यवत्पुंसिहृ
द्धिनामौषधौधवे॥ पीयुःकालेरवौघूकेनापुण्यंशोभनेत्रिषु॥३६
॥ क्लीबंधर्मेचसुकृतेपुष्यःकलियुगेस्मृतः॥ नक्षत्रमासयोर्भेदेपू
ज्यःश्वशुरवंद्ययोः॥३७॥ पेयंपातव्यपयसोःपेयाश्राणाच्छमंडयोः
॥ वंध्यस्त्वफलवृक्षादौस्त्रियांस्यादप्रजस्त्रियां॥३८॥ वर्योपतिं
वरायांस्त्रीवरेण्येत्रिषुनास्मरे॥ बल्यंप्रधानधातौस्यात्क्लीबंबलक
रेत्रिषु॥३९॥ वीर्यंशुक्रेप्रभावेचतेजःसामर्थ्ययोरपि॥ भयंप्रतिभये
घोरेभस्त्रेकुब्जकस्यच॥४०॥ भव्यंशुभेचसत्येचयोग्येभाविनि-
तुत्रिषु॥ कर्मरंगतरौपुंसिस्त्रियांकरिकणामयोः॥४१॥ क्लीबमस्थनि
भाग्यंतुस्याच्छुभाशुभकर्मणोः॥ भृत्योदासेभृतौभृत्यामयुर्ना
किन्नरेमृगे॥४२॥ मयःशिल्पिनिदैत्यानांकरभेऽश्वतरेऽपिच॥ मध्यं
विलग्नेनस्त्रीस्यान्न्याय्येऽन्तरेऽधमेऽपिच॥४३॥ मत्स्योमीनेऽथपुंभूम्नि
देशेमन्युःपुमान्क्रुधि॥ दैन्येशोकेचयज्ञेचमाल्यंकुसुमतत्स्रजोः
॥४४॥ मायास्याच्छांबरीबुद्ध्योर्मायःपीतांबरेऽसुरे॥ मूल्यंस्याद्वेत
नेप्रश्नेमृत्युर्नामरणेयमे॥४५॥ मेध्यंत्रिषुशुचौरक्तवचारोचनयोः-
स्त्रियां॥ ययुःपुमानश्वमेधतुरगेचतुरंगमे॥४६॥ याप्यस्तुयापनी
येस्यान्निंदितेऽप्यभिधेयवत्॥ याम्याऽपाच्यांभरण्यांचपुंस्यगस्त्येच
चंदने॥४७॥ योग्यःप्रवीणयोगार्होपायशक्तेषुवाच्यवत्॥ क्लीबमृद्धौ
षधौपुष्येनास्त्र्यभ्यासार्कयोषितोः॥४८॥ रम्यारात्रौचंपकेनामनोज्ञे
त्वभिधेयवत्॥ नपुंसकंपटोलस्यमूलेसूरिभिरिष्यते॥४९॥ रथ्या
रथौघविशिखावर्त्मनीस्त्रीचयोषिति॥ रथवोढरिपुल्लिंगोरूप्यःस्या
त्सुंदरेत्रिषु॥५०॥ आहतस्वर्णरजतेरजतेचनपुंसकं॥ लयोवि-
नाशेसंश्लेषेसाम्येतौर्यत्रिकस्यच॥५१॥ लक्ष्यंस्यादपदेशेऽपिशर
व्येऽपिनपुंसकं॥ लभ्यंयुक्तेचलब्धव्येलास्यंतौर्यत्रिकेमतम्॥५२

षिति॥ ५५॥ शल्यंतुनस्त्रियांशंकौक्लीबंक्ष्वेडेषुतोमरे॥ मदनद्रु-
श्वाविधोर्ना शयः शय्याहिपाणिषु॥ ५६॥ शय्यास्याच्छयनीयेच
गुंफनेपिचयोषिति॥ शून्यंस्यान्निर्जनेवाच्यलिंगमस्त्यातुयोषिति
॥ ५७॥ शौर्यमारभटीशक्त्योः सह्यः शैलांतरेपुमान्॥ सोढव्येवाच्य
लिंगःस्यादारोग्येतुनपुंसकं॥ ५८॥ संख्यंसमितिसंख्यास्यादेक-
द्व्यादिविचारयोः॥ संध्यापितृप्रसूनद्यंतरयोर्युगसंधिषु॥ ५९॥ सत्यं
कृतेचशपथेतथ्येत्रिषुतुतद्वति॥ सव्यंवामेप्रतीपेचस्मयोनाऽद्भुत
गर्वयोः॥ ६०॥ सायः कांडेदिनांतेचसाध्योयोगांतरेस्मरे॥ गणदेव
विशेषेचसाधनीयेतुवाच्यवत्॥ ६१॥ सूर्योर्कपर्णेतपनेस्त्रीतद्भा
र्यौषधीभिदोः॥ स्थेयोविवादपक्षस्यनिर्णेतरिपुरोहिते॥ ६२॥ सै
व्यंक्लीबमुशीरेस्यात्सेवार्हेपुनरन्यवत्॥ सैन्यंक्लीबंबलेसेनासम
वेतेतुवाच्यवत्॥ ६३॥ सौम्योऽज्ञेनात्रिष्वनुग्रेमनोज्ञेसोमदैवते॥
हार्योबिभीतकतरौहर्तव्येपुनरन्यवत्॥ ६४॥ जरणेप्यत्रिषुहृद्यं
त्वज्जहृद्गितहृत्प्रिये॥ वशाकृद्वेदमंत्रेनावृद्धिनामौषधौस्त्रियाम्॥
॥ ६५ यत्रि॥ ॥ अनयस्त्वविपद्दैवाशुभयोर्व्यसनेषुच॥ अत्य
योऽतिक्रमेदंडेविनाशेदोषकृच्छ्रयोः॥ ६६॥ अश्वीयमश्वसंघाते
क्लीबमश्वहितेन्यवत्॥ अधृष्यातटिनीभेदेप्रगल्भेवाच्यलिंगकं
॥ ६७॥ अवध्यमवधार्हेस्यादनर्थकवचस्यपि॥ अव्ययोऽस्त्री
शब्दभेदेनाविष्णौनिर्व्ययेत्रिषु॥ ६८॥ अहल्यात्वप्सरोभेदेभा
र्यायांगौतमस्यच॥ अहार्यः पर्वतेनास्यादहर्तव्येतुवाच्यवत्॥ ६९
॥ अभिख्यात्वभिधानेस्याच्छोभायांचयशस्यपि॥ अभयास्त्री

हरीतक्यामुशीरेच नपुंसकं॥७०॥ निर्भयेवाच्यलिंगःस्यादपत्यंपुत्र
योर्मतं॥ अगस्त्यः कुंभयोनौस्याद्वंगसेननरावपि॥७१॥ आशयः
स्यादभिप्रायेपनसाधारयोरपि॥ स्यादातिथ्यमतिथ्यर्थेत्रिलिंग
मतिथौपुमान्॥७२॥ आत्रेयीपुष्पवत्यांस्यान्नदीभेदेचनामुनौ॥
आदित्योभास्करेदेवेप्याम्नायोनिगमेपिच॥७३॥ उपदेशेपींद्रि
यंतुहृषीकेरेतसिस्मृतं॥ उदयस्तुपुमान्पूर्वपर्वतेचसमुन्नतौ॥
७४॥ उपायः सामभेदादौतथैवोपगतौपुमान्॥ उर्णायुर्नांक्षणभं
गेमेषकंबलमेषयोः॥७५॥ औचित्यमुचितत्वेस्यात्सत्येपिचनपुं
सकं॥ कषायोरसभेदेचनिर्यासेचविलेपने॥७६॥ अंगरागेचन
स्त्रीस्यात्सुरभौलोहितेत्रिषु॥ कालेयोदैत्यभेदेस्यात्कालखंडेन
पुंसकम्॥७७॥ क्षिपण्युस्तुपुमान्देहे सुरभौवाच्यलिंगकः॥ कुला
यस्तुपुमान्स्थानमात्रेस्यात्पक्षिवासके॥७८॥ क्षेत्रियंक्षेत्रजतृणेप
रदेहचिकित्सयोः॥ परदाररतासाध्यरोगयोः क्षेत्रियःपुमान्॥७९॥
कौकृत्यमनुतापेस्यादयुक्तकरणेपिच॥ गांगेयःस्यात्पुमान्भीष्मेक्ली
बेस्वर्णकशेरुणोः॥८०॥ चक्षुष्यःकेतकेपुंडरीकसंज्ञकपादपे॥ कु
लत्थिकासुभगयोःस्त्रियामक्षिहितेन्यवत्॥८१॥ चांपेयश्चंपकेस्व
र्णेकिंजल्केनागकेसरे॥ जघन्यंहेमलेक्लीबंचरमेगर्हितेऽन्यवत्॥
८२॥ जटायुः पुंसिसंपातेःकनीयसिचगुग्गुलौ॥ जरायुरपितत्प
क्षिराजेगर्भाशयेपुमान्॥८३॥ तपस्याव्रतचर्यायां तपस्यःफाल्गु
नेपुमान्॥ द्वितीयातिथिभिस्त्र्योःपूरणेतूभयेत्रिषु॥८४॥ देवयु
र्वाच्यलिंगस्तुधार्मिकेलोकयात्रिके॥ नादेयीनागरंगेस्याज्जपाया
मंबुवेतसे॥८५॥ भूमिजंब्वांजवायांचव्यंगुष्ठेपिचयोषिति॥ निका
यस्तुपुमांल्लक्ष्येसधर्मप्राणिसंहतौ॥८६॥ समुच्चयेसंहतानांनिल
येपरमात्मनि॥ नेपथ्यःस्यादलंकारेरंगज्यायांनपुंसकं॥८७॥ प्र-
णायःप्रसवेप्रेम्णियाच्ञाविश्रंभयोरपि॥ निर्वाणेप्यथपर्यायःप्रका

रेऽव मरेकमे॥८८॥प्रलयोमृत्युकल्पांतमूर्छापायेषुपुंस्ययम् प्र-
श्रयःप्रथितत्वेचप्रनाद्विज्ञानयोरपि॥८९॥आचारेशपथेरंध्रेविश्वा
सार्थानहेतुषु॥पर्जन्योमेघशब्देपिध्वनदंबुदशक्रयोः॥९०॥प्रस
व्यंवाच्यलिंगंस्यात्प्रतिकूलानुकूलयोः॥प्रकीर्यःपूतिकरजेपिनिका
येनुवाच्यवत्॥९१॥प्राणाय्योसंमतेपिस्यादभिलाषविवर्जिते॥
पयस्यंतुपयोजातहितयोर्वाच्यलिंगकम्॥दुग्धिकाक्षीरकाकोल्यो
स्वर्णक्षीर्यामपिस्त्रियाम्॥पारुष्यंपरुषत्वेचदुर्वाक्येपुंसिगीष्पतौ
॥९२॥ पानीयंतुजलेक्लीबंपातव्येवाच्यलिंगकं॥पौलस्त्यस्तुकुबे
रेस्याद्दशग्रीवेपिपुंस्ययं॥९४॥बलयःकंठरोगेनाकंकणेपुन्नपुंसकं
॥ब्रह्मण्योब्रह्मसाधौस्याद्ब्रह्मदारुशनैश्चरे॥९५॥बालेयोगर्दभे
पुंसिमृतोबालहितेत्रिषु॥ब्राह्मण्यंब्राह्मणत्वेचसमूहेचद्विजन्मना
म्॥९६॥भुवन्युस्तुपुमान्भानौज्वलनेशशलांछने॥भुजिष्यस्तु
स्वतंत्रेस्याद्धस्तसूत्रकदासयोः॥९७॥स्त्रियांदासीगणिकयोर्मलयः
पर्वतांतरे॥शैलांगेदेशआरामेस्त्रीत्रिवृतायांतुयोषिति॥९८॥मंगल्यः
स्यात्त्रायमाणाश्वत्थबिल्वमसूरके॥स्त्रियांशम्यामधःपुष्पीमिसि
शक्रपुष्पासुच॥९९॥रोचनायामथोदध्निक्लीबंशिवकरेत्रिषु॥मृग
युःपुंसिगोमायौव्याधेचपरमेष्ठिनि॥१००॥रहस्यास्त्रीनदीभेदे
गोपनीयेभिधेयवत्॥लौहित्यंलोहितत्वेस्यान्नक्लीबंपुंसिनदांतरे
॥१॥ वदान्योदानशौंडेस्याच्चारुवादिनिवाच्यवत्॥व्यवायः
स्मरतेनर्वेपुंसक्लीबंतुतेजसि॥२॥वृत्तव्यंकुत्सितेहीनेवचनार्हे-
चवाच्यवत्॥विजयःस्याज्जयेपार्थेस्त्रियांतिथ्यंतरेस्मृता॥३॥
उमासख्यांविस्मयःस्यादाश्चर्यगर्वयोःपुमान्॥विनयातुफलायां-
स्त्रीशिक्षायांप्रणतेपुमान्॥४॥विशल्याग्निशिखादंतीगुडूची-
त्रिपुटासुच॥विषयोगोचरेदेशेतथाजनपदेपिच॥५॥प्रबंधाद्य
स्ययोज्ञातस्तनरूपादिकेपुमान्॥श्वशुर्योदेवरेस्यालेशांडिल्यः

पावकांतरे ॥ ६ ॥ मुनिभेदेचमालूरेशालेयःस्यान्मिसौपुमान् ॥ त्रि
षुशाल्युद्भवेक्षेत्रेस्याच्छीर्षण्यंतुशीर्षके ॥ ७ ॥ रुक्केशोपुंसिशैलेयं
तालपर्ण्यांचसैंधवे ॥ शैलजेनातुमधुपेशिलातुल्येऽन्यलिंगकम् ॥
॥ ८ ॥ संस्त्यायःसन्निवेशेचसंस्थानेविस्तृतावपि ॥ सन्नयःस
मवायेपिपृष्ठःस्थायिबलेपुमान् ॥ ९ ॥ समयःशपथाचारसिद्धांते
षुतथाधियि ॥ क्रियाकारेचनिर्देशेसंकेतेकालभाषयोः ॥ १० ॥ सार-
ण्युस्तुपुमान्वारिवाहेस्यान्मातरिश्वनि ॥ सामर्थ्यंयोग्यतायां
स्याच्छक्तावपिनपुंसकं ॥ ११ ॥ सौरभ्यंतुमनोज्ञत्वेसौगंध्येगुणगौ
रवे ॥ सौभाग्यंसुभगत्वेस्याद्योगभेदेनपुंसकम् ॥ १२ ॥ हिरण्यं
रेतसिद्रव्येशातकुंभवराटयोः ॥ अक्षयेमानभेदेस्यादकुप्येचनपुं
सकं ॥ १३ ॥ हृदयंमानसेबुक्कोरसोरपिनपुंसकम् ॥ ॥ यत्र
तुः ॥ ॥ भवेदनुशयोद्वेषपश्चात्तापानुबंधयोः ॥ १४ ॥ अथा
यमायःशेषस्यात्समाप्तौनिश्चयेपिच ॥ अवश्यायस्तुनीहारे
प्यभिधानेपिपुंस्ययम् ॥ १५ ॥ अपसव्यंत्रिलिंगंतुदक्षिणप्रतिकू
लयोः ॥ अंतशय्यामृतौभूमिशय्यायांपितृकानने ॥ १६ ॥ उपका
र्यांराजसदनेप्युपकारोपिनेऽन्यवत् ॥ जलाशयोजलाधारेस्यादुशी
रेऽपुंसकं ॥ तंडुलीयःशाकभेदेविडंगतरुनाम्नयोः ॥ तृणशून्यं
मल्लिकायांत्रिपुंस्यात्केतकीफले ॥ १८ ॥ दाक्षिणात्योनारिकेरेत्रि
षुदक्षिणदिग्भवे ॥ धनंजयोर्जुनेवह्निनागदिग्देहमारुते ॥ १९ ॥
निरामयस्तुपुंसिस्याड्डिंडिकेत्रिषुनीरुजि ॥ पारिध्यायोजनस्या
नेपरिच्छेदनितंबयोः ॥ २० ॥ प्रतिश्रयःसभायांस्यादाश्रयेप्रातिभयं
भयं ॥ घोरेपिपांचजन्यस्तुकृष्णशंखेहुताशने ॥ २१ ॥ प्रावृषेण्यः
पुमान्नीपेप्रावृट्कालभवेत्रिषु ॥ पौरुषेयःकृतेपुंसांविकारेपुरुष-
स्यच ॥ २२ ॥ त्रिषुनासंघबुधयोःपुरुषस्यपदांतरे ॥ फलोदयःपु
मान्हर्षेत्रिदिवेशालयेपिच ॥ २३ ॥ भागधेयंमतंभाग्येभागधेया

...बुधेवहलायुधे॥२६॥बिलेशयस्तु
पुल्लिंगोमूषिकेचभुजंगमे॥वैनतेयस्तुगरुडेस्यात्प्रभाकरसार-
थौ॥२७॥संपरायःसमीकेस्यादापदुत्तरकालयोः॥समाह्वयस्तु
पक्षिभिःखगैर्द्यूतेचसंगरे॥२८॥भवेत्समुदयःसंघेसंयुगेचसमुद्गमे
॥समुदायःसमूहेस्याद्युद्धेसमुच्छ्रयःपुमान्॥२९॥विरोधोत्से
धयोःस्थूलोच्चयोगंडोपलेपिच॥गजानांमध्यमगतेप्यसाकल्यवक्र-
योः॥३०॥हिरण्मयःस्मरज्येष्ठेनासुवर्णमयेत्रिषु॥ ॥यपंच
कालानुसार्यंशैलेयेकालीयेशिंशपाद्रुमे॥३१॥दुग्धतालीय
मिस्येनदुग्धाग्रक्षीरफेनयोः॥अथप्रवचनीयंनस्यात्प्रवक्तृप्रवा-
च्ययोः॥३२॥वृषाकपायीस्त्रीगौरीवरीजीवंतिकासुच॥ ॥
यषट्॥ ॥प्रत्युद्गमनीयमुपस्थेयेधौतांशुकद्वये॥३३॥
विष्वक्सेनप्रियालक्ष्म्यांवाराह्यामपियोषिति॥ ॥
इतियांतवर्गः॥ ॥१५४४॥ ॥रैकं॥ ॥
रःस्मृतःपावकेतीक्ष्णेराःपुंसिस्वर्णवित्तयोः॥श्रीर्वेशरचनाशोभा
भारतीसरलद्रुमे॥१॥लक्ष्म्यांत्रिवर्गसंपत्तिविधोपकरणेषुच॥विभू
तौचमतौचस्त्रीस्नुःस्त्रियांनिर्झरेस्रवे॥२॥ ॥रद्विः॥ ॥
अरंशीघ्रेचचक्रांगेशीघ्रगेपुनरन्यवत्॥अग्रंपुरस्तादुपरिपरि-
माणेपलस्यच॥३॥आलंबनेसमूहेचप्रांतेचस्यान्नपुंसकम्॥अधि
केचप्रधानेचप्रथमेचाभिधेयवत्॥४॥अस्त्रःकोणेकचेपुंसिक्ली
बमश्रुणिशोणिते॥अस्त्रंप्रहरणेचापेकरवालेनपुंसकम्॥५॥
अभ्रंमेघेचगगनेधातुभेदेचकांचने॥अद्रिःशैलद्रुमार्केष्वं
घ्रिर्नापादमूलयोः॥६॥आराचर्मप्रभेदिन्यांपुंसिभौमशनैश्चरे

आर्द्रानक्षत्रभेदेस्यात्स्त्रियांक्लिन्नेभिधेयवत् ॥७॥ आरुःपुंसिनरोमें
दितथाकर्कटदंष्ट्रिणोः॥ इंद्रःशक्रादित्यभेदयोगभेदांतरात्मसु ॥८
इंद्रा फणिज्झकेस्त्रीस्यादिराभूवाक्सुरांबुषु ॥ उग्रःशूद्रासुतेक्ष
त्राद्रुद्रेपुंसित्रिषूत्कटे ॥९॥ स्त्रीवचाक्षतयोरुष्ट्रीकर्कर्यांकरभेपुमा
न् ॥ उस्रोवृषेचकिरणेपुंस्युस्रार्जुन्युपचित्रयोः ॥१०॥ ऐंद्रिःकाके
जयंतेनाथौड्रःपुंभूम्निनीवृति ॥ ओड्रःस्यान्नोजवापुष्पेक्षरंनी
रेक्षरोंबुदे ॥११॥ करोवर्षोपलेरश्मौपाणौप्रत्यायशुंडयोः ॥ कद्रु
स्त्रिषुस्वर्णपिंगेनागानांमातरिस्त्रियाम् ॥१२॥ कारोवधेनिश्चये
चबलौयत्नेयतावपि ॥ तुषारशैलेपिपुमान्स्त्रियांदूत्यांप्रसेवके ॥१३
स्वर्णकारिकायांचबंधनागारबंधयोः ॥ क्षारोरसांतरेधूर्तेलवणे
काचभस्मनोः ॥१४॥ कारिःस्त्रियांक्रियायांस्याद्वाच्यलिंगस्तुशि-
ल्पिनि ॥ कारुर्विश्वकर्मणिनात्रिषुकारकशिल्पिनोः ॥१५॥ क्षीरं
दुग्धेजलेकीरःशुकेपुंभूम्निनीवृति ॥ कुरुर्नृपांतरेभक्तेपुमान्पुं
भूम्निनीवृति ॥१६॥ क्षुद्रःस्यादधमेक्रूरेकृपणाल्पेषुवाच्यवत् ॥
क्षुद्राव्यंगानटीकंटकारिकासरघासुच ॥१७॥ चांगेरीवेश्ययो
र्हिंस्रामक्षिकामात्रकेषुच ॥ क्षुरःस्याच्छेदनद्रव्येकोकिलाक्षेचगो
क्षुरे ॥१८॥ क्रूरःकठिनेघोरेनृशंसेप्यभिधेयवत् ॥ कृच्छ्रमा
स्यातमाभीलेपापसंतापनादिनोः ॥१९॥ क्षेत्रंशरीरेकेदारेसिद्ध-
स्थानकलत्रयोः ॥ क्रोष्ट्रीशृगालिकाकृष्णाविदारीलांगलीषुच ॥२०
क्षौद्रंमधुनिपानीयेखरःस्यात्तीक्ष्णघर्मयोः ॥ गर्दभेऽस्त्रीदेवताडे
खरुर्दर्पेहरेहये ॥२१॥ दंतेपुंसित्रिषुश्वेतेखुरंकोलदलेशफे ॥ ग
रीस्तरायांकरणेक्लीबंन्नोपविषेविषे ॥२२॥ गात्रंगजाग्रजंघादौक्ली
बमंगेकलेवरे ॥ गीःस्त्रीभाषासरस्वत्योर्गिरिर्नानेत्ररुग्भिदि ॥२३
अद्रौगिरियकेयोषिद्गीर्णपूज्येषुनस्त्रिषु ॥ गुंद्रस्तेजनकेस्त्रीतुप्रि
यंगौभद्रमुस्तके ॥२४॥ गुरुस्त्रिलिंग्यांमहतिदुर्जरालघुनोरपि ॥

पुमान्निषेकादिकारेऽपवादेस्त्रीमंत्रिणि ॥ २५ ॥ गृध्रः खगांतरे पुं-
सि वाच्यलिंगोऽथ लुब्धके ॥ गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्य
योः ॥ २६ ॥ संभावनीयबोधे च काननक्षेत्रवर्त्मसु ॥ गौरः पीतेऽरुणे
श्वेते विशुद्धे चाभिधेयवत् ॥ २७ ॥ नाश्वेन सर्षपे चंद्रे न द्वयोः पद्म
केसरे ॥ गौरी त्वसंजातरजःकन्याशंकरभार्ययोः ॥ २८ ॥ रोचनी
रजनी पिंगा प्रियंगु वसुधासु च ॥ आपगाया विशेषेऽपि यादसांप
तियोषिति ॥ २९ ॥ घस्रस्तु दिवसे हिंस्रे घोरं भीमे हरेऽपि च ॥ चरो
क्षद्यूनभेदे च भौमे चारे त्रसे चले ॥ ३० ॥ चंद्रः कर्पूरकांपिल्लसुधां
शुस्वर्णवारिषु ॥ चक्रः कोके पुमान्क्लीबं व्रजे सैन्यरथांगयोः
॥ ३१ ॥ राष्ट्रे दंभांतरे कुंभकारोपकरणास्त्रयोः ॥ जलावर्तेऽप्यथ चरुः
पुमान्हव्यान्नभांडयोः ॥ ३२ ॥ चारः पियालवृक्षे स्याद्गतौ बंधा
पसर्पयोः ॥ चारुर्बृहस्पतौ पुंसि शोभनेऽप्यभिधेयवत् ॥ ३३ ॥
चित्राखुपर्णीगोडुंबासुभद्रादंतिकासु च ॥ मायायां सर्पनक्षत्रे
नदीभेदेषु च स्त्रियां ॥ ३४ ॥ तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि
त्रिषु चकयोस्त्वन्यलिंगं चीरी झिल्ल्यां नपुंसकम् ॥ ३५ ॥ गोस्तने वस्त्र
भेदे च रेखालेखनभेदयोः ॥ चुक्रं वृक्षाम्ले चांगेर्यां स्त्रीपुंस्यम्ले-
म्लवेतसे ॥ ३६ ॥ चैत्रं मृते देवकुले ना भूभृन्मासभेदयोः ॥ चौरः
पाटच्चरेऽपि स्याच्चौरपुष्पौषधावपि ॥ ३७ ॥ छत्रा मिसावतिच्छत्रे कु
स्तुंबुरुशिलींध्रयोः ॥ नपुंसकं चातपत्रे छिद्रं दूषणरंध्रयोः ॥ ३८
जारी स्यादौषधीभेदे स्त्रियामुपपतौ पुमान् ॥ जीरस्तु जरणे खड्
गे टारो रंगतुरंगयोः ॥ ३९ ॥ तूरस्तु तरणे पुंसि दशाकोपेटके तरी ॥
तंत्रं कुटुंबकृत्ये स्यात्सिद्धांते चौषधोत्तमे ॥ ४० ॥ प्रधाने तंतुवाये
च शास्त्रभेदे परिच्छदे ॥ श्रुतिशाखांतरे हेतावुभयार्थप्रयोजके ॥ ४१
इतिकर्तव्यतायां च तंत्री वीणागुणे मता ॥ अमृतादेहशिरयोस्तं
द्रीनिद्राप्रमीलयोः ॥ ४२ ॥ तारो वानरभिन्मुक्ताविशुद्ध्योः शुद्ध-

मौक्तिके॥ नानक्षत्रेऽक्षिमध्ये च न नारूप्ये नपुंसकम्॥४३॥ स्त्री तु बृह
देवताभेदे वालिगीष्पतिभार्ययोः॥ त्रिलिंगोऽत्युच्चशब्दे च तारं तु शु-
ल्वे रूप्येऽपि च॥४४॥ तीव्रा तु कटुरोहिण्यां राजिकागंडदूर्वयोः॥
त्रिषूष्णे नितांते च कटौ तीरं तु रोधसि॥४५॥ पुंसि त्रपुणि तोत्रं तु
गजवेधे वेणुकेऽपि च॥ दरोऽस्त्री साध्वसे गर्ते कंदरे तु दरी स्मृता॥४६॥
दरा श्वयथुना गर्ये दस्रः खरेऽश्विनीसुते॥ दारु स्यात्त्रिनले काष्ठे दे
वदारौ नपुंसकम्॥४८॥ द्वारं निर्गमनेऽपि स्यादुपाये धरो गिरौ॥ का
र्पासतूलके कूर्मराजे वस्वंतरेऽपि च॥४८॥ धरा विश्वंभरायां च स्त्रीग
र्भाशयमेदसोः॥ धात्री जनन्यामलकी वसुमत्युपमातृषु॥४९॥ धा
रा सैन्याग्रिमस्कंधे तुरंगगतिपंचके॥ घटादिच्छिद्रसंतत्योः प्रपाते स्याद्द
वस्य च॥५०॥ खड्गादेर्निशितमुखे धारो ग्रावांतरेऽप्यृणे॥ धीरा धैर्या
न्विते स्वैरे धीरः स्यात्त्रिषु पंडिते॥५१॥ स्वच्छंदे धैर्ययुक्ते च कुंकुमे तु नपुं
सकम्॥ स्त्रियां श्रवणतुल्यायां धोम्रं भूमलईरितं॥५२॥ नथावास्त्रकस्था
नभेदे नरो जेमनुजेऽर्जुने॥ क्लीबं तु रामकर्पूरे नक्रं स्यादस्त्रदारुणि॥५३॥
नासायां पुंसि कुंभीरे नारस्त्वर्णकसीरयोः॥ नीध्रं नेमौ वलीके द्रौ रेवती
भे कानने॥५४॥ नेत्रं मंथगुणे वस्त्रभेदे मूले द्रुमस्य च॥ रथे च स्त्रकषि
नद्यां तु नेत्री नेतरि वाच्यवत्॥५५ परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु के
वले॥ पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः॥५६॥ पारं परतटे प्रांते
न स्त्री पारा नदीभिदि॥ पारी पूरे च कर्क्यां पादरज्जौ च दंतिनः॥५७
पात्रं तु भाजने योग्ये स्रुवादौ राजमंत्रिणि॥ तीरद्वयांतरे चाथ पुरुः प्रा-
ज्ञेऽभिधेयवत्॥५८॥ पुंसि स्याद्देवलोके च नृपभेदपरागयोः॥ पुरं न
पुंसकं गेहे देहपाटलिपुत्रयोः॥५९॥ पुष्पादीनां दलानद्धौ नागुग्गुलौ न
नापुरः॥ पुंड्रो दैत्यविशेषेक्षुभेदयोरतिमुक्तके॥६०॥ त्रिनक्रमौ पुंड
रीके पुंभूम्नि नीवृदंतरे॥ पूरो जलसमूहे स्याद्व्रणसंशुद्धिखाद्ययोः॥
६१॥ पोत्रं वस्त्रे मुखाग्रे च सूकरस्य हलस्य च॥ पौरं त्रिषु पुरोद्भूते कं

रणेतुनपुंसकम्॥६२॥वरोजामातरिवृतौदेवतादेरभीप्सिते॥
षिड्गेपुंसित्रिषुश्रेष्ठेकुंकुमेतुनपुंसकम्॥६३॥वरीप्रोक्ताशताव-
र्यांवराचस्यात्फलत्रिके॥मनागिष्टेवरंक्लीबेकेचिदाहुस्तदव्ययम्॥
६४॥बभ्रुर्वैश्वानरेशूलपाणौचगरुडध्वजे॥विशालेनकुलेपुंसिपिं
गलेत्वभिधेयवत्॥६५॥वक्रःशनैश्चरेपुंसिपुटभेदेनपुंसकम्॥त्रि
षुक्रूरेचकुटिलेवारःसूर्यादिवासरे॥६६॥द्वारेहरेकुब्जवृक्षेवृंदावस
रयोःक्षणे॥वारीस्याद्गजबंधन्यांकलश्यामपियोषिति॥६७॥वारि
र्वाग्गजबंधन्योःस्त्रीक्लीबेंतुनिबालके॥वीरोरसविशेषेस्यादुत्तरे
क्रमदेत्रिषु॥६८॥स्त्रीमुराक्षीरकाकोलीतामलक्येलवालुके॥प
त्निपुत्रवतीरंभाविदारीदुग्धिकासुच॥६९॥मलपूःक्षीरविदार्योःक्ली
बंशृंग्यांनलेपिच॥भरुःस्वर्णेहरेपुंसिभरोतिशयभारयोः॥७०॥
भद्रःशिवेखंजरीटेवृषभेतुकदंबके॥करिजातिविशेषेनाक्लीबंमंग
लमुस्तयोः॥७१॥कांचनेचस्त्रियांरास्नाकृष्णाव्योमनदीषुच॥ति
थिभेदेप्रसारिण्यांकट्फलानंतयोरपि॥७२॥त्रिषुश्रेष्ठेचसाधौच
नपुंसिकरणांतरे॥भारःस्याद्वीवधेविष्णौपलानांद्विसहस्रके॥
॥७३॥भीरुरार्त्तेत्रिलिंगःस्याद्रयोषितियोषिति॥भूरिर्नावा
सदेवेचहरेचपरमेष्ठिनि॥७४॥नपुंसकंसुवर्णेचप्राज्येस्याद्वा-
च्यलिंगकः॥मंत्रोवेदविशेषेस्याद्देवादीनांचसाधने॥७५॥गुह्य
वादेपिचपुमान्मरुर्नागिरिधन्वनोः॥मात्राकर्णविभूषायांवित्ते-
मानेपरिच्छदे॥७६॥अक्षरावयवेस्वल्पेक्लीबंकार्त्स्न्येवधारणे॥मारो
मृतौस्मरेविघ्नेमारीचंक्षांजनस्यपे॥७७॥मारिःस्त्रीमारणेव
र्थेभिन्नंस्फुटहृदिनद्वयोः॥सूर्येपुंसिपुरागंधद्रव्येदैत्यांतरेपुमान्॥
७८॥यात्रातुयापनेपिस्याद्गमनोत्सवयोःस्त्रियाम्॥रंध्रंतुदूष
णेछिद्रेराधुःस्यादुपवर्तने॥७९॥उपद्रवेक्लीबपुंसोःक्रूकनांमृग
दैत्ययोः॥वेत्रंवेमनिपीयूषेपदवासेपिस्त्वर्के॥८०॥रोध्रोनामा

लेवक्लीबमपराधेचकिल्बिषे॥रौद्रंधर्मेरसेचंड्यांस्त्रीतीव्रेभीषणेत्रिषु
॥८१॥वज्रंस्याद्धालकेधान्यांक्लीबंयोगांतरेपुमान्॥वज्रास्तुत्र्यांगु
डूच्यांचवज्रीस्नुह्यंतरेस्मृता॥८२॥दंभोलौहीरकेप्यस्त्रीवर्द्धंभपु
वरत्रयोः॥वध्रस्तातेपुमानस्त्रीरेणुक्षेत्रेचपेतटे॥८३॥वक्रंपुरेव
स्त्रभेदेव्यग्रोव्यासक्तआकुले॥वस्त्रोनादिवसेक्लीबंमांदरेचचतुष्प
थे॥८४॥व्याघ्रःस्यात्पुंसिशार्दूलेरक्तैरंडकरंडयोः॥श्रेष्ठेनराद्युत्तर
स्थःकंटकार्यांतुयोषिति॥८५॥वृत्रोरिपौघनेध्वांतेशैलभेदेचदानवे
॥वेरःकलेवरेक्लीबंवार्ताकौकुंकुमेपिच॥८६॥शोद्रीस्त्र्यांपणपादेना
गेनसाहोझषांतरे॥शरस्तेजनकेबाणेदध्यग्रेनाशरंजले॥८७॥श
स्त्रंलोहास्त्रयोःक्लीबंछुरिकायांतुयोषिति॥शक्रःपुमान्देवराजेकुट-
जार्जुनभूरुहोः॥८८॥शार्ङ्गीर्नाभोधरेजिष्णौशरुर्नाकोपवज्रयोः॥
शारिर्नाक्षोपकरणेस्त्रियांशकुनिकांतरे॥८९॥युद्धार्थगजपर्याणेव्य
वहारांतरेपिच॥शारःस्याच्छबलेवाच्यलिंगःपुंसिसमीरणे॥९०॥अस्त्रो
पकरणेशास्त्रंनद्यागमाज्ञयोः॥शिग्रुर्नाशाकमात्रेचशोभांज
नमहीरुहे॥९१॥शिरोनापिप्पलीमूलेस्याद्रुमत्यांचयोषिति॥शी
घ्रंनलदेचक्रांगेक्लीबंद्रुतगतौत्रिषु॥९२॥शुभ्रंस्यादभ्रकेक्लीबमुद्दी
प्तशुक्लयोस्त्रियोस्त्रिषु॥शुक्रःस्याद्भार्गवेज्येष्ठमासेवैश्वानरेपुमान्॥
९३॥रेतोक्षिरुग्भिदोःक्लीबंशूरःस्याद्यादवेभटे॥स्वरुःपुमान्यूपखं
डेभिदुरेप्यथशरे॥९४॥सत्रंयज्ञेसदादानेछादनारण्यकैतवे॥
सरोदध्यग्रगत्योर्नास्वरोनासासमीरणे॥९५॥उदात्तादावकारादौ
षड्जादौचध्वनौपुमान्॥सारोबलेस्थिरांशेचमज्ज्ञिपुंसिजलेधने
॥९६॥न्याय्येक्लीबंत्रिषुवरेसांद्रवनेघटेमृदौ॥स्फारःस्यात्पुंसिविक
टेकनकादेश्चबुद्बुदे॥९७॥सिध्रोनिदाघसलिलेसिध्रानुसरदंतरे॥
स्थिरानाभूमालपर्यानाभानौमोक्षेचलेद्रढे॥९८॥सीरोर्कहलयोः
पुंसिसुराचषकमद्ययोः॥पुल्लिंगस्त्रीदिवेशेस्यात्सूत्रंतंतुव्यवस्थयोः

॥९९॥शाल्मल्यादिसूचनाग्रंथेस्वैरःस्वच्छंदमंदयोः॥हरिश्चंद्रार्कवा
ताश्वशुकभेकयमाहिषु॥१००॥कपौसिंहेहरेऽजेंशौशक्रेलोकांत
रेपुमान्॥वाच्यवल्लिंगहरितोर्हारोमुक्ताकलेयुधि॥१॥हारिःपथि
कसंघाताद्यूतादिभंगयोःस्त्रियां॥हिंस्राखेलावलीमांस्योःस्त्रियां-
स्याद्वालुकेऽन्यवत्॥२॥हीरानैलांबुकालक्ष्म्योःपुंसिशंकरवज्रयोः
हारालभेपिराशयद्भैरवाशाल्मभिदोरपि॥३॥ ॥रत्रिः॥ ॥
अमरस्त्रिदशेप्यस्त्रीसंहारेकुलिशद्रुमे॥स्त्रीगुडूच्यमरावत्योःस्थू
णादूर्वाजरायुषु॥४॥अपरंगजपश्चार्द्धेस्याज्जरायोतुयोषिति॥इत
रस्मिन्नपिनथाऽर्वाचीनेऽप्यन्यलिंगकम्॥५॥अधरस्तुपुमानोष्ठेही
नेऽनूर्ध्वेचवाच्यवत्॥अध्वरस्सावधानेस्याद्वसुभेदेक्रतौपुमान्॥६
अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये॥छिद्रात्मीयविना
बहिरवसरमध्यात्मसदृशेषु॥७॥अवरंगजांत्यजंघादिदेशेपिचरमे
त्रिषु॥अंबरंनहयोर्व्योम्निस्सगंध्यंतरवस्त्रयोः॥८॥अंगारस्सुल्मु
केनस्त्रीपुल्लिंगस्तुमहीसुते॥अंकुरोरुधिरेलोम्निपानीयेभिनवोद्भि
दि॥९॥अजिरंप्रांगणेवातेविषयेदर्दुरेतनौ॥स्त्रीचंड्यामक्षरंब्रह्म
वर्णयोःपुंसिशंकरे॥१०॥अशिरोवीतिहोत्रेस्याद्राक्षसेभास्करेपुमा
न्॥अंडीरःपुरुषेशक्तेऽररंतुदकपाटयोः॥११॥अवीराऽपतिपुत्रा
यांस्त्रीसत्वरहितेत्रिषु॥अगुरुक्लीबंजोंककशिंशपयोर्वाच्यवल्ल
घुनि॥१२॥असुरारजनीराश्योरसुरोदेवारिभास्करयोः॥आक
रोनिवहोत्पत्तिस्थानश्रेष्ठेषुकथ्यते॥१३॥आधारस्त्वाधिकरणेप्या
लवालांबुधारणे॥आसारःस्यात्प्रसरणेवेगवद्वर्षेसुहृद्बले॥१४॥आ
हारःस्यादाहरणेभोजनेचपुमानयं॥आवारस्तुपुमान्वैश्वानरेचर-
जनीचरे॥१५॥आकारइंगिताकृत्योरितरोऽन्यश्चपामरे॥इत्वरं
सत्यांपथिकेक्रूरकर्मणिचत्रिषु॥१६॥ईश्वरोमन्मथेशंभौनाथेस्वा
मिनिचान्यवत्॥ईश्वरीचेश्वरोमायामुदरंजठरेयुधि॥१७॥ ॥

उदारो दातृमहतोर्दक्षिणेप्यभिधेयवत्॥ उर्वरा सर्वसस्याढ्यभूमौ
स्याद्भूमिमात्रके॥१८॥ उत्तरा दिग्विशेषे च स्नुषायामर्जुनस्य च॥ विरा
टस्य सुतेनास्यादूर्ध्वोदीच्योत्तमे त्रिषु॥१९॥ नपुंसकं प्रतिवाक्ये ऽथो
ढ्वारश्चोर्ध्वतावृणे॥ ऋक्षरं वारिधारायामृक्षरश्चर्त्विजि स्मृतः॥
२०॥ एकाग्रमन्यलिंगं स्यादेकतानेप्यनाकुले॥ औशीरं शयनास-
ने चामरदंडेप्युशीरजे प्रोक्तं॥२१॥ क्रकरः करीरवृक्षे दीने क्रकचे च
पक्षिभेदे च॥ कदरः श्वेतखदिरे क्रकचव्याधिभेदयोः॥२२॥ कर्बुरं
सलिले हेम्नि कर्बुरः पापरक्षसोः॥ कर्बुरा कृष्णवृंतायां शबले पु
नरन्यवत्॥२३॥ कर्परः स्यात्कपाले च शस्त्रभेदकटाहयोः॥ कंध
रो वारिवाहे स्याद्ग्रीवायां कंधरा मता॥२४॥ कर्बरः कथितो व्याघ्रे
शिवायामपि कर्बरी॥ कंजारो जठरे सूर्ये विरिंचौ वारणे मुनौ॥२५
॥ करीरो वंशांकुरे स्त्री वृक्षभिद्घटयोः पुमान्॥ करीरी चीरिका
यां च दंतमूले च दंतिनां॥२६॥ कटित्रं रसनायां च वर्मांगे कटिवास-
सि॥ कच्छुरा शूकशिंब्यां च शटीदुःस्पर्शयोरपि॥२७॥ कच्छुरः पुंश्च
लेवान्यलिंगः स्यात्पामरेपि च॥ कवरं लवणाम्ले स्त्री पृथ्वीतुंगे कच्चां
नरे॥२८॥ कबुर्भुमायां नारसः पापयोर्भेषजांतरे॥ कर्मारो जाति-
भेदे च तथा विसारे च पुंस्ययम्॥२९॥ करेणुः कर्णिकारे च करिणीवे-
श्ययोः स्त्रियां॥ कत्वरं कुत्सिते वाच्यलिंगं तक्रे नपुंसकं॥३०॥ क-
र्करी भांडभेदे ना दर्पणे कठिने त्रिषु॥ कडारः पिंगले दासे कलत्रं
श्रोणिभार्ययोः॥३१॥ दुर्गस्थाने नृपादीनां कटप्रूः पुंसि राक्षसे॥ वि
द्याधरे महादेवे तथा स्याद्वृक्षदेवने॥३२॥ कंदरस्त्वंकुशे पुंसि गुहा
यां न नपुंसकं॥ कर्चूरः स्यात्पुमाञ्छठ्यां स्वर्णे तु नपुंसकं॥३३॥
काश्मीरं कुंकुमेऽपि स्याट्टंकपुष्करमूलयोः॥ कावेरी स्यात्सरिद्भेदे
पण्यनारीहरिद्रयोः॥३४॥ कांतारो स्त्री महारण्ये बिले दुर्गमवर्त्मनि
॥ पुंसि स्यादिक्षुभेदेथ किशोरोऽश्वस्य शावके॥३५॥ तैलपर्ण्यौ

षंधोचस्यात्तरुणावस्थसूर्ययोः॥ किर्मीरो नागरंगे च कर्बुरे राक्षसांत
रे॥ ३६॥ किंशारुर्नासस्यशूके विशिखे कंकपक्षिणि॥ कुहरं गह्वरे-
छिद्रे क्लीबं नागांतरे पुमान्॥ ३७॥ कुक्कुरः सारमेये ना ग्रंथिपर्णे न-
पुंसकं॥ कूर्परः स्यात्कफोणौ च जानुदेशे च पुंस्ययं॥ ३८॥ कुंजरो
ऽनेकपे केशे स्त्री धातक्यां च पाटलौ॥ कुमारः स्याच्छुके स्कंधे युवरा
जेऽश्ववारके॥ ३९॥ बालके वरुणद्रौ ना नद्योर्जात्यकांचने॥ कुमारी
शैलतनयानवमाल्योर्नदीभिदि॥ ४०॥ सहाऽपराजिता कन्या जंबूद्वी
पेषु च स्त्रियां॥ कुठारुर्ना द्रुमे केशे कुद्दारं केवलेरते॥ ४१॥ कुबेरः
स्यात्पुंसि नदीवृक्षे पुण्यजनेश्वरे॥ कूबरस्त्रिषु चारौ ना कुब्जके ऽ
स्त्री युगंधरे॥ ४२॥ केसरं हिंगुनि क्लीबं किंजल्के न स्त्रियां पुमान्॥ सिं
हच्छटायां पुन्नागे बकुले नागकेसरे॥ ४३॥ केदारो ऽद्रौ शिवक्षेत्रे भूमि
भेदालवालयोः॥ केनारः पुंसि नरके शिरःकपोलसंधिषु॥ ४४॥ को
टिरः पुंसि नकुले शक्रगोपकशाक्रयोः॥ कोट्टारो नागरे कूपे पुष्करिण्या
श्च पाटके॥ ४५॥ खपुरः क्रमुके भद्रमुस्तके ऽलसकेऽपि च॥ खर्परस्त
स्करे धूर्ते भिक्षाभांडकपालयोः॥ ४६॥ खर्जूरं रूप्यखलयोर्वृश्चिके ना
द्रुमे द्वयोः॥ खदिरः शाकभेदे स्त्री ना चंद्रे दंतधावने॥ ४७॥ खंडाभ्र
मभ्रलेशे स्यात्तथा दंतक्षतांतरे॥ खिंखिरः स्त्री शिवाभेदे खट्वांगे वा
सिधानके॥ ४८॥ गणेरुः कर्णिकारद्रौ करिणीवेश्ययोः स्त्रियां॥ ग-
र्गरो मीनभेदे स्त्री मंथन्यामथ गह्वरः॥ गुहागहनदंभेषु निकुंजे तु
पुमानयं॥ गांधारः पुंसि सिंदूरे रागदेशप्रभेदयोः॥ ५०॥ गायत्री त्रि
पदादेवी छंदोभित्खदिरेषु ना॥ गोपुरं द्वारि पूर्द्वारि कैवर्तीमुस्तकेऽपि
च॥ ५१॥ घर्घरो ना चलद्वारि द्वारोलूकनदांतरे॥ स्त्री क्षुद्रघंटयां वी
णायां भेदे स्वरांतरेऽपि च॥ ५२॥ चमरं चामरे स्त्री तु मंजरी मृगभेद
योः॥ चंचिरो ऽनेकपे चंद्रे चत्वरं स्थंडिले गणे॥ ५३॥ चंक्रः स्पंद
ने ऽश्वे चातुरो नेत्रगोचरे॥ चाटुकारे नियंतोऽथ चिबुरास्यं तु चा

चुरी॥५४॥ चक्रगंडौ च पुंसि स्याच्चामरं चामरापि च॥ दंडे च बा
लव्यजने चिकुरस्तरलागयोः॥५५॥ पक्षिवृक्षभिदोः केशे गृहबभ्रौ
सरीसृपे॥ छिद्रिरः पावके रज्जौ करवाले परश्वधे॥५६॥ छिदुरश्छे
दनद्रव्ये धूर्ते वैरिणि च त्रिषु॥ जठरो ना स्त्रियां कुक्षौ बद्धकर्कटयोस्त्रि
षु॥५७॥ जर्जरं शैवले शक्रध्वजे त्रिषु जरातुरे॥ जंबीरः प्रस्थपृ
ष्ठ स्यात्पुंसि दंतशठद्रुमे॥५८॥ जलेंद्रः पुंसि वरुणे जंभले च महो
दधौ॥ झर्झरः स्यात्कलियुगे वाद्यभांडे नदांतरे॥५९॥ झल्लरी
झल्लरी च दंडे हुडुक्के बालकुंतले॥ टट्टरी स्यान्मृषावादे लंपापटहवा
द्ययोः॥६०॥ टंकारो विस्मये पुंसि प्रसिद्धौ शिंजिनीध्वनौ॥ टगरष्ट
कणक्षारे हेलाविभ्रमगोचरे॥६१॥ नान्यवल्केकरासे स्यात् डिंगरो डं
गरेपि च॥ क्षेपे तमिस्रं तिमिरे कोपे स्त्रीतु तमस्ततौ॥६२॥ कृष्णपक्ष
निशायां च त्वक्पत्रं तु वरांगके॥ स्त्रीकारव्यां च तिमिरं ध्वांते नेत्राम
यांतरे॥६३॥ तीवरो नांबुधौ व्याधे तुंबुरी कुक्कुरस्त्रियां॥ धन्याकेपि
तुषारस्तु शीकरे शीतले हिमे॥६४॥ तुवरस्तु कषाये स्यात्काश्या
ढक्यास्तुवर्यपि॥ तूबरः श्मश्रुपुरुषे प्रौढशृंगारकेपि च॥६५॥ पुरु
षव्यंजनत्यक्ते स्यात्कषायरसेपि च॥ दहरो मूषिकायां च स्वल्पे भ्रा
तरि बालके॥६६॥ दंतुरस्तून्नतरदे तथोन्नतनते त्रिषु॥ दर्दरः
पर्वते पुंसि त्रिषु शीर्णभग्नभाजने॥६७॥ दर्दुरस्तोयदे भेके वाद्यभां
डाद्रिभेदयोः॥ दर्दुरा चंडिकायां स्याद्ग्रामजाले नपुंसकं॥६८॥
दंडारो वहले मत्तवारणे शरयंत्रके॥ कुंभकारस्य चक्रे च द्वापरः
संशये युगे॥६९॥ दासेरो दासिकापत्ये त्रिषु पुंसि क्रमेलके॥ दु-
र्धरः पुंसि नरकांतरे स्याद्वृषभौषधौ॥७०॥ दैत्यारिः पुंसि सामान्य
देवे च गरुडध्वजे॥ धूसरी किन्नरीभेदे ना खरे त्रिषु पांडुरे॥७१॥
नरेंद्रस्तु महीपाले विषवैद्ये च पुंस्ययं॥ नर्मरा तु दरीभस्त्रासरला
निष्फलास्तु च॥७२॥ नागरस्तु स्तके शुंठ्यां विदग्धे नगरोद्भवे॥ नि

करोनिवहेसारेन्यायदेयवनेनिधौ॥७३॥निर्झ्ररस्तुसहस्त्रांशुतुरंगेतुषपावके॥ निर्जरस्यात्सुमान्देवेजरासक्तेचवाच्यवत्॥७४॥निर्जरातुगुडूच्यांचतालपर्ण्यामपिस्त्रियाम्॥निकारःस्यात्परिभवेधान्यस्योत्क्षेपणेपिच॥७५॥निर्दरंनिर्भरेसारेऽन्यवत्तुकठिनेऽत्रपे॥ स्यान्नीवरोवणिजकेवास्तव्येचपुमानयं॥७६॥प्रवरःसंततौगोत्रेक्लीबंश्रेष्ठेतुवाच्यवत्॥ प्रवरोहयसन्नाहेकुक्कुरेऽश्वतरेऽपिच॥७७॥पुंसित्रिष्वंतरस्तरेपवित्रंवर्षणेकुशे॥ताम्रेपयसिचक्लीबंमेध्येस्यादभिधेयवत्॥७८॥प्रदरोरोगभेदेस्याद्विदारेशरभंगयोः॥ प्रकरःस्यात्पुमान्संघेविकीर्णकुसुमादिषु॥७९॥नपुंसकंजोंगकेस्त्रीनाड्यांगेचत्वरावलौ॥ पंकारःशैवलेसेतौसोपानेजलकुब्जके॥८०॥प्रस्तरोग्रावणिमणौप्रकारस्तुल्यभेदयोः॥पद्वारःपादधूलौस्यात्पादालिंदेधिपुंस्ययम्॥८१प्रसरःप्रणयेवेगेस्यात्सारीरस्तुमूलके॥ केदारेवेणुसारेचवारिदेतितउत्थापि॥८२॥स्याद्वंगेवातिकेपुंसिपामरःखलनीचयोः॥पांडुरंस्यान्मरुबकेवर्णेनातद्वतित्रिषु॥८३॥पार्परीभक्तसिक्थेस्यात्क्लीनाशेराजयक्ष्मणि॥जराटेपिकदंबस्यकेसरेचगदांतरे॥८४॥प्रांतरंविपिनेदूरशून्यवर्त्मनिकोटरे॥ पिठरःस्थाल्यांनाक्लीबंमुस्तामंथानदंडयोः॥८५॥ पिंजरोश्वांतरेक्लीबंस्वर्णेपीतेचवाच्यवत्॥ पिंडारःक्षपणेगोपेमहिषीरक्षकेद्रुमे॥८६॥पीवरःकच्छपेस्थूलेपुष्करंखेंबुपद्मयोः॥तूर्यवक्रेखड्गफलेहस्तिहस्ताग्रकांडयोः॥८७॥कुष्ठौषधेद्वीपतीर्थभेदयोश्चनपुंसकं॥नारोगनागविहगनृपभेदेषुवारुणे॥८८॥बठरःस्थगिकारज्जौलांगूलेकुक्कुरस्यच॥करीरकोशेतालस्यपल्लवेचपयोधरे॥८९॥बंधुरंमुकुटेपुंसिस्त्रीचंगलेलकल्कयोः॥बंधूकेबधिरेहंसेत्रिषुस्यादुन्नतानतयोः॥९०॥बंधुरापण्ययोषायांस्त्रियांभूम्निचसक्तुषु॥बंधुरःशोभनेनम्रेवरत्रारज्जुकक्षयोः॥९१॥भ्रमरःकामुकेभृंगेभ्रामरंमधुनिस्मृतं॥पुंसिप्रस्तरभेदेऽथभास्करोऽग्नौप्रभाकरे॥

॥१२॥ भार्यारुःशैलभेदेस्यान्मृगभेदेचतत्रच॥ क्रीडयापरभार्या
यांपुत्रोयेनोपपादितः॥१३॥ भृंगारीझिल्लिकायांस्यात्कनकालौपु
नःपुमान्॥ मत्सरामक्षिकायांस्यान्मात्सर्यक्रोधयोःपुमान्॥१४॥
असह्यपरसंपत्तौकृपणेचाभिधेयवत्॥ मधुराशतपुष्पायांमिश्रेया
नगरीभिदोः॥१५॥ मधुकर्कटिकामेदामधूलीयष्टिकासुच॥ क्लीबं
विषेपुंसिरसेतद्वत्स्वादुप्रियेऽन्यवत्॥१६॥ मंदरस्तुपुमान्मंथशैले
मंदारपादपे॥ वाच्यवद्बहलेमंदेमंदारःस्यात्सुरद्रुमे॥१७॥ पारिभ
द्रेऽर्कपर्णेचमंदारोहस्तिधूर्त्तयोः॥ मंदिरंनगरेऽगारेक्लीबंनामकरा-
लये॥१८॥ मंथरःकोशफलयोर्बाधमंथानयोःपुमान्॥ कुसुंभ्यांन
द्वयोर्मंदेपृथौवक्रेऽभिधेयवत्॥१९॥ मकरोयादसांभेदेनिधिराशि
प्रभेदयोः॥ मयूरोबर्हिचूडायामपामार्गेशिखंडिनि॥२००॥ महेंद्रः
पर्वतेशक्रे मधुद्रोऽलौचकामुके॥ मंदुरावाजिशालायांशयनीयार्थ
वस्तुनि॥१॥ मसूरामसुरावावेश्याव्रीहिप्रभेदयोः॥ मसूरीपा
परोगेस्यादुपधानेपुनःपुमान्॥२॥ मर्मरोवस्त्रभेदेचशुष्कपर्णध्वनौ
तथा॥ पुंसिस्त्रियांपुनःप्रोक्तामर्मरीपीतदारुणि॥३॥ मंजरीतिल
कद्रुमुक्तयोर्वल्लरीद्वयोः॥ मकुरःस्यान्मुकुरवद्दर्पणेबकुलद्रुमे॥४॥
कुलालदंडेमाठरोव्यासेऽर्कपारिपार्श्विके॥ मार्जारओतौखट्टाशेमि
हिरःसूर्यवृद्धयोः॥५॥ मुद्गरंमल्लिकाभेदेपुंसिलोष्टादिभेदने॥ मुदि
रःकामुकेमेघेमुहिरःकाममूर्खयोः॥ मुर्मुरस्तुषवह्नौस्यान्मन्मथेर
विवाजिनि॥ मृगारिःस्यात्पुंसिकंठीरवशार्दूलयोरपि॥७॥ रुधिरो-
ऽगारकेपुंसिक्लीबंतुकुंकुमासृजोः॥ बदरागृष्टिकार्पास्योरेलापर्ण्यांस्त्रि
यांपुमान्॥८॥ कार्पासस्याथिबदरीकोलौक्लीबंतुतत्फले॥ वञ्चरःकुक्कु
टेपुंसिशठेचवशिरःपुमान्॥ किपिहीहस्तिपिप्पल्योःक्लीबेऽब्धिलव
णेस्मृतः॥ बर्बरःपामरेकेशेचक्रलेनीवृदंतरे॥१०॥ फंजिकायांपुमा
न्शाकभेदपुष्पभिदोःस्त्रियां॥ वर्करःपरिहासेस्याच्छागेयुवपशाव

पि॥११॥ वल्लुरं शाडूलक्षेत्रे गहनौषधयोरपि॥ वल्लूरा त्रिषु संशुष्कमांसशूकरमांसयोः॥१२॥ वार्दरं कूष्माण्डबीजदक्षिणावर्तशंखयोः॥ वीरे च काकचिंचायां भारत्यां च नपुंसकं॥१३॥ वागरस्तु गतातंके मुमुक्षौ वातवेष्टके॥ विशारदेपि शाणेपि निर्णये वारकेपि च॥१४॥ वासरस्तु पुमान्नागप्रभेदे दिनयोरपि॥ वासुरा वासितायां स्याद्रासते यमुवि स्त्रियाम्॥१५॥ विष्टरः कुशमुष्टौ स्यादासनेपि महीरुहे॥ विस्तरो वाक्प्रपंचे स्याद्विस्तारे प्रणयेपि च॥१६॥ विदुरो नागरे धीरे कौरवाणां च मंत्रिणि॥ विधुरं स्यात्सविश्लेषेन द्वयोर्विकले त्रिषु॥१७॥ रसालायां स्त्री विदारो ज्वलोच्छ्वासाजिदारणे॥ विदारी शालपर्ण्यां च रोगभेदे क्षगंधयोः॥१८॥ विवरं दूषणे गर्ते विसरः प्रसरे व्रजे॥ विस्तारो विस्तृतौ स्तंबे विकारो विकृतौ रुजि॥१९॥ विहारो भ्रमणे स्कंधे लीलायां सुगतालये॥ शबरो म्लेच्छभेदे च पानीये शंकरेपि च॥२०॥ शंबरं सलिले पुंसि मृगदैत्यविशेषयोः॥ शंबरी चाखुपर्ण्यां स्यात्शर्वरी यामिनीस्त्रियोः॥२१॥ शर्करा खंडविकृता वुपलाकर्पुरांशयोः॥ शर्करान्वितदेशेपि रुग्भेदे शकलेपि च॥२२॥ शाक्करी छंदसो भेदे नदीमेखलयोरपि॥ शाणी स्त्रीपाणमध्यस्थे पुलिने तद्देशतटे॥२३॥ श्वशुरः पूज्ये स्त्रीभ्राभ्यां शारीरं देहजे वृषे॥ शार्करः स्याद्दुग्धफेने शर्करान्वितदेशयोः॥२४॥ शाकरस्तु बलीवर्दे छंदोभेदे नपुंसकं॥ शार्वरं त्वंधतमसे घातुके मेघलिंगकम्॥२५॥ शालारं स्याद्धस्तिनखे सोपाने पक्षिपंजरे॥ शार्वरी भूकशिंब्यां स्यात्पुंसि पापापराधयोः॥२६॥ रोध्रे च शांकरिः पुंसि कार्तिके मेगणाधिपे॥ शिखरो स्त्री द्रुमाग्राद्रिशृंगे पुलककक्षयोः॥२७॥ पक्वदाडिमबीजाभमाणिक्यशकलाग्रयोः॥ शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु॥२८॥ शिलिंध्रं कंदलीपुष्पे कवरे नाऽझषांतरे॥ द्रुमभेदे स्त्री तु विहगीभेदगंडूपदीमृदोः॥२९॥ शीकरं शरले वातस्तुतां बुकणयोः पुमान्॥ शुषिरं वंशादिवाद्ये विवरेपि नपुंसकं॥३०॥ मूषिके ना स्त्रियां गर्ते

वन्हेोरंध्रान्विते त्रिषु॥ शृंगारः सुरते नाट्यरसे च गजमंडने॥ ३१॥ न
पुंसकं लवंगे पि नागसंभवचूर्णयोः॥ संवरो दैत्यहरिणमत्स्यशैलजि
नांतरे॥ ३२॥ नपुंसकं तु सलिले बौद्धव्रतविशेषयोः॥ संकरो ऽग्निचट
त्कारे संमार्जन्यवपुंजिते॥ ३३॥ नवदूषितकन्यायां संकरी पुनरुच्यते॥
संस्कारः प्रतियत्ने तु भवे मानसकर्मणि॥ ३४॥ संस्तरः प्रस्तरे यज्ञे
संगरो युधि चापदि॥ क्रियाकारे विषे चांगीकारे क्लीबं शमीफले॥ ३५
संभारः संभृतौ संघे सामुद्रं देहलक्षणे॥ समुद्रजे ऽन्यलिंगो ऽथ सा
वित्रः शंकरे वसौ॥ ३६॥ सावित्री सत्यवत्पत्न्यां ब्रह्मपत्न्युमयोरपि॥
सिंदूरस्तरुभेदे स्यात्सिंदूरं रक्तचूर्णके॥ ३७॥ सिंदूरी रोचनी रक्त
चेलिका धातकी सु च॥ स्कनारस्कशुनीस्तन्येसर्पांडकलविंकयोः॥ ३८
सुंदरी तनुभिन्नारीभिदोः स्त्री रुचिरे ऽन्यवत्॥ सैरंध्री परवेश्मस्थ
शिल्पकृत्स्ववशास्त्रियां॥ ३९॥ वर्णसंकरसंभूतस्त्रीमहल्लिकयोरपि
॥ सौवीरं कांजिके स्रोतोंजने च बदरीफले॥ ४०॥ नातु नीवृति हारिद्रं
हरिद्रारंजिते त्रिषु॥ नानीपवृक्षे हिंडीरः फेनवार्ताकुपूरुषे॥ ४१॥ ॥
रचतुः॥ अरुष्करो व्रणकृति त्रिषु भल्लातके पुमान्॥ भवेदभि
मरो युद्धे वधे स्वबलसाधने॥ ४२॥ अनुत्तरं त्रिषु श्रेष्ठे प्रतिजल्पवि
वर्जिते॥ अलंकारस्तु हारादावुपमादावलंकृतौ॥ ४३॥ अवहारः पु
मान्चौरे द्यूतयुद्धादिविश्रमे॥ निमंत्रणोपनेतव्यद्रव्येग्राहाख्ययादसि
॥४४॥ अवतारो ऽवतरणे पुष्करिण्यादितीर्थयोः॥ अवस्करो ऽपि व
र्चस्के गुह्ये ऽथावसरः पुमान्॥ ४५॥ प्रस्तावे मंत्रभेदे च वर्षणे चापि
कीर्तितः॥ उपलादाव कूपारः कूर्मराजे महोदधौ॥ ४६॥ असिपत्रः
खड्गकोशे पुमान्निक्षौ च नारके॥ भवेदश्वतरो नागांतरे वेगसरे ऽपि च
॥४७॥ अभिहारो ऽभियोगे च चौर्ये सन्नहने ऽपि च॥ अग्निहोत्रो ऽग्नि
हविषोरर्धचंद्रो नखक्षते॥ ४८॥ गलहस्ते बाणभेदे कृष्णा त्रिवृति तु
स्त्रियां॥ आडंबरस्तूर्यपक्ष्मसंरंभे गजगर्जिते॥ ४९॥ आत्मवीरः

प्राणवति श्यालके च विदूषके॥ इंदीवरं कुवलये शतावर्यांतु योषिति॥
५०॥ उदुंबरस्तु देहल्यां वृक्षभेदे च षंडके॥ कुष्ठभेदेपि च पुमांस्ताम्रेतु स्या
न्नपुंसकं॥५१॥ उपह्वरं समीपे स्यादेकांतेपि नपुंसकं॥ उद्दंतुरस्त्रिषूत्तुं
गे करालोत्करदंतयोः॥५२॥ उपकारस्त्वोपकृतौ विकीर्णकुसुमादिषु
॥ औदुंबरः श्राद्धदेवे रोगभेदे नपुंसकं॥५३॥ अथकर्मकरो भृत्ये वेतन
ताजीविनि त्रिषु॥ कीनाशे पुंसि मूर्छायां विंबिकायामपि स्त्रियाम्॥
॥५४॥ कलिकारस्तु पूत्याटे करंजे पीतमस्तके॥ कर्णिकारः पु
मानारग्वधे द्रौ च द्रुमोत्पले॥५५॥ कर्णपूरः शिरीषे स्यान्नीलोत्पल
वसंतयोः॥ करवीरः कृपाणे स्याद्दैत्यभेदाश्वमारयोः॥५६॥ करवी
र्यद्दितिस्त्रीषु गवी पुत्रवतीषु च॥ कटंभरा प्रसारण्यां रोहिण्यां गजयो
षिति॥५७॥ कलंविकायां गोलायां वर्षाभूमूर्वयोरपि॥ कादंबरस्तु द
ध्यग्रे मद्यभेदे नपुंसकं॥५८॥ स्त्री वारुणी परभृता भारती शारिकासु
च॥ कालंजरो योगिचक्रमेलके भैरवे गिरौ॥५९॥ कुंभकारी कुल
थ्यां च पुल्लिंगो घटकारके॥ कृष्णसारा शिंशपायां पुंसि स्तुत्यां मृगांत
रे॥६०॥ गिरिसारः पुमाँल्लोहे रंगे मलयपर्वते॥ घनसारस्तु कर्पूरे द
क्षिणावर्तपारदे॥६१॥ चराचरं वाच्यलिंगमिंगे जगति नटयोः॥ च
र्मकारः पादुकृत्स्त्रियां चर्मकषौषधौ॥६२॥ अथ चक्रधरो ऽजे ऽह्नो
नात्रिषु ग्रामजालिनि॥ चित्राटीरो विधौ भालमंकिते येन तत्र च॥६३
घंटाकर्णोपहारायहतच्छागास्त्रविंदुषु॥ तालपत्रं तु ताटंके रंडायां ताल
पत्र्यपि॥६४॥ तुंगभद्रा नदीभेदे स्त्रियां पुंसि नदोत्कटे॥ तुंडिकेरी
तु कार्पास्यां विंबिकायामपि स्त्रियां॥६५॥ तुलाधरस्तु लाराशौ पुं
सि वाणिजके त्रिषु॥ अथ तोयधरो मुस्ताकृमिषण्णौषधौ घने॥६६॥
दंडयात्रा दिग्विजये संपानवरयात्रयोः॥ अथो देवपुरं देशे पूरेपि
स्यान्नपुंसकम्॥६७॥ दंडधारः पुमान्पृथ्वीनाथे प्रेताधिपेपि च॥ दि
गंबरः स्यात्क्षपणे नग्ने तमसि शंकरे॥६८॥ दुरोदरं द्यूतभेदे द्यूतकृत्स

णयोःपुमान्॥ देहयात्रायमपुरीगमनेभोजनेपिच॥६९॥ द्वैमातुरो
जरासंधवारणाननयोःपुमान्॥ धराधरोहरौशैलेधाराधरोसि
मेघयोः॥७०॥ धारांकुरस्तुनाशीरेशीकरेपिघनोपले॥ धार्तराष्ट्रो
ऽसितास्यांघ्रिहंसेकौरवसर्पयोः॥७१॥ धुंधुमारःशक्रगोपेगृहधूमे
पदालिके॥ धुरंधरोधवद्रौनावाच्यलिंगस्तुधूर्वहे॥७२॥ धृतराष्ट्रः
सराज्ञिस्यान्नागक्षत्रियभेदयोः॥ धृतराष्ट्रीहंसपत्न्यांनभश्चरोवि
हंगमे॥७३॥ विद्याधरेघनेवातेनिशाचरस्तुरक्षसि॥ फेरुपेचकस
र्पेषुपांशुलायांनिशाचरी॥७४॥ निषद्वरस्तुजंबालेनिशायांतु
निषद्वरा॥ नीलांबरःप्रलंबघ्नेकोणपेचशनैश्चरे॥७५॥ भवेत्परि
करःसंघेपर्यंकपरिवारयोः॥ प्रगाढगात्रिकाबंधेसमाचारविवेकयोः
॥७६॥ अथपक्षचरश्चंद्रेपृथक्वारिगजेपिच॥ भवेत्प्रतिसरोमं
त्रभेदेमाल्येचकंकणे॥ व्रणशुद्धौचमूपृष्ठेपुंसिनस्त्रीतुमंडने॥ आरक्षे-
करसूत्रेचनियोज्येत्वन्यलिंगकः॥७७॥ भवेत्परिसरोमृत्यौविधाव
पिचपुंस्ययम्॥ परंपरोमृगभेदेप्रपौत्रेतनयस्यच॥७९॥ परंपरा
परिपाट्यांहिंसासंतानयोरपि॥ पयोधरःकोषकारेनालिकेरेस्त
नेपिच॥८०॥ कशेरुमेघयोःपुंसिप्रभाकरोऽग्निसूर्ययोः॥ प्रतीहा
रोद्वारिद्वास्थेद्वाःस्थितायांतुयोषिति॥८१॥ परिवारःपरिजनेख
ड्गकोषेपरिच्छदे॥ पारावारःसमुद्रेनातटद्वयेनपुंसकं॥८२॥ पात्रटी
रस्तुपुल्लिंगोमुख्यव्यापारमंत्रिणि॥ लोहकांस्यरजःपात्रेसिंघाणेपाव
केपिच॥८३॥ पारिभद्रस्तुमंदारेनिंबद्रौदेवदारुणि॥ पीतांबरस्तु
शैलूषेपुंसिकैटभसूदने॥८४॥ पीतसारोमलयजेगोमेदकमणाव
पि॥ पूर्णपात्रंवस्तुपूर्णपात्रेवर्धापकेपिच॥८५॥ बलभद्रात्रायमा
णाकुमार्योःपुंसिसीरिणि॥ ब्रह्मपुत्रःक्षेत्रभेदेनदभेदेचपुंस्ययम्॥
८६॥ वक्रनक्रस्तुपिशुनेतथैवशुकपक्षिणि॥ वार्वटीरोरंगअ
भ्रास्यकुरंगणिकासृते॥८७॥ वारकीरस्तुपुंसिस्याद्वारग्राहि-

णिवाडवे॥यूकायांरोल्लरोधिन्यांनीराजितहयेपिच॥८८॥बिंदुतंत्रः
पुमान्शारिफलकंचतुरंगके॥वीरभद्रोऽश्वमेधाश्वेवीरश्रेष्ठेचवीरणे
॥८९॥स्याद्वीरतरंवीरणेवीरश्रेष्ठेत्रवेचना॥महावीरस्तुगरुडेशू
रेसिंहेमखानले॥९०॥वज्रेश्वेततुरंगेचसंचानविहगेपिच॥महामा
त्रःसमृद्धेचामात्येहस्तिपकाधिपे॥९१॥मणिच्छिद्रातुमेदायामृष
भाख्यौषधेपिच॥महेश्वरोमहादेवेकथितोधीश्वरेपिच॥९२॥
मृगनेत्रा रात्रिभेदेविशेषेयोषितस्तथा॥रथकारस्तुमाहिष्यात्का
रणीजेचतक्षणि॥९३॥रागसूत्रंतुलासूत्रेपट्टसूत्रेनपुंसकं॥लंबोद
रस्स्याद्गुडानेगणानामधिपेपिहि॥९४॥लक्ष्मीपुत्रस्तुपुल्लिंगःका
मदेवेतुरंगमे॥व्यवहारोद्रुभेदेस्यान्यासेपिचगणास्थितौ॥९५॥अ
थव्यतिकरःपुंसिव्यसनव्यतिषंगयोः॥वातपुत्रोमहाधूर्तेभीमसेने
हनूमति॥९६॥विश्वंभरोच्युतेशक्रेपुंसिविश्वंभराभुवि॥विश्व
कद्रुस्त्रिषुखलेध्वानारवेटशुनोःपुमान्॥९७॥विभावरीनिशारा
त्र्योःकुट्टन्यांचक्रयोषिति॥विवादवल्गुत्यांचविभाकरोग्निसूर्य-
योः॥९८॥वीतिहोत्रोऽनलेऽर्केचशतपत्रःशिखंडिनि॥दार्वाघाटे
सारसेचकमलेतुनपुंसकम्॥९९॥शातावरीतुशट्यांस्यादिंदीवर्यो
मपिस्त्रियां॥शिशुमारोबुसंभूतजंतौतारात्मकाच्युते॥३००॥भवे
त्सहचरोझिंट्यांद्वयोरनुचरेत्रिषु॥समुद्रारुःपुमान्ग्राहेसेतुबद्धेति-
मिंगिले॥१॥संप्रहारोगतौयुद्धेस्थिरदंष्ट्रोभुजंगमे॥विराडाकृति
विष्णौचसुकुमारोमृदौत्रिषु॥२॥पुंसिपुंड्राभिधानेक्षौसूत्रधारः
शचीपतौ॥नानाद्यंतरसंचारिपारिपात्रभेदयोः॥३॥ ॥रपंच
तमालपत्रंतापिच्छेतिलकेपत्रकेपिच॥तालीशपत्रंभूम्यामलकी-
तालीशयोःस्मृतम्॥स्यात्पांशुचामरःपुंसिदूर्वाचिततटेभुवि॥च
द्वीपकेप्रशंसायांपुरोटोधूलिगुच्छके॥४॥स्यात्पादचतुरश्छागेसै
कतेपिप्पलेपिच॥करकेपरदोषैकप्रवक्तृपुरुषेपिच॥६॥पीतकावेर

मित्येतत्कुंकुमेपित्तलेपिच ॥ स्याद्राजबदरंरक्तमेलकेलवणेपिच
७॥ वस्वोकसारेंद्रपुरेकुबेरनलिनीपुरोः॥ विप्रतीसार उद्दिष्टः
कौकृत्येऽनुशयेरुषि॥८॥ भवेत्समभिहारस्तुपौनःपुन्यभृशार्थयोः॥
सर्वतोभद्रइत्युक्तःकाव्यचित्रेगृहांतरे॥९॥ निंबेनासर्वतोभद्रागं
भारीनटयोषितोः॥ ॥ इतिरांतवर्गः॥ ॥१८५३॥

लैकं॥ ॥ लःशक्रेलातुदानेस्याद्ग्रहणेपिनिगद्यते॥ लीश्ले
षणेचचपलेस्त्रीधरण्यांनिशापतौ॥१॥ ॥ लद्विः॥ ॥
अम्लोरसस्यभेदेस्यादम्लीचांगेरिकौषधौ॥ अलिःसुरापुष्पलिहोः
पुंस्यालिर्विशदाशये॥२॥ विष्णुस्त्रियांवयस्यायांसेतौपंक्तौचकीर्तिता
॥ आलुर्गलंतिकायांस्त्रीक्लीबंमूलेचभेलके॥३॥ इलाकलत्रेसोमस्य
धरित्र्यांगविवाचिच॥ ओलुस्तुशूरणेपुंसिस्यादार्द्रेवाच्यलिंगकः॥
४॥ कलास्यान्मूलरैवृद्धौशिल्पादावंशमात्रके॥ षोडशांशेचचंद्रस्यक
लनाकालमानयोः॥५॥ कलंशक्रेत्रिषुजीर्णेनाट्योक्तमधुरध्वनौ॥ क
लिःस्त्रीकलिकायांनाशूराजिकलहेयुगे॥६॥ कालोमृत्यौमहाका
लेसमयेयमकृष्णयोः॥ कालातुकृष्णात्रिवृतामंजिष्ठानीलिकासुच
॥७॥ कालीगौर्यांक्षारकीटेकालिकामातृभेदयोः॥ कीलोलेशेद्वयोः
शस्त्रज्वालाकफोणिशंकुषु॥८॥ कुलंजनपदेगोत्रेसजातीयगणेष
पि॥ भवनेचतनौक्लीबंकंटकार्यौषधौकुली॥९॥ अथकूलंतटेस्तू
पेसैन्यपृष्ठतडागयोः॥ कोलंकोलिफलेक्लीबेपिप्पलीचव्ययोःस्त्रियां
॥१०॥ नांकपाले शनौचित्रवराहोत्संगभेलके॥ खलंस्थानकल्के
भुवीचक्रूराधमेत्रिषु॥११॥ खलीवस्त्रप्रभेदेस्याद्धर्मचर्मणिचान्तके
खल्लीतुहस्तपादावमर्दनाख्यरुजिस्त्रियाम्॥१२॥ खिलमप्रह
तेक्लीबंसारसंक्षिप्तवेधसोः॥ गलःसर्जरसेकंठेगुलःस्यादिक्षवेपुमा
न्॥१३॥ गुलीतुगुटिकारोगभिदोःसुस्यांगुलास्मृता॥ गोलागो-
दावरीसख्योःकुनटीदुर्गयोःस्त्रियां॥१४॥ पञ्जाजनेमंडलेचालिं-

जरेबालखेलने॥ चलालक्ष्म्यांपुमान्कंपेपंकेनेत्वभिधेयवत्॥१५॥चि
ल्लः पुमान्क्लिन्ननेत्रेक्लिन्नाक्षेप्यभिधेयवत्॥आततायिनितत्प्रोक्तश्चि
ल्लीस्यात्क्षुद्रवास्तुके॥१६॥चुल्लीचितायामुद्धानेचोलः कूर्पासकेपुमा
न्॥नपुंसकंतुवसनेछलंस्खलितशाठ्ययोः॥१७॥छल्लीवीरुधसंता
नेवल्कलेकुसुमांतरे॥जलंगोकलनेनीरेक्लीबेरेप्यन्यवज्जडे॥१८॥
जालंगवाक्षआनायेक्षारकेदंभवृंदयोः॥जालोनीपद्रुमेजालीपटो-
लिकौषधौस्त्रियाम्॥१९॥झल्लास्यादातपस्तोमेदुहितर्यपिचस्त्रियां
झिल्लीचीर्यातपरुचोर्वर्त्यामुद्वर्तननांशुके॥२०॥तलंस्वरूपेनूधौस्त्रीक्ली
बंज्याघातवारणे॥काननेकार्यबीजेचपुंसितालमहीरुहे॥२१॥चपेटे-
चत्सरौतंत्रीघातेसव्येनपाणिना॥तल्लीतरुण्यांतल्लस्तुजलाधारांतरे
पुमान्॥२२॥तालः करतलेंगुष्ठमध्यमाभ्यांचसंमिते॥गीतकालक्रिया
मानेकरास्फालेद्रुमांतरे॥२३॥वाद्यभांडेचकांस्यस्यत्सरौतालीजटो
षधौ॥क्लीबंतुहरितालेस्यात्तुलासादृश्यमानयोः॥२४॥गृहाणांदारु
बंधायपीठिकायामपीष्यते॥राशौपलशतेभांडेतुलंस्याद्ब्रह्मदारुणि
॥२५॥आकाशेथपित्तौनस्त्रीदलमुत्सेधखंडयोः॥शस्त्रीछदेप्यवद्द
ग्धपत्रेप्यथदुलिः स्त्रियाम्॥२६॥कमठ्यांनापुंसिदोलानील्यांयाना-
तरेपिच॥नलः पोटगलेपद्मिपितृदेवेकपीश्वरे॥२७॥कमलेपिकुनल्यां
चक्रमेणक्लीबयोषितोः॥नालानलापद्मदंडेनालीशाककडंबके॥
२८॥नीलंतुनीलीरक्तेनानिध्याद्वानरांतरे॥नीलीरुग्भेदनीलिन्योः
पलंपुन्मानमांसयोः॥२९॥पल्लीस्याद्ग्रामकुट्योः पल्लुः स्थूलकुसूलके
॥पालिः कर्णलताग्रेऽश्रौपंक्तावंकप्रभेदयोः॥३०॥छाद्यादिदेपेस्त्री-
पालीयूकासश्मश्रुयोषितोः॥पिल्लुः पुमान्क्लिन्ननेत्रेक्लिन्नाक्षेप्यन्यव
त्॥३१॥पीलुः पुमान्प्रसूनेस्यात्परमाणौमतंगजे॥अस्थिखंडेचताल
स्यकांडपादपभेदयोः॥३२॥पुलः स्यात्पुलकेपुंसिविपुलेप्यन्यलिंगकः॥
फलंजातीफलेसस्येहेतूत्थेस्युष्फिलाभयोः॥३३॥त्रिफलायांचकक्कोलेपि

यंगोतुफल्लीस्मृता॥ फालःपुंसिमहादेवेकालिंदीभेदनेपिच॥३४॥बली
वंसीरोपकरणेत्रिषुकार्पासवाससि॥ बलिर्दैत्यप्रभेदेचकरचामरदंड
योः॥३५॥उपहारेपुमान्स्त्रीतुजरयाश्लथचर्मणि॥गृहदारुप्रभेदेच
जठरावयवेपिच॥३६॥बलंगंधरसेरूपेस्थामनिस्थौल्यसैन्ययोः॥
पुमान्हलायुधेदैत्यप्रभेदेवायसेपिच॥३७॥बलयुक्तेऽन्यलिंगःस्या
द्वाल्यालकेतुयोषिति॥ बह्लीस्यादजमोदायांचतस्यामपियोषिति॥
३८॥बालोनाकुंतलेश्वस्यकरिणश्चापिवालधौ॥ नालिकेरेहरिद्रायां
मल्लिकाभिधापिस्त्रियां॥३९॥वाच्यलिंगोऽर्भकेमूर्खेह्रीबेरंपुन्नपुंसकं
॥अलंकारांतरेमध्येबाली बालात्रुटिस्त्रियोः॥४०॥वेलाकालेच-
सीमायामब्धेःकूलविकारयोः॥अक्लिष्टमरणेरागेईश्वरस्यचभोजने
॥४१॥भल्लुःस्यात्पुंसिभल्लूकेशास्त्रभेदेतुनद्वयोः॥भल्लातक्यांस्त्रियां
भल्ली भालंतेजोललाटयोः॥४२॥ भेलःप्लवेमुनौपुंसिभीरावज्ञेचवा
च्यवत्॥ मलोऽस्त्रीपापविट्किट्टे कृपणेत्वभिधेयवत्॥४३॥ मल्लुः
पात्रेकपोलेचमत्स्यभेदेबलीयसि॥ मालःक्षेत्रेस्त्रियांपङ्क्तौस्रजो-
र्जात्यंतरेपुमान्॥४४॥मालुःपत्रलतानार्योःस्त्रियांमूलंशिफाद्ययोः
॥मूलविर्त्तेतिकेवानामेलास्यान्मेलकेमसौ॥४५॥मौलिःकिरीटेध
म्मिल्लेचूडायामनपुंसकम्॥नाशोकद्रोस्त्रियांभूम्नौ लीलाकेलि-
विलासयोः॥४६॥ शृंगारभावचेष्टायांलोलःस्याद्वाच्यलिंगकः॥स-
तृष्णेचंचलेलोलाजिह्वाकमलयोस्त्रियां॥४७॥ व्यालीदुष्टगजेस
र्पेश्वापदेनाऽन्यवत्खले॥ विलंछिद्रेगुहायांचपुमांस्तुच्चैःश्रवोहये॥
॥४८॥शालस्तुशाललेपुंसिभृंगिसेनाभिदोर्विधौ॥शालुःकषायद्र-
व्येस्याच्चौरकाख्यौषधौपुमान्॥४९॥शालिस्तुकलमाद्येचगंधमा
र्जारकेपुमान्॥शालाद्रुस्कंधशाखायांगृहगेहैकदेशयोः॥५०॥ना
र्यषेशिलमुंछेस्याद्द्वंद्वपर्यांशिली मता॥स्तंभशीर्षेशिलाशिल्यो
शिलातुप्रस्तरेमता॥५१॥तथामनःशिलायांचद्वाराधस्थितदा

रुणि ॥ शीलं स्वभावे सद्वृत्ते शुक्लो योगांतरे सिते ॥५२॥ नपुंसकं तु रजते शूलोऽस्त्री रोग आयुधे ॥ मृत्यकेतनयोगेषु शूला स्यात्पण्ययोषिति ॥५३॥ शूलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके ॥ सालः पादपमात्रे स्यात्प्राकारे सर्जपादपे ॥५४॥ स्थालं भाजनभेदेऽपि स्थाली स्यात्पाटले रवयोः ॥५५॥ स्थूलं कूटेऽथ निष्प्रज्ञे पीवरेऽप्यन्यलिंगकः ॥५५॥ हालो हले पुमान्हाला मदिरायां च योषिति ॥ हेला स्त्रियामवज्ञायां विलासे वरयोषितां ॥५६॥ ॥ लत्रिः ॥ ॥
अनलो वसुभेदेऽग्नौ वनिलो वसुवातयोः ॥ अर्गला त्रिषु कल्लोले दंडेऽनरकपाटयोः ॥५७॥ अरालः कुटिले सर्जरसे समददंतिनि ॥ अंगुली करशाखायां कर्णिकायां गजस्य च ॥५८॥ अन्चला वसुधायां स्यादचलः शैलकीलयोः ॥ अमलं त्वभ्रके क्लीबं लक्ष्म्यां स्त्री निर्मले त्रिषु ॥५९॥ अंजलिस्तु पुमान्हस्तसंपुटे कुडवेऽपि च ॥ अवेलस्त्वपलापे स्यादवेला पूगचर्विते ॥६०॥ आपीलं न द्वयोः कुक्षेवाच्यलिंगं भयानके ॥ इल्वला तारकाभेदे नाभेदे दैत्यमत्स्ययोः ॥६१॥ उत्पली तुषचर्प स्यात्क्लीबं कुष्ठप्रसूनयोः ॥ उपलः प्रस्तरे रत्ने शर्करायां तु योषिति ॥६२॥ उज्वलो दीप्तशृंगारविशदेषु विकाशिनि ॥ उत्फुल्लं करणे स्त्रीणां मुत्तालेऽपि विकस्वरे ॥६३॥ उत्तालउत्कटे श्रेष्ठे विकरालेप्लवंगमे ॥ कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे ॥६४॥ मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः ॥ कपिला रेणुकायां च शिंशपागोविशेषयोः ॥६५॥ पुंडरीककरिण्यां स्त्री वर्णभेदे त्रिलिंगकं ॥ नानलो वासुदेवे च मुनिभेदे च कुक्कुरे ॥६६॥ कंबलो नागराजे स्यात्सास्नाप्रावारयोरपि ॥ कृमावप्युत्तरासंगे सलिले तु नपुंसकम् ॥६७॥ करालो दंतुरे तुंगे भीषणे चाभिधेयवत् ॥ ससर्जरसतैले ना क्लीबं कृष्णाकुतेरके ॥६८॥ कदलं त्रिषु कपाले प्युपरागे नवांकुरे ॥ कलध्वनौ कंदली तु मृगगुल्मप्रभेदयोः ॥६९॥ कदला कदलीपृश्न्यां कदली कदलोपुनः ॥ रंभा

वृक्षेऽथकदली पताकामृगभेदयोः ॥७०॥ कदलाडिंबिकायांचशाल्
मली भूरुहेपिच ॥ कपालोऽस्त्री शिरोस्थ्नि स्याद्घटादेः शकलेव्रजे
॥७१॥ कंबीलातुद्वयोर्द्रोणीप्रभेदेनाक्रमेलके ॥ कल्लोलः पुंसिहर्षे
स्यादुल्लोलवैरिणोरपि ॥७२॥ कामलारोगभेदेवानानामरुवसंतयोः
॥ कामुकेवाच्यलिंगोथकालोलंनरकांतरे ॥७३॥ नाकुलाले द्रोणका
केविषभेदेतुनस्त्रियाम् ॥ काहलावाद्यभांडस्यभेदेचाप्सरसांभिदि
॥७४॥ काहलीतुतरुण्यांस्यात्काहलश्चरणायुधे ॥ शब्दमात्रेपिपु
ल्लिंगस्त्रिषुशुष्केभृशेखले ॥७५॥ किट्टालःपुंसिताम्रस्यकलशेलो
हगूथके ॥ कीलालंरुधिरेतोयेकुशलःशिक्षितेत्रिषु ॥७६॥ क्षेमेच
सुकृतेचापिपर्याप्तेचनपुंसकम् ॥ कुवलंचोत्पलेमुक्ताफलेपिबद
रीफले ॥७७॥ कुड्मलोमुकुलेपुंसिनद्वयोनरकांतरे ॥ कुटिलात
गरपाद्यांस्त्रीभुग्नेवाच्यलिंगकः ॥७८॥ कुंतलश्चषकेबालेजवेपुंभू
म्निनीवृति ॥ कुलालःकुक्कुभेकुंभकारेस्त्रीत्वंजनांतरे ॥७९॥ कुं-
भिलःशालमीनेचचोरेश्लोकार्थचोरयोः ॥ कुद्दालःस्यात्पुमान्भू-
मिदारणेयुगपत्रके ॥८०॥ कुचेलाविद्धपर्ण्यांस्त्रीवाच्यवत्तुकुवास-
सि ॥ कुलूलंशंकुसंकीर्णश्वभ्रेनातुतुषानले ॥८१॥ कुंडलंकर्णभूषा
यांपाशेपिवलयेपिच ॥ कांचनद्रुगुडूच्योःस्त्रीकेवलःकुहनेपुमान् ॥
८२॥ नपुंसकंतुनिर्णीतेवाच्यवच्चैककृत्स्नयोः ॥ केवलोज्ञानभेदेथ
कोमलंमृदुलेजले ॥८३॥ कोहलोवाद्यभेदेस्यान्नाट्यशास्त्रप्रव
क्तरि ॥ ग्रंथिलस्तुकरीरद्रौविकंकततरौपुमान् ॥८४॥ सग्रंथौत्रिषु
गंधोलीभद्रशाल्योश्चयोषिति ॥ गरलंतृणपूलेचविषेमानेनपुं-
सकं ॥८५॥ गोपालोनृपगोपेशौगोकुलेमुसलेहले ॥ गोरिल
स्तुपुमान्लोहचूर्णेस्याद्गौरसर्षपे ॥ चपलःपारदेमीनेचोरकेप्रस्त
रांतरे ॥ चपलाकमलाविद्युत्पुंश्चलीपिप्पलीषुच ॥८७॥ नपुंसकंतु-
शीघ्रेस्याद्वाच्यवत्तरलेचले ॥ चत्वालोहोमकुंडेस्यात्पुंसिदर्भेपिदृश्यते ॥

॥८८॥ चंद्रिलः पुंसि वास्तूकशाके भर्गे च नापिते॥ चंचला तु तडिल्लक्ष्म्यो
श्चंचलः कामुकेनिले॥८९॥ चूडाला तूच्चटायां स्त्री चूडावति च वाच्य
वत्॥ छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके॥९०॥ जंबालः शैवले पं
के जगलो मदनद्रुमे॥ भेदके पिष्टमद्ये च पुंसि धूर्तेऽभिधेयवत्॥९१॥ ज
टिला पिप्पलीमांस्योर्जटायुक्ते तु वाच्यवत्॥ जंगलं निर्जनस्थाने त्रिलिं
ग्यां पिशिते स्त्रियां॥९२॥ जंभलः पुंसि जंबीरे बुद्धदेवांतरेपि च॥ जंबूल
स्तु पुमाञ्जंबूविटपे क्रकचच्छदे॥९३॥ जांगली विषविद्यायां जांगल
जालिनी फले॥ जांगली शूकशिंब्यां स्त्री जांगलो ना कपिंजले॥९४॥
तरलं चंचले षिड्गे भास्वरेपि त्रिलिंगकम्॥ हारमध्यमणौ पुंसि यवागू
स्तरयोः स्त्रियाम्॥९५॥ तंडुलः स्याद्विडंगे च धान्यादिनिकरे पुमान्॥
तमालस्तिलके खड्गे तापिंछे वरुणद्रुमे॥९६॥ तांबूली नागवल्ल्यां स्त्री
क्रमुके तु नपुंसकं॥ तात्तलो रुजि पाके च लोहकूटे मनोजवे॥९७॥ तुमु
लः कलिवृक्षे ना क्लीबं तु रणसंकुले॥ तैतिलो गंडके पुंसि क्लीबं तु करणां
तरे॥९८॥ दुकूलं श्लक्ष्णवस्त्रे स्यात्क्षौमे च धवला गवि॥ वृषश्रेष्ठे पुमा
न्वाच्यलिंगः शुक्ले च सुंदरे॥९९॥ नकुली कुक्कुटीमांस्योः पशौ पांडवयोः
पुमान्॥ नाकुली कुक्कुटाकंदे रास्नायां चविके स्त्रियां॥१००॥ नाभीलं
वंक्षणे नार्याः कृच्छ्रगर्भांडयोरपि॥ निचुलस्तु निचोले स्यादिज्जलाख्य
महीरुहे॥१०१॥ निर्मलं स्यात्तु निर्माल्ये चाभ्रके च नपुंसकं॥ मलहीने
ऽन्यलिंगं च निस्तलं वर्तुले चले॥१०२॥ निष्कलं तु कलाशून्ये नष्ट
वीर्ये च वाच्यवत्॥ नैपाली तु नवमाली कुनटी स्नुवहासु च॥३॥ पल
लं तिलचूर्णे च पंके मांसे नपुंसकं॥ ना राक्षसेऽथ पटलं पिटके च परिच्छ
दे॥४॥ छदिर्दृग्रोगभित्तिलके क्लीबं व्रजे पुनर्नवा॥ प्रतलं पातालभेदे तता
गुलिकरे पुमान्॥५॥ पटोलं वस्त्रभेदे नौषधौ ज्योत्स्न्यां तु योषिति॥ प्र
वालः स्त्री किसलये वीणादंडे च विद्रुमे॥६॥ पंचाली पुत्रिकागी-
त्योः स्त्रियां पुंभूम्नि नीवृति॥ पांसुलः पुंश्चले शंभोः खट्वांगे स्त्र्यसती

भुवोः॥७॥ पाकलं कुष्ठभैषज्ये पुंसि स्यात्कुंजरज्वरे॥ पाञ्चालं पाञ्चनेना
ऽग्नौ वाधनद्रव्यवालयोः॥ ८॥ पाटला पाटलौ स्त्रीस्यादस्य पुष्पे पुनर्नना
॥ आशुधान्ये पुमान्श्वेतरक्तवर्णेपि वाच्यवत्॥ ९॥ पातालं नागलोके-
स्याद्विवरे वडवानले॥ पातिलीवागुरायांस्यान्नारीपात्रप्रभेदयोः॥ १०॥
पिप्पलं सलिले वस्त्रच्छेदभेदे च नातरौ॥ निरंशुके पक्षिभेदे कणायां पि
प्पली स्मृता॥ ११॥ पिचुलोऽम्बुके पि स्याद्विज्जले जलवायसे॥ पिंगलो
नागभिद्रुद्रचंडांशुपारिपार्श्विके॥ १२॥ निधिभेदे कपावग्नौ पुंसि स्यात्कपि
ले ऽन्यवत्॥ स्त्रियां वेश्याविशेषे च करिण्यां कुमुदस्य च॥ १३॥ पित्तला
तोयपिप्पल्यां स्त्र्यन्यवत्पित्तसंयुते॥ क्लीबं तु तैजसद्रव्ये पिच्छलो वि-
ज्जिने ऽन्यवत्॥ १४॥ स्त्री पोतिकाशिंशपयोः शाल्मलीसिंधुभेदयोः॥ पु-
द्गलः संदराकारे त्रिषु पुंस्यात्मभेदयोः॥ १५॥ पेशलो रुचिरे दक्षे फेनि
लो ऽरिष्टपादपे॥ नासफेने त्रिषु क्लीबं कोलीमदनयोः फले॥ १६॥ बहुला
नीलिकायां स्याद्देलायां गवि योषिति॥ कृत्तिकासु स्त्रियां भूम्नि विहाय
सि नपुंसकं॥ १७॥ पुंस्यग्नौ कृष्णपक्षे च वाच्यवत्प्राज्यकृष्णयोः॥ बर
ला बारला चापि गंधोली हंसकांतयोः॥ १८॥ बार्दलं दुर्दिने मेलानं
दायां बार्दलः स्मृतः॥ मंगला सितदूर्वायामुमायां पुंसि भूमिजे॥ १९॥ न
पुंसकं तु कल्याणे सर्वार्थरक्षणेपि च॥ मंडलं परिधौ कोवे देशे द्वादशरा
जके॥ २०॥ क्लीबेऽथ निवहे बिंबे त्रिषु पुंसि तु कुक्कुरे॥ मंजुलं त्रिषु मंजौ
ना जलरंकौ नपुंसकं॥ २१॥ जलांचले निकुंजे च महिला फलिनी स्त्रि
योः॥ मातुलो ब्रीहिभिन्मातृभ्रातोश्च मदनद्रुमे॥ २२॥ धुस्तूरे मात्व-
लो वंदिचौरे च ग्राहरोगयोः॥ मुसलं स्याद्दयोग्रे तु पुन्नपुंसकयोः स्त्रि
याम्॥ २३॥ तालमूल्यामाखुपर्णी गृहगोधिकयोरपि॥ मृणालं नलदे-
क्लीबं स्त्रीनपुंसकयोर्बिसे॥ २४॥ मेखला खड्गबंधे स्यात्कांचीशैलनि
तंबयोः॥ यमलं युगले क्लीबे यमली चोटिकाद्वये॥ २५॥ रसाला
रसना दूर्वा विदारी मार्जिता सु च॥ रसालं सिल्हके बोले रसालश्चेक्षु

नूतयोः॥२६॥ रामिल्लोरमणेकामेलांगुलंपुच्छशेफसोः॥ लांगली तो
यपिप्पल्यां क्लीबंतुकुसुमांतरे॥२७॥ गोदारणे तृणराजगृहदारुविशेषयोः
॥ लोहलः शृंखलाचार्ये ऽव्यक्तवाजिनित्रिषु॥२८॥ वंजुलः पुंसितिनि
शेवेतसाशोकयोरपि॥ वंठालो युद्धभेदेस्त्रीनौकायांचखनित्रके॥
२९॥ वालूलः पुंसिवात्यायांवाच्यवन्मारुतासहे॥ वामिलो दांभिकेवा
मेत्रिषुस्या द्विमला स्त्रियां॥३०॥ शातलायांभुवोभेदे निर्मलेत्वभि-
धेयवत्॥ विपुलः पृथुलेगाधेमेरुपश्चिमभूधरे॥३१॥ विदुलस्तुमु
मानंबुवेतसेवेतसेपिच॥ विडालोनेत्रपिंडेस्याद्वृषदंशकके पुमान्
॥३२॥ विशाला लिंद्रवारुण्यामुज्जयिन्यांतुयोषिति॥ मृगपक्षिभि-
दोः पुंसि पृथुलेत्वभिधेयवत्॥३३॥ वृषलो गृंजनेशूद्रेचंद्रगुप्तेचरा
जनि॥ शाकलंत्वचिखंडेस्याद्रागवस्तुनिवल्कले॥३४॥ शंबलो स्त्री
संबलवत्कूलपाथेयमत्सरे॥ शयालुः स्यादजगरेनिद्राशीलेचकुक्कुरे
॥३५॥ श्रद्धालुर्दोहदिन्यांस्त्रीश्रद्धायुक्तेतुवाच्यवत्॥ श्यामलः पि
प्पलेकृष्णेशार्दूलोराक्षसांतरे॥३६॥ व्याघ्रेचपशुभेदेचसत्तमेतू
त्तरस्थितः॥ शाल्मलिस्तरुभेदेस्याद्द्वीपभेदेपिचद्वयोः॥३७॥ श्रीफ
लः पुंसिमालूरेधात्रीनीलिकयोः स्त्रियाम्॥ शीवलंस्याच्चशेवालेशी
तेयेचनपुंसके॥३८॥ शीलनंपुष्पकाशीशेशैलजेमलयोद्भवे॥ पु-
मानसनपर्णास्याच्छिशिरेवाच्यलिंगकम्॥३९॥ शृगालोदैत्यभेदे
त्वभेदेनाडमरेस्त्रियाम्॥ शृंखलापुंस्कटीवस्त्रबंधेचनिगडेत्रिषु॥
४०॥ शेवलंपद्मकाष्ठेस्याच्छैवालेपिपुमानयं॥ शौष्कलः शुष्क
मांसस्यपणके पिशिताशिनि॥४१॥ षंडालीतैलमानेचसरसीका
मुकस्त्रियोः॥ सरलः पद्मकाष्ठेनाऽथोदारावक्रयोस्त्रिषु॥४२॥ सं
कुलंत्रिषुविस्पष्टवाचिव्याप्तेऽप्यसमन्ततः॥ नवमालीचर्मकषागुंजा
सुपाटलीस्त्रियां॥४३॥ संधिलातुसुरुंगायांनदीमंदिरयोः स्त्रियां
॥ सिध्मलामत्स्यविकृतौवाच्यवत्तुकिलासिनि॥४४॥ सुषेलः

प्रणतेशांतेत्रिषुनापर्वतांतरे॥ सुतलोट्टालिकाबंधनागलोकप्रभे-
दयोः॥ ४५॥ हिंगुलोवर्णकद्रव्येनाभंटाक्यांतुहिंगुली॥ हेमलः
स्वर्णकारेस्यात्कृकलासेशिलांतरे॥ ४६॥ ॥ लचतुः॥ ॥
अक्षमालाक्षसूत्रेस्यादरुंधत्यामपिस्त्रियाम्॥ अंकपालीपरी-
रंभेधात्रीवेदिकयोःस्त्रियां॥ ४७॥ अथातिबलःप्रबलेत्रिषुस्त्रीत्वौ-
षधीभिदि॥ उदूखलंगुग्गुलौस्यादुलूखलेपिनद्वयोः॥ ४८॥ ए-
काष्ठीलावनतिक्तिकौषधौपुंसिबकपुष्पे॥ कलकलउक्तःकोला-
हलेतथासर्जनिर्यासे॥ ४९॥ अथकर्मफलंकर्मरंगकर्मविपाकयोः
कंदरालःपुमान्गर्दभांडेप्लक्षतरावपि॥ कमंडलुःस्यात्करकेन-
स्त्रीनाप्लक्षपादपे॥ कुतूहलंकौतुकेस्यात्प्रशस्तेपिचदृश्यते॥ ५१॥
रक्तमालस्तुपुल्लिंगोधूमेपिचबलाहके॥ गंडशैलोललाटेस्याच्च्युत-
स्थूलोपलेगिरेः॥ ५२॥ गंधफल्यपिगुंद्रायांचंपकस्यचकोरके॥ चक्र-
वालोद्रिभेदेस्याच्चक्रवालंतुमंडले॥ ५३॥ जलांचलंस्रोतोवारि-
निर्गमेशैवलेपिच॥ दलामलंमरुवकेदमनेपिनपुंसकं॥ ५४॥ ध्व-
निनालातुवीणायांवेणुकाहलयोरपि॥ स्यात्परिमलोतिमर्दाति-
मनोहरगंधयोश्चापि॥ ५५॥ स्मरतोषमर्दविकसच्छरीररागादिसौर-
भेपुंसि॥ अथपोटगलःपुंसिनलेचकाशमत्स्ययोः॥ ५६॥ भवे-
द्बहुफलोनीपेनाभल्लक्यांतुयोषिति॥ भस्मतूलंग्रामकूटेपांसु-
वर्षेहिमेपिच॥ ५७॥ भद्रकालीतुगंधोल्यांकात्यायन्यामपिस्त्रियां
॥ महाकालोमहादेवेकिंपाकेप्रथमांतरे॥ ५८॥ भवेन्मदकलोम-
त्तेभेमदाव्यक्तवाचिनोः॥ महाबलंसीसकेतिबलायांस्त्रीबलोत्क-
टे॥ ५९॥ त्रिलिंगंमणिमालातुहारेदंतक्षतांतरे॥ महानीलोभृंग-
राजेमणिनागविशेषयोः॥ ६०॥ मुक्ताफलंतुकर्पूरेमौक्तिकेलवलीफ-
ले॥ स्यान्मृत्युफलाकदल्यांमहाकालफलेपुमान्॥ ६१॥ भवेद्यव-
फलोवेणौमांसीकुटजयोरपि॥ रजस्वलापुष्पवत्यांस्त्रियांस्यात्

सौरभेपुमान् ॥६२॥ वातकेलिः कलालापेषड्गदंतक्षतेपुमान् ॥ अथवायुफलंशक्रकार्मुकेकरकेपिच ॥६३॥ भवेद्दिचकिलो मल्लीप्रभेदेमदनेपुमान् ॥ बृहन्नलागुडाकेशेमहापोटगलेपुमान् ६४॥ सदाफलः स्कंधफलेनारिकेलेप्युदुंबरे ॥ सिनीवालीतुदृष्टेंदुकलामादुर्गयोःस्त्रियां ॥६५॥ अथसौवर्चलंसर्जक्षारेचलवणांतरे ॥ हस्तिमल्लोभ्रमातंगेशंखनागेविनायके ॥६६॥ हरितालंधातुभेदेस्त्रीदूर्वाकाशरेखयोः ॥ हलाहलोब्रह्मसर्पेअंजनायां विषेस्त्रियाम् ॥ ६७॥ ॥लपंच॥ ॥आस्कंदीचलआख्यातः कन्यापालकयज्वनोः ॥ उदंडपालः पुंसिस्यात्सर्वमत्स्यप्रभेदयोः ॥६८॥ एककुंडलआख्यातोबलभद्रेधनाधिपे ॥ कूपीटपालउद्दिष्टः केलितानसमुद्रयोः ॥६९॥ स्यात्सांडुकंबलःश्वेतप्रावारग्रावभेदयोः ॥ भवेत्करतालीतुद्रूतिकायांशिरःस्त्रजि ॥७०॥ ॥ ॥ ॥इतिलांतवर्गः॥ ॥२०२३॥ ॥वैकम्॥ ॥ वः सांत्वनेचवातेचवरुणेचनिगद्यते ॥ वंप्रचेतसिजानीयादिवार्थेच तदव्ययं ॥१॥ स्वः स्यात्पुंस्यात्मनिज्ञातोत्रिष्वात्मीयेधनेस्त्रियां ॥ ॥ ॥ ॥लद्विः॥ ॥अविर्नाथेरवौमेषेशैलेमूषिककंबले ॥२॥ अश्वः पुंजातिभेदेचतुरगेचपुमानयं ॥ ऊर्ध्वंस्यादुच्छ्रितेतुंगेचोपरिष्टादपिस्मृतं ॥३॥ क्ष्वेडःक्ष्वेतेराजिकायांकविर्वाल्मीकिशक्रयोः सूरौकाव्यकरेपुंसिखलीनेस्यात्तुयोषिति ॥४॥ कृण्वंपापेमुनौपुंसिकिण्वंबीजेचशीधुनः ॥ पापेक्लीबंनपुंसकेशंडेऽन्यवदविक्रमे ॥ ॥५॥ स्यात्तुग्रीवाकंधरायांतच्छिरायांचयोषिति ॥ चार्वीतुशोभनाबुध्योर्ज्योत्स्नाधनदभार्ययोः ॥६॥ छविःशोभारुचोर्यापिजुर्वोविप्रवतिविषु ॥ पुल्लिंगस्तु भवेद्देगेचोड्रुपुष्पेजवास्मृता ॥७॥ जीवःप्राणिनिवृत्तौचवृक्षभेदेबृहस्पतौ ॥ जीवाजीवंतिकामौर्वीवचाशिंजितभूमिषु ॥८॥ नरस्त्रीतुजीवितेतत्त्वंस्वरूपेपरमात्मनि ॥ स्यात्क्लीबं

वितनृत्येचद्रवःप्राद्रवनर्मणोः॥९॥रसेपिद्रवदावौतुवनवन्ह्योर्व
नेप्युभौ॥द्वंद्वंरहस्यकलहेतथामिथुनयुग्मयोः॥१०॥दार्वीदारु
हरिद्रायांतथागोजिह्विकौषधौ॥द्यौःस्त्रीस्वर्गेचगगनेदिवं
क्लीबंनयोःस्मृतं॥११॥देवोमेघेसुरेराज्ञिस्यान्नपुंसकमिंद्रिये॥दे
वीकृताभिषेकायांतेजनीस्पृक्कयोरपि॥१२॥धवःपुमान्धवेधूर्ते
पत्यौवृक्षांतरेपिच॥ध्रुवःशंकौहरेविष्णौवटेचौत्तानपादजे॥१३
वस्कयोगभिदोःपुंसिक्लीबंनिश्चिततर्कयोः॥स्त्रीमूर्वाद्योःशालप
र्ण्यांगीतिस्रुक्भेदयोस्त्रिषु॥१४॥संततेशाश्वतेचाथनवनव्ये
पुमान्स्तुतौ॥नीवीपरिपणेस्त्रीणांकटीवसनबंधने॥१५॥प
क्वंपरिणतेपिस्याद्विनाशाऽभिमुखेत्रिषु॥प्लवःस्यात्प्लवनेभेलेप्र
ऽवेश्वपचेपपौ॥१६॥जलकाकेचकुलकेप्लवणोपर्कटीद्रुमे॥कारं
डवाख्यविहगेशब्देप्रतिगतोपुमान्॥१७॥कैवर्तीमुस्तकेगंधतृणे
पिस्यान्नपुंसकम्॥पार्श्वंकक्षांतरेचक्रोपांतेपर्शुगणेपिच॥१८॥
प्राध्वंतुप्रणतेचातिदूरवर्त्मनिबंधने॥पृथ्वीभूमौमहत्यांचल
क्ष्म्यांकृष्णाजीरके॥१९॥भवःक्षेमेशसंसारेसत्तायांप्राप्तिजन्मनोः
भावःसत्तास्वभावाभिप्रायचेष्टात्मजन्मसु॥२०॥क्रियालीला-
पदार्थेषुविभूतिबुधजंतुषु॥रत्यादौचाथरेवास्यान्नील्यांरखां
नदीभिदि॥२१॥लवोलेशेविनाशेचछेदनेरामनंदने॥लट्वा
करंजभेदेस्यात्फलेवाद्येखगांतरे॥२२॥लघ्वीलाघवयुक्ता-
यांप्रभेदेस्यंदनस्यच॥विश्वात्वतिविषायांस्त्रीजगतिस्यान्न
पुंसकं॥२३॥ननाशकंठ्यांपुंसिदेवप्रभेदेषुखिलेत्रिषु॥बिल्वं
फलेश्रीफलेनाशवःस्यात्कुणपेपुमान्॥२४॥नपुंसकंतुपानी
येशिवभूर्जेनृपेपुमान्॥शिवोमोक्षेमहादेवेकीलकग्रहयोग
योः॥२५॥ वालुकेगुग्गुलौवेदेपुंडरीकद्रुमेपुमान्॥सुखक्षेम
जलेक्लीबंशिवाझाटामलौषधौ॥२६॥अभयामलकीगौरीफे

रुसकृत्फलासृच ॥ शिवस्तुभूर्जपत्रेस्यात्तथोदारमहीपतौ ॥ २७ ॥ शु
ल्वंताम्रेयज्ञकर्मण्याचारेजलसन्निधौ ॥ सत्वंगुणेपिशाचादौबलेद्र
व्यस्वभावयोः ॥ २८ ॥ आत्मत्वेव्यवसायासुवित्तेष्वस्त्रीतुजंतुषु ॥ स
वोयज्ञेन्चसंधानेसांत्वंदाक्षिण्यसामनोः ॥ २९ ॥ स्रुवाहुत्योर्होमपात्रे
शल्लकीमूर्वयोःस्त्रियाम् ॥ ह्वआज्ञाध्वराह्वाने ह्रस्वोन्यक्खर्वयो
स्त्रिषु ॥ ३० ॥ ॥ वत्रि ॥ अश्लीवंचशिरेशिग्रोनामतेपुनरन्य
वत् ॥ अभावोमरणेसत्वेआहवोयुद्धयज्ञयोः ॥ ३१ ॥ आर्तवंस्त्रीर
जेपुष्पेक्लीबंस्यादृतुजेत्रिषु ॥ आश्रवोंगीकृतौक्लेशेनान्यवद्वचनस्थिते
॥ ३२ ॥ उद्भवोयादवभिदिमहेन्चक्रतुपावके ॥ उत्सवोमहउत्सेकेइछा
प्रसवकोपयोः ॥ ३३ ॥ कारवीमधुरादीप्यत्वक्पत्रीकृष्णजीरके ॥ कित
वस्तुपुमान्मत्तेवंचकेकनकाह्वये ॥ ३४ ॥ केशवोऽजेचपुन्नागेपुंसिके
शवतित्रिषु ॥ कैतवंतुछलेद्यूतेकैरवःकितवेरिपौ ॥ ३५ ॥ नपुंसकंन्च
कुमुदेचंद्रिकायांतुकैरवी ॥ गांडीवोगांडिवश्चाऽस्त्रीकार्मुकेऽर्जु
नकार्मुके ॥ ३६ ॥ गालवस्तुमुनौलोध्रेतांडवोऽस्त्रीतृणांतरे ॥ नवे
द्धुद्धतनृत्येन्चत्रिदिवासरिदंतरे ॥ ३७ ॥ पुंसिस्वर्गेद्यौदिविर्नाधिषणे
ऽन्नेतदस्त्रियाम् ॥ निष्पावःशूर्पपवनेराजमाषेकडंगके ॥ ३८ ॥ पव
नेशिंबिकायांनानिर्विकल्पेऽन्यलिंगकः ॥ निन्हवःपुंसिनिकृता व
विश्वासापलापयोः ॥ ३९ ॥ पल्लवोऽस्त्रीकिसलयेविटपेविस्तरेवने ॥ शृं
गारेऽलक्तरागेस्त्री प्रभावःशांतितेजसोः ॥ ४० ॥ पंचत्वंपंचानांभावेप्रा
णानामत्ययेपिच ॥ प्रभवोजन्ममूलेस्याज्जन्महेतौपराक्रमे ॥ ४१ ॥ ज्ञा
नस्यचादिमस्थाने प्रसवोगर्भमोचने ॥ उत्पादेस्यादपत्येपिफलेच
कुसुमेपिच ॥ ४२ ॥ प्रसेवःपुंसिवीणांगेस्यूतेच पार्थिवोनृपे ॥ पार्थि
वीतुसीतायांस्त्रीपृथिव्याविकृतौत्रिषु ॥ ४३ ॥ पुंगवःस्याद्बलीवर्दे
ऋषभेद्व्योषधस्यच ॥ उत्तरस्थःपुनःश्रेष्ठेफेरवोजंबुकेन्नपे ॥ ४४ ॥
वल्लवःसूपकारेस्यात्भीमसेनेन्चगोदुहि ॥ बांधवोबंधुकृद्देभ्रा

र्वोगजधन्विनोः॥ ४५॥ शुक्रेपरशुरामेच भार्गवीपार्वतीश्रियोः॥ दू
र्वायांभैरवः पुंसिशंकरेभीषणेत्रिषु॥ ४६॥ माधवोऽजेमधौराधेया
दवेनास्त्रियांमिसी॥ मधुशर्करावासंतिकुट्टनीमदिरासुच॥ ४७॥ गोम
हिष्यादिसंपत्तौयादवः पुंसिकेशवे॥ राजीवंनलिनेनातुभेदेहरिण
मीनयोः॥ ४८॥ राघवोब्धेर्महामीनभेदेचरघुवंशजे॥ रौरवोनरके
घोरेवडवाद्विजयोषिति॥ ४९॥ अश्वायांकुंभदास्यांचनारीजात्यंतरे
पिच॥ वाडवंकरणेस्त्रीणांघोटकौघेनपुंसकं॥ ५०॥ पातालेनस्त्रियांपुं
सिब्राह्मणेवडवानले॥ विभवोवैभवेमोक्षेश्वर्येविद्रवोविद्रुतौधियि॥ ५१॥
विभावःस्यात्सखिचयेरसस्योद्दीपनादिषु॥ शात्रवंभावसंहत्योः शत्रू
णांशात्रवोद्विषि॥ ५२॥ षाडवोगानरसयोःसचिवोमंत्रिचेटयोः॥ स
हायेसंभवोहेतावुत्पत्तौमेलकेपिच॥ ५३॥ आधारानतिरिक्तत्वेप्याधे
यस्यनिगद्यते॥ हयग्रीवोवासुदेवस्यहयेशाखामृगेश्वरे॥ ५४॥ सुष
वीकारवेल्लेस्यात्कृष्णाजीरकजीरयोः॥ सैंधवोःस्त्रीमणिमंथेनाश्वे
सिंधुभवेत्रिषु॥ ५५॥ ॥ वचतुः॥ ॥ अनुभावःप्रभावेस्यान्नि
श्चयेभावबोधके॥ भवेदभिषवःस्नानेमद्यसंधानयज्ञयोः॥ ५६॥
अपन्हवस्तुपुल्लिंगःस्मृतःस्नेहापलापयोः॥ आदीनवःपुमान्दोषेपरि
क्लिष्टदुरंतयोः॥ ५७॥ उपप्लवःसैंहिकेयेविप्लवोत्पातयोरपि॥ कुशी
लवस्तुवाल्मीकौनटचारणकयोरपि॥ ५८॥ जलबिल्वःकर्कटेस्यात्सं
चांगेजलचत्वरे॥ जीवंजीवश्चकोरेस्यात्द्रुमभेदेपिपुंस्ययं॥ ५९॥ धा
मार्गवस्तुपुंसिस्यादपामार्गेचघोषके॥ पारिप्लवश्चाकुलेस्याच्चंचलेच
प्लवाम्भसः॥ ६०॥ तिरस्कारेविनाशेचपुंसिपारशवःपुमान्॥ परस्त्री
तनयेशस्त्रेद्विजाच्छूद्रासुतेपिच॥ ६१॥ पुटग्रीवस्तुपुल्लिंगोगर्गरीता
म्रकुंभयोः॥ बलदेवोबलेवातेत्रायमाणौषधौस्त्रियाम्॥ ६२॥ रैवतोदे
वकन्यापतेर्भेदेचगरुडध्वजे॥ रोहिताश्वश्चित्रभानौहरिश्चंद्रनृपात्म
जे॥ ६३॥ अथशीतशिवंक्लीवंशैलेयमणिमंथयोः॥ पुंसिसक्तुफलाद्रु

श्वेतयामधुरिकौषधौ ॥ ६४ ॥ सहदेवाबलादंडोत्पलयोः शारिवौषधौ ॥ सहदेवी तु सर्पाक्ष्यां पुंसि स्यात्पांडवे पुनः ॥ ६५ ॥ ॥ वपंच ॥ आशितंभव मन्नाद्ये तृप्ता वप्याशितंभवा ॥ ॥ इति वांतवर्गः ॥ ॥ शद्विः ॥ ॥ अंशुः प्रभाकिरणयोर्नाशांतृष्णादिशोस्त्रियाम् ॥ आशुर्धान्यांतरे शीघ्रे पीशालांगलदंडके ॥ १ ॥ ईशः प्रभौ महादेवे काशी वाराणसीपुरे ॥ नस्त्रियां तृणभेदे स्यात्कोशो दिगंबरे कपौ ॥ २ ॥ कुशी फाले कुशा रज्ज्वां त्रिषु पापिष्ठमत्तयोः ॥ योक्त्ररामसुतद्वीपेना दर्भः स्त्री कुशं जले ॥ ३ ॥ केशः स्यात्पुंसि वरुणे न्हीबेरे कुंतलेपि च ॥ क्लेशो दुःखेपि कोपेपि व्यवसायेपि दृश्यते ॥ ४ ॥ कोशोस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके ॥ जातिकोशेर्थसंघाते पेश्यां शब्दादिसंग्रहे ॥ ५ ॥ दर्शस्तु स्यादमावास्यायागभेदावलोकने ॥ दंशः कीटविशेषे च वर्मदंशनयोः पुमान् ॥ ६ ॥ दशावस्थादीपवर्त्योर्वस्त्रांते भूम्नि योषिति ॥ दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके ॥ ७ ॥ नाशः पलायनेपि स्यान्निधनानुपलंभयोः ॥ निशा दारुहरिद्रायां स्यात्त्रियामाहरिद्रयोः ॥ ८ ॥ पशुः मृगादिदेवाजेनाः व्ययं पश्युदर्शने ॥ पाशः केशादिपूर्वः स्यात्तत्संघे कर्णपूर्वकः ॥ ९ ॥ सुकर्णे च स्वसामर्थ्यान्मृगपक्ष्यादिबंधने ॥ पांशुर्धूलौ च सस्यार्थं चिरसंचितगोमये ॥ १० ॥ पेशी सुपक्वकलिके मांस्यां खड्गपिधानके ॥ मांसपिंड्यामंडभेदे राशिर्मेषादिपुंजयोः ॥ ११ ॥ पुंसि वंशः कुले वेणौ पृष्ठावयववर्गयोः ॥ वशा वंध्यासुतायोषास्त्रीगवीकरणीषु च ॥ १२ ॥ त्रिष्वायत्ते क्लीबमायत्तत्वे चेच्छाप्रभुत्वयोः ॥ विट्पुंसि मनुजे वैश्ये वेशो वेश्यागृहे गृहे ॥ १३ ॥ नेपथ्ये च शशो बोले लोध्रे नृपशुभेदयोः ॥ स्पशो रुजायां दाने च स्पर्शने स्पशकेपि च ॥ १४ ॥ स्पशः स्यात्संपराये च प्रणिधावपि पुंस्ययं ॥ ॥ शत्रिः ॥ ॥ आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि ॥ १५ ॥ उड्डीशो ग्रंथभेदे स्यात् दुड्डीशश्चं द्रिकापतौ ॥ उपांशुर्जपभेदे स्यादुपांशु विजनेऽव्ययं ॥ १६ ॥ कपिश

स्त्रिषुश्यावे स्त्रीमाधव्यां सिल्हके पुमान्॥ कर्कशः काशमर्दे स्यात्का-
पिल्येष्वथ सोपुमान्॥ १७॥ त्रिषु साहसिके क्रूरे दृढामसृणनिर्दये॥ की
नाशः कर्षकस्फ्रोपांशुघाति षु वाच्यवत्॥ १८॥ यमेनाकुलिशोन-
स्त्रीदंभोलौ नाश्मषांतरे॥ गिरीशो द्रिपतौ वाचस्पति शंकरयोः पुमान्॥
१९॥ तुंगीशस्तु पुमान्गौरीवल्लभे हिमदीधितौ॥ दुःस्पर्शो धन्वयासे
ना कंटकार्यां स्त्रियां त्रिषु॥ २०॥ खरस्पर्शेथ निस्त्रिंशः खड्गेना निर्दये
त्रिषु॥ निर्वेशस्तु पुमान्भोगे वेतने मूर्छनेपि च॥ २१॥ निवेशः पुंसि विन्या
से शिबिरोद्वाहयोरपि॥ निर्देशः शासनेपि स्यात्कथनोपांतयोरपि॥ २२॥
नीकाशो निश्चये तुल्ये पलाशं छदने मतं॥ शटी किंशुकरक्षःस्फ पुंसि
स्याद्धरिते त्रिषु॥ २३॥ प्रकाशस्तु स्फुटे ख्यातः प्रहासातपयोरपि॥ प्रदे
शो देशमाने स्यात्तर्जन्यंकुष्ठसम्मिते॥ २४॥ भित्तावपि च पिंगाशी नीलि
कायां नपुंसकं॥ जात्यस्वर्णे पुमान्पल्लीपतौ मत्स्यांतरेपि च॥ २५॥ बा
लिशश्च शिशौ मूर्खे मूकेशः शैवले वटे॥ मूकेशय वल्गुजेपि स्याल्लोम
शो मुनिमेषयोः॥ २६॥ लोमान्विते स्त्रियां काकजंघामांसीवचासु च॥ शू
कशिंबि महामेदा काशीशे शाकिनीभिदि॥ २७॥ विवशा स्त्रिष्ववश्या
त्मारिष्टदुष्टधियोरपि॥ विकाशः पुंसि विजने प्रकाशे सदृशं समे॥ २८
॥ उचितेवाथ संवेशः स्वापस्त्रीरतबंधयोः॥ स्फरवाशो वरुणे राजनि-
निशे सुखभोजने॥ २९॥ हताशो निर्दये चाशारहितेपि शुने पि च॥ ॥
शान्तः॥ ॥ अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि॥ ३०॥ अ
पभ्रंशस्तु पतने भाषाभेदापशब्दयोः॥ आश्रयाशः पुमान्वन्हौ त्रि-
षु चाश्रयनाशके॥ ३१॥ उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि॥ उ
पदंशो विदंशे च मेढ्रोगांतरेपि च॥ ३२॥ क्रूरदृक् पिशुने वाच्यलिंगः
पुंसि शनैश्चरे॥ खंडपर्शुः पर्शुरामे शंकरे चूर्णलेपिनि॥ ३३॥ खंडामल
कौषध्योः सिंहिकातनयेपि ना॥ जीवितेशो यमे पुंसि त्रिषु स्याज्जीविते
श्वरे॥ ३४॥ नागपाशः पुमान्स्त्रीणां करणे वरुणायुधे॥ पंचदशीं-

त्वमावास्यापौर्णमास्योश्चयोषिति॥ ३५॥ प्रतिष्कशः सहायेस्याद्वार्त्ता
हरपुरोगयोः॥ परिवेशोवेष्टनेस्यात्सरिधानेपिपुंस्ययं॥ ३६॥ पादपा
शीखडुकायांमृंखलायामपिस्त्रियां॥ पुरोडाशोहविर्भेदेचमस्यांपिष्ट
कस्यच॥ ३७॥ हुतशेषेचभूमिस्पृक्पुंसिमानववैश्ययोः॥ ॥
इतिशांतवर्गः॥ ॥षैकम्॥ ॥षः कचेपुंसिविज्ञेचश्रेष्ठेस्या
दभिधेयवत्॥ क्षः संवर्तेराक्षसेचनरसिंहेचविद्युति॥ १॥ क्षेत्रेना
शेक्षेत्रपालेक्षिर्निवासेगतौक्षये॥ ॥षद्विः॥ ॥अक्षो
ज्ञातार्थशकटव्यवहारेषुपाशके॥ २॥ रुद्राक्षेद्राक्षयोः सर्पेविभीतक
तरावपि॥ चक्रेकर्षेपुमान्क्लीबंतुत्थेसौवर्चलेंद्रिये॥ ३॥ उषाबाणसु
ताराश्योरुषः कामिनिगुग्गुलौ॥ रात्रिशेषेउषायांतुकेचिदाहुस्तदव्य
यं॥ ४॥ ऊषः क्षारमृदिप्रोक्तंप्रभातेपिपुमानयम्॥ तत्संध्यायांवरं
ध्रेचचंदनाद्रौश्रवोविले॥ ५॥ ऋषिर्वेदेवसिष्ठादौदीधितौचपुमान
यं॥ ऋक्षः पर्वतभेदेस्याद्भल्लूकेशोणकेपुमान्॥ ६॥ कृतवेधनेऽन्यलिं
गंनक्षत्रेपुन्नपुंसकं॥ कक्षास्यादंतरीयस्यपश्चादंचलपल्लवे॥ ७॥
स्पर्धापदेनादोर्मूलेकच्छवीरुत्तृणेषुच॥ कर्षोनाकर्षणेमानप्रभेदेपु
न्नपुंसकं॥ ८॥ कर्षूः पुमान्करीषाग्नौस्त्रियांकुल्येष्टिखातयोः॥ का-
ञ्चीतुवरिकायांचसौराष्ट्रमृद्यपिस्त्रियां॥ ९॥ कोषोऽस्त्रीकुड्मलेपा
त्रेदिव्येखड्गपिधानके॥ जातिकोशेऽर्थसंघातेपेश्यांशब्दादिसंग्रहे॥
१०॥ घोषआभीरपल्यांस्याद्गोपालध्वनिघोषके॥ कांस्येचांबुदनादे
नाघोषामधुरिकौषधौ॥ ११॥ चोक्षोगीतेशुचौदक्षेनथाऽभीक्ष्णम-
नोज्ञयोः॥ झषानागबलायांस्त्रीतापमत्स्याटवीषुना॥ १२॥ तर्षोलि
प्सोदन्ययोस्त्विट्कांतौवाचिरुचौस्त्रियां॥ तुषोधान्यत्वगस्त्रद्धो-
स्तृषालिप्सातृषोःस्त्रियां॥ १३॥ तृट्लिप्सायामुदन्यायांस्मरपुत्र्या
मपिस्त्रियां॥ दक्षस्त्रिषुपटौपुंसिताम्रचूडेप्रजापतौ॥ १४॥ मुनिभेदे
हरस्वषेद्रुमभेदेस्त्रियांभुवि॥ दोषः स्याद्दूषणेपापेदोषारात्रौभुजेपित्र

॥१५॥ ध्वांक्षोमत्स्यात्खगेकाकेतर्कोटभिक्षुकेपिच॥ ध्वांक्षीकक्को-
लिकायांस्यात्पुंसिकार्त्स्न्येतृणेपिच॥ १६॥ क्लीबेऽथपुंसिमहिषेनिकृष्टे
पुनरन्यवत्॥ प्लक्षोजटीगर्दभांडद्वीपभित्कुंजराशने॥१७॥ पक्षोमा
सार्द्धकेपार्श्वगृहेसाध्यविरोधयोः॥ केशादेःपरतोवृंदेबलेसखिसहाय
योः॥१८॥ चुल्लीरंध्रेपतत्रेचराजकुंजरपार्श्वयोः॥ प्रेक्षानृत्येक्षणेबुद्धौ
प्रेषःक्लेशेचमर्दने॥१९॥उन्मानेप्रेषणेपौषोमासेतत्पूर्णिमातिथौ॥ स्त्रि
यांभिक्षाभृतौयाञ्चासेवाभिक्षितवस्तुषु॥ २०॥ माषोव्रीह्यंतरेमूर्खेमा
नत्वग्दोषभेदयोः॥ मिषंव्याजेस्पर्धनेनामेषोराश्यंतरेस्तभे॥२१॥ भेषज्य
भिदिमोक्षस्तुमुक्तिपाटलिमोचने॥ यक्षोगुह्यकमात्रेचगुह्यकाधीश्वरे-
पिच॥ २२॥ रक्षाजतुरक्षणयोरूक्षस्त्वप्रेम्ण्यचिक्कणे॥ लक्षानपुंसिसं-
ख्यायांक्लीबंव्याजशरव्ययोः॥ २३॥ वर्षोऽस्त्रीभारतादौचजंबूद्वीपाब्द
वृष्टिषु॥ प्रावृट्कालेस्त्रियांभूम्नि विट्स्त्रीव्यापनविष्ठयोः॥२४॥ विषंतुग
रलेतोयेऽनिविषायांचयोषिति॥ वृषोधर्मेबलीवर्देशृंग्यांपुंराशिभेदयोः॥२५
॥ श्रेष्ठेस्यादुत्तरस्थश्चव्यासमूषिकशुक्रले॥ तथावास्तुस्थानभेदेपुमाने
षप्रकीर्तितः॥ २६॥ वृषामूषिकपर्ण्यांचयतीनामासनेवृषी॥ व्योषंस्या
त्त्रिकटुद्रव्येकांस्यभेदेपुमानयं॥ २७॥ शुषिःशोषेबिलेस्त्रीस्याच्छोषःसं
कर्षणेवधे॥ अनंतेनाप्रसादेनस्वनिर्माल्यार्पणेस्त्रियाम्॥२८॥ उपयुक्ते
तरेनस्त्रीशोषोयक्ष्मणिशोषणे॥ ॥षत्रिः॥ अध्य
क्षोऽधिकृतेपुंसिस्यात्प्रत्यक्षेऽभिधेयवत्॥२९॥ अभीषुःप्रग्रहेरश्मौ
नाकर्षोद्यूतइंद्रिये॥ पाशकेशारिफलकेकोदंडाभ्यासवस्तुनि॥ ३०॥
आकर्षणेपिपुंसिस्यादामिषंपुन्नपुंसकं॥ भोग्यवस्तुनिसंभोगेप्युत्
कोचेपललेपिच॥ ३१॥ उष्णीषंतुशिरोवेष्टेकिरीटेलक्षणांतरे॥ उत्प्रे
क्षानवधानेपिकाव्यालंकरणांतरे॥३२॥ कल्मषंकिल्बिषेक्लीबंपुंसि-
स्यान्नरकांतरे॥ कल्माषोयातुधानेचकृष्णपांडवकृष्णयोः॥ ३३॥ कलु
षंत्वाविलेपापे किल्बिषंपापरोगयोः॥ अपराधेपिकुल्माषंकांजिके-

यावकेपुमान्॥ ३४॥ गंडूषो मुखपूर्तौ च पुष्करप्रसृतोन्मिते॥ गवाक्षी शाक्रवारुण्यां गवाक्षो जालकेकपौ॥ ३५॥ गोरक्षो नागरंगे स्याद्गवां च परिरक्षके॥ जिगीषा जेतुमिच्छायां व्यवसायप्रकर्षयोः॥ ३६॥ तविषी शक्रकन्यायां पुंसि स्वर्गे महोदधौ॥ ताविषी चंद्रकन्यायां नास्वर्गांबुधिकांचने॥ ३७॥ नहुषो नागभेदे स्यात्सोमवंशनृपेपि च॥ निकषः शाणफलके निकषा यातुमातरि॥ ३८॥ निमेष निमिषौ कालप्रभेदेऽक्षिनिमीलने॥ पुरुषं कबुरे रूक्षे निष्ठुरे क्रौंचवाच्यवत्॥ ३९॥ प्रदोषः समयेऽदोषे प्रत्यूषो हर्मुखे वसौ॥ पीयूषं सप्तदिवसावधिक्षीरे तथाऽमृते॥ ४०॥ पुरुषः पूरुषे सांख्यज्ञे च पुन्नागपादपे॥ पौरुषं पुरुषस्य स्याद्भावे कर्मणि तेजसि॥ ४१॥ ऊर्ध्वविस्तृतदोःपाणिनृमानेत्वभिधेयवत्॥ महिषी कृताभिषेका सैरिभ्योरोषधीभिदि॥ ४२॥ मारिषः शाकभिद्यार्येनाट्योक्त्या पुंसि योषिति॥ दक्षांबायां मृगाक्षी तु विशालामृगनेत्रयोः॥ ४३॥ रक्ताक्षः कासरे क्रूरे पारावतचकोरयोः॥ रौहिषं कत्तृणे क्लीबं पुंसि स्याद्धरिणांतरे॥ ४४॥ विश्लेषो विधुरे योगे शुश्रूषा स्यादुपासने॥ कथने श्रोतुमिच्छायां शैलूषो नटबिल्वयोः॥ ४५॥ संघर्षस्तु पुमान्घृष्टौ स्पर्धायां च प्रभंजने॥ समीक्षा तु स्त्रियां तत्वे बुद्धावपि निभालने॥ ४६॥ ॥ षचतुः

अनुकर्षो रथाधःस्थदारुण्यप्यवकर्षणे॥ अंबरीषं रणे भ्राष्ट्रे क्लीबं पुंसि नृपांतरे॥ ४७॥ नरकस्य प्रभेदे च किशोरे भास्करेऽपि च॥ आम्रातकेऽनुतापे चानिमिषो मत्स्यदेवयोः॥ ४८॥ अनुतर्षः सुरापानपात्रे तृष्णाऽभिलाषयोः॥ अहिद्विड्गरुडे शक्रे मयूरे नकुले पुमान्॥ ४९॥ अलंबुषः प्रहस्ते च छर्दने राक्षसांतरे॥ अलंबुषा तु मुंडीर्यां स्वर्गवारांगनांतरे॥ ५०॥ अथ किंपुरुषो लोकभेदकिन्नरयोः पुमान्॥ देववृक्षः सप्तपर्णे मंदारे स्त्रीगुग्गुलौ॥ ५१॥ नंदिघोषोऽर्जुनरथे घोषे बंदिजनस्य च॥ परिवेषस्तु पुल्लिंगः परिधौ परिवेषणे॥ ५२॥ परिघोषो निनादे स्यादवाच्ये जलदध्वनौ॥ पलंकषा गोक्षुरके रास्ना गुग्गुलुकिंशुके

॥५३॥ मुंडीरीलाक्षयोश्चस्त्रीराक्षसेतुपलंकषः॥ वीरवृक्षस्तु भल्लातककुभद्रुमयोः पुमान्॥५४॥ भूतवृक्षस्तु शाखोटद्रुमेश्योनाकपादपे॥ महाघोषातुकर्कटशृंग्यांपुंस्यतिघोषणे॥५५॥ क्लीबंहट्टे राजवृक्षः सुवर्णालिपियालयोः॥ वातरूषस्तुवातूलोत्कटयोःशक्रकार्मुके॥५६॥ विशालाक्षोहरेतार्क्ष्येनासुनेत्रेऽभिधेयवत्॥ सकटाक्षोवराक्षेनाकटाक्षसहितेत्रिषु॥५७॥ ॥ इतिषांतवर्गः॥ ॥

सहि:॥

॥कंसोस्त्रीतैजसद्रव्ये कांस्यमानेस्फुरेतुना॥ कासूर्विकलवाचिस्यात्तथाशक्त्यायुधेस्त्रियाम्॥१॥ गुच्छः स्यात्स्तबकेस्तबेहारभिद्ग्रंथिपर्णयोः॥ गोसोबोलोषसोश्चासइक्षुपक्षिभिदोः पुमान्॥२॥ त्रासोभयेमणेर्दोषे दासीबाणाभुजिष्ययोः॥ दासोभृत्येच शूद्रेचज्ञातात्मनिचधीवरे॥३॥ नासातुनासिकायांचद्वारोर्ध्वदारुणिस्त्रियाम्॥ प्रसूरश्वाजनन्योश्चकंदलीवीरुधोःस्त्रियां॥४॥ वसंतोदेवभेदाभिप्रायोश्च बकराजस॥ क्लीबे वृद्धौषधेः श्वेचरैरत्नमधुरेत्रिषु॥५॥ भासःपुंसिप्रभायांस्याद्विशेषेविहगस्यच॥ भाः प्रभावेमयूखेस्त्रीमाश्चंद्रमासयोःपुमान्॥६॥ मांसंस्यादामिषेक्लीबंकक्कोलीजटयोःस्त्रियाम्॥ मिसिःस्त्रीमधुरामांस्योःशतपुष्पाजमोदयोः॥७॥ मृत्साकाक्ष्यांप्रशस्तमृदिरसोगंधरसेजले॥ शृंगारादौविषेवीर्येतिक्तादौद्रवरागयोः॥८॥ देहधातुप्रभेदेचपारदस्वादयोःपुमान्॥ स्त्रियांतुरसनापाठाशल्लकीकंगुभूमिषु॥९॥ रासःकोलाहलेध्वानेभाषाशृंखलकेपिच॥ क्रीडाभेदेचगोपानांवत्सःपुत्रादिवर्षयोः॥१०॥ नर्णकेनोरसिक्लीबंव्यासोनाविस्तृतेमुनौ॥ शंसावचसिवाञ्छायांहंसः स्यान्मानसौकसि॥११॥ निर्लोभनृपविष्णवर्केपरमात्मनिमत्सरे॥ योगिभेदेमंत्रभेदेशरीरमरुदंतरे॥१२॥ तुरंगमप्रभेदेपि हिंसाचौर्यादिघातयोः॥ ॥सत्रिः॥ ॥अलसाहंसपद्यानापादरोगद्रुमेदयोः॥१३॥ क्रियामंदेत्रिष्वथाऽर्चिर्मयूखशिखयोर्न्ना॥

अदः परस्मिन्नत्रस्यादभ्यासो ऽभ्यसनेंऽतिके॥ १४॥ आगोऽपरा
धेपापेस्यादाश्वासःपुंसिनिर्वृतौ॥ आख्यायिकापरिछेदेचाशीर्द
तेमरुडुजां॥१५॥ हिनस्याशंसनेस्त्रीस्यादिष्वासः कार्मुकेपुमान्
॥त्रिषुस्यात्क्षेपकेचैषोरुच्छासः प्राणनेपिच॥ १६॥ आख्यायि
कापरिछेदेप्याश्वासेपिपुमानयम्॥उत्तंसः कर्णपूरेपिशिखरेपिच
नस्त्रियां॥१७॥ उषः प्रत्यूषसिक्लीबंपित्तप्रस्वांन्वयोषिति॥उरोवक्ष
सिचश्रेष्ठेप्येनःपापापराधयोः॥ १८॥ ओजोदीप्ताववष्टंभेप्रकाश
बलयोरपि॥ ओकआश्रयमात्रेचमंदिरेचनपुंसकम्॥१९॥ कीकसः
कृमिजातौस्यात्पुंसिकुल्येनपुंसकं॥ चमसोयज्ञपात्रस्यभेदेस्त्री
पिष्टकेस्त्रियाम्॥२०॥ छंदः पद्येचवेदेचस्वैराचाराभिलाषयोः॥
ज्यायो वृद्धेऽतिप्रशस्तेज्योतिरग्नौदिवाकरे॥२१॥पुमान्नपुंसकंदृ
ष्टौस्यान्नक्षत्रप्रकाशयोः॥ तरोबलेचरोगेच तपोलोकांतरेऽपिच॥२२
चांद्रायणादौधर्मेचपुमान्शिशिरमाघयोः॥ तमोध्वांतेगुणेशोके क्ली
बंबालाविधुंतुदे॥२३॥ तामसीनिशिदुर्गायां तामसोभुजगेखले॥
तेजोदीप्तौप्रभावेचस्यात्पराक्रमरेतसोः॥२४॥ धनुःपियालेनानस्त्री
राशिभेदेशरासने॥ धनुर्धरेत्रिषुनभः क्लीबंव्योम्निपुमान्घने॥२५॥
घ्राणश्रावणवर्षासुबिसतंतौपतद्ग्रहे॥ पनसः कंटकिफलेकं टकेवा
नरांतरे॥२६॥स्त्रियांरोगप्रभेदेस्यात्पयः स्यात्क्षीरनीरयोः॥पाय
सस्तु क्लीबपुंसोःश्रीवासपरमान्नयोः॥२७॥ पुक्कसीकालिकानील्योः
पुक्कसः श्वपचेऽधमे॥ बीभत्सोनार्जुनेक्रूरघृणात्मविकृतौत्रिषु॥२८
भूयांस्त्रिषुबहुतरेपुनरर्थेत्वदोऽव्ययं॥ मनश्चित्तेमनीषायांमह
उत्सवतेजसोः॥२९॥ मानसंसरसिस्वांतेरभसोहर्षवेगयोः॥ रहस्त
त्त्वरतेगुह्येरजः क्लीबंगुणांतरे॥३०॥ आर्तवेचपरागेचरेणुमात्रेचदृश्य
ते॥ राक्षसोयातुधानेस्याचंडायांराक्षसी स्मृता॥३१॥रेपाःस्याद
धमेक्रूरेकृपणेप्यभिधेयवत्॥ रेतः शुक्रेपारदेचरोदश्च रोदसीति

च॥ ३२॥ दिवि भूमौ रथश्चस्यात्तद्वोत्र्याप्येनयोस्तथा॥ लालसोत्स
क्यतृष्णातिरेकयांञ्चासु च द्वयोः॥ ३३॥ वयः पक्षिणि बाल्यादौ यौव
ने च नपुंसकम्॥ वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि॥ ३४॥ पुंसि
चंद्रस्य तनये बर्हिः पुंसि हुताशने॥ नस्त्री कुशे वपुः क्लीबं न नौ शस्ता
कृतावपि॥ वतंसस्तु पुमान्कर्णपूरशेखरयोरपि॥ वाहसो जलनि
र्याणे शयालौ स्यान्निषण्णके॥ ३६॥ वायसो गुरुवृक्षे च श्रीवासध्वां
क्षयोः पुमान्॥ काकोदुंबरिकायां च काकमाच्यां च वायसी॥ ३७॥
विद्वानात्मविदि प्राज्ञे पंडिते चाभिधेयवत्॥ विलासो हावभेदे स्या
ल्लीलायामपि पुंस्ययं॥ ३८॥ वितंसो बंधनोपाये मृगाणां पक्षिणामपि
॥ नेषामपि च विश्वासहेतोः प्रावरणे पि च॥ ३९॥ वेधाः पुंसि त्वृषीकेशे
बुधे च परमेष्ठिनि॥ शिरः प्रधाने सेनाग्रे शिखरे मस्तकेपि च॥ ४०॥ श्री
वासो वृकधूपेपि पंकजे मधुसूदने॥ श्रेयो मुक्तौ शुभे धर्मे ऽतिप्रशस्ते च
वाच्यवत्॥ ४१॥ श्रेयसी करिपिप्पल्यामभया पाठयोरपि॥ सहो बले
ज्योतिषि च पुंसि हेमंतमार्गयोः॥ ४२॥ सरसी विश्वकासारे सरो नीरत
डागयोः॥ स्यात्समासस्तु पुल्लिंगः संक्षेपे च समर्थने॥ ४३॥ सारसः
पक्षिभेदेंऽद्वोः क्लीबं तु सरसीरुहे॥ साहसं तु बलात्कारकृतकार्ये दमेपि
च॥ ४४॥ सुरसस्तु त्रिषु स्वादौ पर्णाशे तु नपुंसकं॥ स्त्री रास्नानागमा-
त्रोश्च स्रोतो ऽबुवेग इंद्रिये॥ ४५॥ हविर्हीतव्यमात्रे च सर्पिष्यपि नपुं
सकम्॥ ॥सचतुः॥ ॥अधिवासो निवासे स्यात्संस्का
रे धूपनादिभिः॥ ४६॥ अवध्वंसः परित्यागे निंदनेप्यवचूर्णने॥ अ
वतंसो नस्त्रियं स्यात्कर्णपूरे च शेखरे॥ ४७॥ अशोकाः पुंसि शरभेप
क्षिपंचास्ययोरपि॥ उदर्चिरुत्प्रभे वाच्यलिंगः पुंसि हुताशने॥ ४८॥ क
लहंसस्तु कादंबे राजहंसे नृपोत्तमे॥ कनीयानतियूनि स्यादत्यल्पा
नुजयोस्त्रिषु॥ ४९॥ कुंभीनसः क्रूरसर्पे स्त्रियां लवणमातरि॥ भवे
द्घनरसः सांद्रनिर्यासे मोरटेंबुनि॥ ५०॥ कर्पूरे पीलुपर्ण्यां च सम्यक्

सिंदूरसेपिच॥ चंद्रहासो दशग्रीवकरवाले ऽसिमात्रके॥ ५१॥ जटा
युःपुंसिसंपातेः कनीयसिच गुग्गुलौ॥ अथतामरसंपद्मेताम्रकां
चनयोरपि॥ ५२॥ त्रिस्रोताजन्हुकन्यायांस्रोतस्वत्यंतरेस्त्रियां॥ दि
वोकाश्च दिवौकाश्चपुंसिदेवेच चातके॥ ५३॥ दीर्घायुः शाल्मली
वृक्षवायसे जीवकद्रुमे॥ मार्कंडेयेचपुंसिस्याच्चिर जीविनि वाच्यवत्
॥ ५४॥ नगौकाः पुंसिशरभेपक्षिपंचास्ययोरपि॥ निश्रेयसंतु कल्या
णमोक्षयोः शंकरेपुमान्॥ ५५॥ नीलांजसाप्सरोभेदेसरिद्भेदेचवि
द्युति॥ प्रचेताः पाशिनिमुनौनाप्रकृष्टहृदित्रिषु॥ ५६॥ पुनर्वसुः-
र्नामुनिभिद्यजेद्वित्वेतुभांतरे॥ पौर्णमासः पुमान्यज्ञभेदेस्त्रीपूर्णिमा
तिथौ॥ ५७॥ महारसः स्यात्खर्जूरे कोशकारकशेरुणोः॥ मलीमस-
स्तुमलिनेपुष्पकाशीसलोहयोः॥ ५८॥ भवेन्मधुरसाद्राक्षामूर्विका
दुग्धिकासुच॥ यमस्वसातुदुर्गायांयमुनायामपिस्त्रियां॥ ५९॥ यवी
यान्नानुजेपिस्याद्‌तियूनिचवाच्यवत्॥ रासेरसस्तुगोष्ठ्यांस्याद्धास-
शृंगारयोरपि॥ ६०॥ रससिद्धिरसावासषष्ठीजागरकेपिच॥ राजहंस
स्तुकादंबेकलहंसे नृपोत्तमे॥ ६१॥ वरीयान्योगभिच्छ्रेष्ठवरिष्ठेष्व
तियूनिच॥ विहायाः शकुनेपुंसिगगनेपुंन्नपुंसकं॥ ६२॥ विभावसुः
पुमान्सूर्येहारभेदेचपावके॥ श्वःश्रेयसंचकल्याणेपरमात्मनिशर्म
णि॥ ६३॥ अथसर्जरसोवाद्यभांडभेदेचधूणके॥ सप्तार्चिःपा
वकेपुंसिक्रूरचक्षुषितुत्रिषु॥ ६४॥ साधीयानतिबाढेस्याद्‌तिसा
धौचवाच्यवत्॥ सिंदूरसोरसेपुंसिधातुप्रभृतिषुत्रिषु॥ ६५॥ सु
मनाः पुष्पमालत्योःस्त्रियांनाधीरदेवयोः॥ सुमेधास्तुस्त्रियांज्योति
ष्मत्यांत्रिषुसुबुद्धिनि॥ ६६॥ ॥ सपंच॥ ॥ दिव्य
चक्षुः सुगंधस्यभेदेनांधेसुलोचने॥ स्यान्नभश्चमसश्चंद्रेचि
भ्रापूपेंद्रजालयोः॥ ६७॥ हिंगुनिर्यासइत्येषनिंबेहिंगुरसेपिच॥ ॥
॥ ॥ सषट्॥ ॥ हिरण्यरेताः पुंसिस्याद्दिवाकरहवि

भुजोः॥ ६८॥ ॥ इतिसांतवर्गः॥ ॥ हैकं॥ ॥

हः शिवेसलिले शून्ये धारणे मंगलेपि च॥ गगने नकुलीशे च रक्ते नाके च वर्ण्यते॥ १॥ ॥ हद्विः॥ ॥ अहिर्वृत्रासुरे सर्पे पुंसी होद्यमवांछयोः॥ कुहूः स्त्री कोकिलालापे नष्टेंदुकलदर्शयोः॥ २॥ ग्रहोनुग्रहनिर्बंधग्रहणेषु रणोद्यमे॥ सूर्यादौ पूतनादौ च सैंहिकेयोपरागयोः॥ ३॥ ग्राहो ग्रहे ऽवहारे च गुहः षाण्मातुरे गुहा॥ सिंहपुच्छ्यांच गर्ते च पर्वतादेश्च गह्वरे॥ ४॥ गृहं गृहाश्च पुंभूम्नि कलत्रेपि च सद्मनि॥ नाहस्तु बंधने कूटे प्रोहो गजांघ्रिपर्वणोः॥ ५॥ वाच्यवन्निपुणे तर्के बर्हं पिच्छे दले स्त्रियां॥ बहु स्यात्त्र्यादिसंख्यासु विपुलेप्यभिधेयवत्॥ ६॥ मही नद्यंतरे भूमौ महउत्सवतेजसोः॥ अथ मोहोन्यलिंगः स्यादविद्यायांच मूर्छने॥ ७॥ लोहोऽस्त्री शस्त्रके लोहे जोंगके सर्वतैजसे॥ वहः स्याद्वृषभस्कंधे वाहे गंधवहेपि च॥ ८॥ वाहो भुजे पुमान्मानभेदाश्ववृषवायुषु॥ व्रीहिः सामान्यधान्ये स्यादाशुधान्ये तु पुंस्ययं॥ ९॥ व्यूहः स्याद्बलविन्यासे निर्माणे वृंदतर्कयोः॥ सहो बलेन स्त्रियां स्यात्स्त्रियांतु नखभेषजे॥ १०॥ दंडोत्पलासुद्गपर्णीकुमारीपृथिवीषु च॥ सिंहः कंठीरवे राशौ सत्तमे चोत्तरस्थितः॥ ११॥ सिंही तु कंटकार्यां स्याद्वार्ताकीवासकेपि च॥ स्नेहः स्यात्सुंसितैलादिरसद्रव्ये च सौहृदे॥ १२॥ ॥ हत्रिः॥ ॥ अत्यूहो नीलिकायां स्त्री कालकंठखगे पुमान्॥ आग्रहोनुग्रहासक्त्योराक्रमे ग्रहणेपि च॥ १३॥ आरोहस्त्ववरोहे च वरारोहा कटावपि॥ आरोहणे गजारोहे दीर्घत्वे च समुच्छ्रये॥ १४॥ उत्साहस्तूद्यमे सूत्रे कटाहः कूर्मकर्परे॥ द्वीपस्य च प्रभेदे स्यात्तैलादेः पाकभाजने॥ १५॥ जायमानविषाणाग्रमहिषीशावकेपि च॥ कलहं युद्धकाले नारवड्गकोशे च मंडने॥ १६॥ दात्यूहस्तु पुमान्कालकंठ चातकपक्षिणोः॥ निग्रहो भर्त्सने नेष स्यान्मर्यादायां च बंधने॥ १७॥ निर्व्यूहः शिखरे द्वारे नि

र्यासेनागदंतके॥ निरूहो बस्तिभेदेस्याद्दूहशून्येचनिश्चिते॥१८॥ प्र
ग्राहस्तुतुलासूत्रे वृषादिप्रग्रहेपिच॥ पटहोनासमारंभेआनकेपु
न्नपुंसकं॥१९॥ प्रवहस्तुबहिर्यात्रामातरिश्वप्रभेदयोः॥ प्रग्रहस्त्कतु
लासूत्रेबंद्यांनियमनेभुजे॥२०॥ हयादिरश्मौरश्मौचसुवर्णालुमहीरुहे
॥प्रवाहस्तुप्रवृत्तौस्यादपिस्त्रोतसिवारिणः॥२१॥ वराहःसूकरेवि-
ष्णौमानभेदेऽद्रिमुस्तयोः॥ वाराहीमातृभेदेस्याद्विष्वक्सेनप्रियौष
धौ॥२२॥ राजार्हजोंगकेक्लीबंराजयोग्येऽभिधेयवत्॥ विग्रहःका
यविस्तारेविभागेतारणेस्त्रियां॥२३॥ विदेहःकायशून्येस्याज्जनका
न्वयभूमिपे॥ वैदेहीरोचनासीतावणिक्स्त्रीपिप्पलीषुच॥२४॥ सं
ग्रहोबृहदुद्गेग्रहसंक्षेपयोरपि॥ सुवहाशल्लक्येलापर्णीगोधाप
दीषुवीणायाम्॥२५॥ रास्नाशेफालिकयोःस्त्रीसुखवाह्येऽन्यलिंगः
स्यात्॥ ॥हन्ततुः॥ ॥अवग्रहोवृष्टिरोधेप्रतिबंधे
गजालिके॥२६॥ अभिग्रहोऽभिग्रहणेऽभियोगेपिचगौरवे॥ अ
वरोहोवतरणेप्यारोहेचलतोद्गमे॥२७॥ अश्वारोहाऽश्वगंधा-
यांस्त्रियांत्रिष्वश्ववाहके॥ उपनाहोव्रणालेपपिंडेवीणानिबंधने॥२८
॥उपग्रह पुमान्बंद्यामुपयोगेनुकूलने॥ स्याद्गंधवाहानासायांपु
ल्लिंगोमातरिश्वनि॥२९॥ तनूरुहंतुलोम्निस्यात्पतत्रेचनपुंसकं॥
तमोपहःसहस्रांशुमृगांकाजिनवह्निषु॥३०॥ प्रतिग्रहःस्वीकर
णेसैन्यपृष्ठेपतद्ग्रहे॥ द्विजेभ्योविधिवद्देयेतद्ग्रहेचग्रहांतरे॥३१॥प
रिग्रहःपरिजनेपत्न्यांस्वीकारमूलयोः॥ शापेपरिबर्होराजयोग्यद्र
व्यपरिच्छदे॥३२॥ परीवाहोजलोच्छ्वासेमहीभृद्योग्यवस्तुनि॥पि
तामहोविरिंचौस्यात्तातस्यजनकेपिच॥३३॥ महासहामाषपर्ण्या
मम्लानेऽपिचयोषिति॥ ॥हपंच॥ ॥प्रपितामहस्त्वे
वंविधौपित्तृमितामहे॥३४॥ ॥इतिहांतवर्गः॥ ॥
अथाऽव्ययानिवक्ष्यंतेव्यक्तंपूर्वादितेःक्रमैः॥अकाराद्यंतताचास्मिं

स्तस्मादप्यतिरिच्यते॥ १॥ अशब्दः स्यादभावेपिस्वल्पार्थप्रतिषेधयोः॥ अनुकंपायांच तथावासुदेवे त्वनव्ययः॥ २॥ आः प्रगृह्यंस्मृतौ वाक्येऽनुकंपायांसमुच्चये॥ इमेदेवरुषोक्तौचापाकरणानुकंपयोः॥ ३॥ ईविषादेनुकंपायांलक्ष्म्यांपुनरनव्ययं॥ उसंबोधनरोषोक्त्योरनुकंपानियोगयोः॥ ४। पदपूरणेचपादपूरणेऽपिचदृश्यते॥ ऊवाक्यारंभरक्षाऽनुकंपास्वपिचदृश्यते॥ ५॥ ऋशब्दोगर्हणेवाक्येदेवाबायांत्वनव्ययं॥ ॠवाक्यारंभरक्षायांवक्षःस्मृत्योरनव्ययं॥ ६॥ देवांबायांदनौचापिभैरवेदनुजेगतौ॥ ऌकारोदेवतामायांक्षविकुध्रेचकीर्तितः॥ ७॥ ॡकारोदेवनार्यांस्यान्नार्यात्मन्यपिमातरि॥ एस्मृतावप्यसूयानुकंपामंत्रणहूतिषु॥ ८॥ ऐशब्दोदृश्यतेहूतौस्मृत्यामंत्रणयोरपि॥ ओसंबोधनआह्वानेस्मरणेचानुकंपने॥ ९॥ औशब्दःकथितोहूतौतथासंबोधनेपिच॥ स्त्रीतुविश्वंभरायांस्यात्पुमांस्तुनिस्वनेस्मृतः॥ १०॥ ॥ कैकं॥ ॥ कुपापेचेषदर्थेचकुत्सायांचनिवारणे॥ ॥ कद्विः॥ ॥ धिग्भर्त्सनेचनिंदायां॥ ॥ कत्रिः॥ ॥ मनागप्यल्पमंदयोः॥ ११॥ हिरुक्शब्दोविनार्थेचमध्यार्थेपिचदृश्यते॥ ॥ गद्विः॥ ॥ अंगसंबोधनेहर्षेसंगमासूययोरपि॥ १२॥ ॥ ङद्विः॥ ॥ आङ्सीमायामभिव्याप्तौक्रियायोगेषदर्थयोः॥ ॥ चैकं॥ ॥ चान्वाचयेसमाहारेप्यन्योन्यार्थेसमुच्चये॥ १३॥ पक्षांतरेतथापादपूरणेप्यवधारणे॥ ॥ चद्विः॥ ॥ किंचारंभेचसाकल्येप्राक्पूर्वस्मिन्नवांतरे॥ १४॥ अग्रेप्रभातेतीतेचदेशेदिक्कालयोरपि॥ ॥ चत्रिः॥ ॥ तिर्यक्तिरोर्थेवक्रेचविहंगादौत्वनव्ययं॥ १५॥ ननुचप्रश्नदुष्टोक्त्योःसम्यक्दृढप्रशंसयोः॥ ॥ ञद्विः॥ ॥ नञभावेनिषेधेचस्वरूपार्थेप्यतिक्रमे॥ १६॥ ईषदर्थेचसादृश्येनद्विरुद्धतदन्ययोः॥ ॥ ठद्विः॥ ॥ स्रुष्ठुप्रशंसनेपिस्यां

दित्यर्थेचनिगद्यते॥ १७॥ ॥ ठत्रिः॥ ॥ अपष्टुनिरव
द्येचशोभनार्थेचदृश्यते॥ ॥ णान्ततुः॥ ॥ अंतरेणपदंवि
नाहिनामध्यार्थयोरपि॥ १८॥ ॥ तैकम्॥ ॥ तुपादपूरणेभे
देसमुच्चयेवधारणे॥ पक्षांतरेनियोगेच प्रशंसायांविनिग्रहे॥ १९॥ ॥
तद्विः॥ ॥ अतिशब्दः प्रशंसायां प्रकर्षेलंघनेपिच॥ नितांतासं-
प्रतिक्षेपवाचकोप्येषदर्शितः॥ २०॥ अस्तुस्यादभ्यनुज्ञानेऽप्यसू-
यापीडयोरपि॥ प्रतिक्षेपे प्रशंसायांप्रकर्षेलक्षणेपिच॥ २१॥ असं-
प्रत्यर्थउद्दिष्ट मितिहेतौप्रकाशने॥ निदर्शनेप्रकारेस्यात्सरकृत्यनु
कर्षयोः॥ २२॥ समासौच प्रकरणेः प्युतात्यर्थविकल्पयोः॥ समुच्च
येवितर्केच प्रश्नेचपदपूरणे॥ २३॥ उत्स्यात्प्रश्नेवितर्केचचेत्कुत्सि
तप्रशंसयोः॥ पक्षांतरेप्यसकल्येजातुशब्देविगर्हणे॥ २४॥ कदाचि
दर्थेपितथान्येऽविकल्पनिषेधयोः॥ प्रतिप्रतिनिधावित्थंभूताख्या
नाभिमुख्ययोः॥ २५॥ मात्रार्थभागवीप्सास्रुलक्षणप्रतिदानयोः॥
बतामंत्रणसंतोषखेदानुक्रोशविस्मये॥ २६॥ स्वस्तिस्यान्मंगले
पुण्येप्याशंसायामपिक्वचित्॥ स्विप्रश्नेचवितर्केचतथैवपदपूरणे
॥ २७॥ हंतवाक्यारंभखेदविषादहर्षसंभ्रमे॥ ॥ तत्रिः
॥ ॥ आराद्दूरेसमीपेच कच्चित्कामप्रवेदने॥ २८॥ प्रश्नेहर्षे
मंगलेच किमुप्रश्नवितर्कयोः॥ विकल्पेनिश्चयेपिस्यात्तावन्मानेव-
धारणे॥ २९॥ संभ्रमेचपरिच्छेदे तथाकार्त्स्न्याधिकारयोः॥ पश्यत-
स्यात्प्रशंसायां विस्मयेचनिगद्यते॥ ३०॥ पश्चात्प्रतीच्यां परमेप्य
धिकारेपिदृश्यते॥ यद्वत्प्रश्नेवितर्केच यावत्कार्त्स्न्येवधारणे
॥ ३१॥ प्रशंसायांपरिच्छेदेमानाधिकारसंभ्रमे॥ पक्षांतरेच शश्वत्
स्यादात्मप्रश्नेचमंगले॥ ३२॥ पुराकल्पेसदार्थेचपुनरर्थेचदृश्यते
॥ सकृत्सहैकवारेस्यात् साक्षात्प्रत्यक्षतुल्ययोः॥ ३३॥ ॥
तन्वतुः॥ ॥ अहोबतानुकंपायां खेदेसंबोधनेपिच॥ पुर-

स्तात्प्रथमे प्राच्यामग्रतोर्थ पुरार्थयोः॥३४॥ ॥थद्विः॥
अथाथो संशये स्यातामधिकारे च मंगले॥ विकल्पानंतरप्रश्नका-
र्त्स्न्यारंभसमुच्चये॥३५॥ तथाभ्युपगमे पृष्ठप्रतिवाक्ये समुच्चये
॥ सदृशो निश्चये पि स्याद्यथा तुल्यार्थमानयोः॥३६॥ प्रशंसायां
वृथा वंध्ये निष्कारणे॥ थत्रिः॥ ऽन्यथा पुनः॥ वितथे चाप
रार्थे च सर्वथा हेतुवादयोः॥३७॥ ॥दद्विः॥ ॥उत्प्र-
काशे विभागे च प्राबल्या स्वास्थ्यशक्तिषु॥ प्राधान्ये बंधने भावे मो
क्षे लाभोर्ड्वकर्मणोः॥३८॥ यत् गर्हाहेत्ववधृत्योर्यदि गर्हाविक
ल्पयोः॥ ॥धद्विः॥ ॥अधि स्यादधिकारे चापीश्वरे च-
निगद्यते॥ ३९॥ ॥नैकम्॥ ॥न स्यान्निषेधोपमयो
र्निर्निवेशाभृशार्थयोः॥ नि त्यार्थे संशयक्षेपकौशलोपरमेषु च॥ ४०
॥ सामीप्याश्रयदानेषु मोक्षांतर्भावबंधने॥ राश्यधोभावविन्यासे
नु वितर्कापमानयोः॥४१॥ विकल्पानुनयातीते प्रश्ने हेत्वपदेशयोः
॥ ॥नद्विः॥ ॥अनु हीने सहार्थे च पश्चात्सादृश्य
योरपि॥४२॥ लक्षणेत्थंभूताख्यानभागवीप्सास्वनुक्रमे॥ आया
मे च समीपे च किन्नु प्रश्नवितर्कयोः॥४३॥ च न विस्मये साकल्ये
ननु शब्दो विनिग्रहे॥ अनु प्रश्ने परकृतावधिकारे च संक्रमे॥४४
आमंत्रणेप्यनुनये प्रश्नानुज्ञावधारणे॥ नाना शब्दो विनार्थेपि त-
थानेकोभयार्थयोः॥४५॥ स्थाने तु करणार्थे स्याद्युक्तसादृश्ययोर
पि॥ ॥पद्विः॥ ॥अप स्यादपकृष्टार्थे वर्जनार्थवि
योगयोः॥४६॥ विपर्यये च विकृतौ चौर्ये निर्देशहर्षयोः॥ अपि संभा
वनाप्रश्नशंकागर्हासमुच्चये॥४७॥ तथा युक्तपदार्थेपि कामकार
क्रियासु च॥ उप स्यादधिकार्थे च हीनार्थासन्नयोरपि॥४८॥ ॥
भद्विः॥ ॥अभीत्थंभूतकथने चाभिमुख्याभिलाषयोः॥
॥ ॥मैकं॥ मा वारणे विकल्पे च स्मातीते पादपू

रणे॥४९॥ स्यान्मंगलेपरकृता ॥मद्वि: च मांतिकसहार्थयोः
॥आम् ज्ञाननिश्चयस्मृत्यो रूम् रोषेंऽगीकृतावपि॥५०॥ प्रश्नेपि
स्यादूम् रुषोक्तौपृछायामोम् उपक्रमे॥ प्रणवेचाप्युपगमेचापाकृतौ
चमंगले॥५१॥ कम् पादपूरणेतोयेमस्तकेचसुखेऽपिच॥ किम् कुत्सा
यांवितर्केचनिषेधप्रश्नयोरपि॥५२॥ किमु संभावनायांस्यात्विमर्शे
चापिदृश्यते॥ नाम कोपेऽभ्युपगमेविस्मयेस्मरणेपिच॥५३॥ संभाव्य
कुत्साप्राकाश्यविकल्पेपिचदृश्यते॥ शम् कल्याणेसुखेसम् तु-
शोभनार्थसमर्थयोः॥५४॥ संगार्थेचप्रहृष्टार्थेसामिनिंदार्धयोर्म-
तं॥ हम् रुषोक्तावनुनये हुम् स्मृतावप्यपाकृतौ॥५५॥अर्थप्रश्नेऽभ्य
नुज्ञायां हूम् स्यात्प्रश्नवितर्कयोः॥ ॥मत्रि:॥ ॥
अलम् भूषणपर्याप्तिवारणेष्वनिरर्थके॥५६॥ शक्तावेवम् प्रकारे
स्यादंगीकारेवधारणे॥ अर्थप्रश्नेपरकृतावुपमापृच्छयोरपि॥५७॥ क
थम् हर्षेचगर्हायांप्रकारार्थेचसंभ्रमे॥ प्रश्नेसंभावनायांच कामम्
चानुमतौस्मृतं॥५८॥ प्रकाशेचाप्यसूयायांतथानुगमनेपिच॥ जोष
म् सुखेप्रशंसायांतूष्णींलंघनयोरपि॥५९॥ नूनम् तुनिश्चितेतर्के
स्मरणेवाक्यपूरणे॥ परम् नियोगेक्षेपेच प्राध्वम् नर्मानुकूल्ययोः॥६०
॥सत्यम् प्रश्नेऽभ्युपगमे॥ मचतु:॥ ऽवश्यम् नित्य
प्रयत्नयोः॥ अभीक्ष्णम् मुहुरत्यंतेशीघ्रप्रकर्षयोरपि॥६१॥ इदा
नीम् वाक्यभूषायांसंप्रत्यर्थेचदृश्यते॥ तद्दिनम् दिनमध्येस्या-
त्तथैवप्रतिवासरे॥६२॥ सांप्रतंचाधुनार्थेस्यादुचितार्थेच दृश्यते
॥ ॥यद्वि: ॥अयि प्रश्नानुनययोस्तथासंबोधने
पिच॥६३॥ अये क्रोधविषादेचसंभ्रमेस्मरणेपिच॥ दिष्ट्या हर्षे
मंगलेच पश्यशब्दस्तुविस्मये॥६४॥ प्रशंसायामपित्तथा॥ ॥
यत्रि: ॥समयांतिकमध्ययोः॥ ॥रेकम्॥ ॥
प्रप्रकर्षेगताद्यर्थे॥ ॥गद्वि: ॥प्यरे प्राकृतसूचयोः॥६५

उर्युरीचाप्युभौशब्दौविस्तारेंगीकृतावपि॥ दुर्निषेधेनदुष्टेचनिर्नि र्णयनिषेधयोः॥ ६६॥ परिस्यात्सर्वतोभावेवर्जनेव्याधिशेषयोः॥ इ त्थंभूताख्यानभागवीप्सालिंगनलक्षणे॥ ६७॥ दोषाख्यानेनिर- सनेपूजाव्याप्त्योश्चभूषणे॥ पराविमोक्षप्राधान्यप्रातिलोम्येषुधर्ष णे॥ ६८॥ आभिमुख्येभृशार्थेचविक्रमेचगतौवधे॥ पुरापुराणेनि कटेप्रबंधातीतभाविषु॥ ६९॥ स्वःप्रेत्यव्योम्निनाकेचा ॥ रत्रिः ॥ ॥ प्रांतः स्वीकारमध्ययोः॥ अंतरापिविनार्थेस्यान्मध्या र्थनिकटार्थयोः॥ ७०॥ उररी उररी उरीचविस्तारेंगीकृतौत्रयं॥ नकिनिषेधोपमयोः प्रादुः प्राकाश्यइष्यते॥ ७१॥ संभाव्येचप्रवृत्तौच पुनरप्रथमेमतम्॥ अधिकारेचभेदेचतथापक्षांतरेपिच॥ ७२॥ ॥ लद्विः ॥ किलशब्दस्तुवार्तायांसंभाव्यानुशयार्थयोः॥ खलु- स्याद्वाक्यभूषायांजिज्ञासायांचसांत्वने॥ ७३॥ वीप्सामाननिषेधेषु पूरणेपदवाक्ययोः॥ ॥ वेकम्॥ ॥ वास्याद्विकल्पोपम योर्विनर्के पादपूरणे॥ ७४॥ समुच्चयेचविश्वंभेनानार्थातीतयोरपि ॥ विनिग्रहेनियोगेचतथैवपदपूरणे॥ ७५॥ निश्चयेसहनेहेतावव्याप्ति विनियोगयोः॥ इषदर्थेपरिभवेशुद्धावलंबनेपिच॥ ७६॥ विज्ञाने॥ ॥ ॥ वद्विः॥ इथंवचौपम्येनियोगेवाक्यपूरणे॥ अवधारणे चवार्तानियोगेचविनिग्रहे॥ ७७॥ ॥ षद्विः॥ ॥ उषाश ब्दोनदंतेचदोषारात्रौचतन्मुखे॥ मंक्षुशीघ्रेभृशार्थेच॥ ॥ षत्रिः॥ निकषांतिकमध्ययोः॥ ७८॥ ॥ सेकं ॥ ॥ स्तु पूजायांभृशार्थानुमतिकृच्छ्रसमृद्धिषु॥ ॥ सद्विः आःस्मरणेऽपाकरणेकोपसंतापयोरपि॥ ७९॥ ईदुःखभा वनेकोपेनिर्निबंधेचविस्मये॥ साकल्यातीतयोर्भोस्तुसंबोधनविषा दयोः॥ ८०॥ ॥ सत्रिः अंजसाशब्दआख्यानस्त त्वतूर्णार्थयोरपि॥ तिरोऽन्तर्द्धौतिर्यगर्थेनीचैस्स्वैराल्पयोर्मतं॥ पुरोः

ग्रेप्रथमेभूयोऽधिकारेचपुनःपुनः॥ मिथोऽन्योन्येरहोर्थेचशनैःस्वै
रेशनैश्चरे॥८२॥ ॥ सचतुः॥ ॥ अभितःशीघ्रसाक-
ल्यसंमुखोभयतोंऽतिके अग्रतःप्रथमेचाग्रेपुरतःप्रथमा-
ग्रयोः॥ ८३॥ पूर्वेद्युःप्रातःकालेस्यात्तथैवगतवासरे॥ ॥
हैकम्॥ ॥ ह स्यात्संबोधनेपादपूरणेचविनिग्रहे॥ ८४॥
नियोगेचक्षिपायांस्यात्कुत्सायामपिदृश्यते॥ हाविषादेचशोके
चकुत्सादुःखार्थयोरपि॥ ८५॥ हि पादपूरणेहेतौविशेषेत्ववधारणे॥ प्रश्नहेत्वपदेशेचसंभ्रमासूययोरपि ॥८६॥ ही दुःख
हेत्वाख्यांतौविषादेविस्मयेपिच॥ हे संबोधनआह्वानेप्यसूयादौचदृश्यते॥ ८७॥ है संबोधनआह्वाने हो होशब्दौतथैत-
योः॥ ॥ हद्विः॥ ॥ अह प्रशंसाक्षिपयोर्नियोगेचवि
निग्रहे॥ ८८॥ अहोधिगर्थेशोकेचकरुणार्थविषादयोः॥ संबो
धनेप्रशंसायांविस्मयेपदपूरणे॥ ८९॥ असूयायांवितर्केस्यादा
हक्षेपनियोगयोः॥ आहोप्रश्नेविचारेचसहसाकल्प्यदृश्यते॥
९०॥ विद्यमानेचसादृश्ययौगपद्यसमृद्धिषु॥ संबंधेचतथाहीही
शब्दोविस्मयहास्ययोः॥ ९१॥ हे हे संबोधनेहूतौहो हो शब्दस्तथै
तयोः॥ ॥ हत्रिः॥ ॥ अहह इत्यद्भुतेखेदेपरिक्लेशप्रक
र्षयोः॥ ९२॥ संबोधनेऽपिचोलाहोपरिप्रश्नविचारयोः॥ ॥
॥ ॥ इत्यव्ययानेकार्थवर्गः॥ ॥ २३७८॥ ॥
उत्पलिनीशब्दार्णवसंसारावर्तनाममालाख्यान्॥ भागुरिवररु
चिशाश्वतबोपालितरंतिदेवहरकोषान्॥ १॥ अमरशुभांकह
लायुधगोवर्धनरभसपालरूद्रकोषान्॥ रुद्रामरदत्ताजयगंगाध
रधरणिकोषांश्च॥ २॥ हारावल्यभिधानंत्रिकांडशेषंचरत्नमालां
च॥ अपिबहुदोषंविश्वप्रकाशकोषंचसुविचार्य॥ ३॥ वाग्भटमा

धववाचस्पतिधर्मव्याडितारपालाख्यान् ॥ अपिविश्वरूपवि
क्रमादित्यनामलिंगानिरुक्तविचार्य ॥ ४॥ कात्यायनवामनचंद्रगो
मिरचितानिलिंगशास्त्राणि ॥ पाणिनिपदानुशासनपुराणका-
व्यादिकंचसुनिरूप्य ॥ ५॥ षट्शतगाथाकोषप्रणयनविख्यात
कौशलेनायं ॥ मेदिनिकरेणकोषः प्राणकरसूनुनारचितः ॥ ६॥
इतिमेदिनिकृतानेकार्थकोषः समाप्तः ॥ ॥ शुभंभव
तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ

॥ इतिमेदिनीकोशः समाप्तः ॥

॥ अथएकाक्षरीकोशः प्रारभ्यते ॥

श्रीगणेशायनमः ॥ ॥ अकारोवासुदेवस्यादाकारस्तुपि
तामहः ॥ पूजायामपिमांगल्ये आकारः परिकीर्तितः ॥ १॥ इकारउच्य
तेकामोलक्ष्मीरीकारउच्यते ॥ उकारः शंकरः प्रोक्तऊकारश्चापिल
क्षणे ॥ २॥ रक्षणेचापिऊकार ऊकारोब्रह्मणिस्मृतः ॥ ऋकारो
देवमातास्यात्ऋकारोदनुजप्रसूः ॥ ३॥ लृकारोदेवजातीनांमाता
सद्भिः प्रकीर्तिता ॥ ॡकारः स्मर्यतेपूर्वैर्जननीशब्दकोविदैः ॥ ४॥ एका
रउच्यतेविष्णुरैकारः स्यान्महेश्वरः ॥ ओकारस्तुभवेत्ब्रह्मा औ
कारोऽनंतउच्यते ॥ ५॥ अंस्याच्चपरमंब्रह्म अः स्याच्चैवमहेश्वरः
॥ कः प्रजापतिरुद्दिष्टो कोर्कवाय्वनलेषुच ॥ ६॥ कश्चात्मनिमयू
रेच कः प्रकाशउदाहृतः ॥ कंशिरोजलमाख्यातं कंसुखंचप्रकी-
र्तितं ॥ ७॥ पृथिव्यांकुः समाख्यातः कुः शब्देपिप्रकीर्तितः ॥ खमिं
द्रियेखमाकाशे खः स्वर्गेपिप्रकीर्तितः ॥ ८॥ सामान्येचतथाशून्ये

खशब्दः परिकीर्तितः॥ गोगणेशः समुद्दिष्टो गंधर्वो गः प्रकीर्तितः॥९
गंगीतं गाश्चगाथा स्यात् गौश्च धेनुः सरस्वती॥ घा घंटाथ समाख्या
ता घो घनश्च प्रकीर्तितः॥१०॥ घंटीशो हनने घर्मे घुर्घोणा घूर्घना
वपि॥ ङकारो भैरवः ख्यातो ङकारो विषयस्पृहा॥११॥ चश्चंद्रमाः
समाख्यातो भास्करे तस्करे मतः॥ निर्मलं छं समाख्यातं तरले छः प्र
कीर्तितः॥१२॥ छेदके छः समाख्यातो विद्वद्भिः शब्दकोविदैः॥ ज-
कारो गायने प्रोक्तो जयने जः प्रकीर्तितः॥१३॥ जेता जश्च प्रकथितः
सूरिभिः शब्दशासने॥ रवौ झकारः कथितो नष्टे झश्चोच्यते बुधैः॥
१४॥ झकारश्च तथा वायौ नेपथ्ये समुदाहृतः॥ ञकारो गायने प्रोक्तो
ञकारो झर्झरध्वनौ॥१५॥ टो धरित्र्यां च करके टो ध्वनौ च प्रकीर्तितः
॥ ठकारो जनतायां स्यात् ठो ध्वनौ च शठेपि च॥१६॥ ठो महेशः समा
ख्यातो ठश्च शून्ये प्रकीर्तितः॥ बृहद्ध्वनौ च ठः प्रोक्तस्तथा चंद्रस्य मंड-
ले॥१७॥ डकारः शंकरे त्रासे ध्वनौ भीमे निरुच्यते॥ ढकारः कीर्ति-
ता ढक्का निर्गुणे निर्धने मतः॥१८॥ णकारः सूकरे ज्ञाने निश्चये नि
र्णयेपि च॥ तकारः कीर्तितश्चौरे क्रोडपुच्छे प्रकीर्तितः॥१९॥ शिलो
च्चये थकारः स्यात् थकारो भयरक्षणे॥ दकारो दात्रे कलत्रे च छेदे दा
ने च दातरि॥२०॥ धं धने स धने धः स्यात् द्विधा तरि मनावपि॥ धि
षधा धीः समाख्याता धूश्चैवं भारवित्तयोः॥२१॥ नेता नश्च समा-
ख्यातस्तरणौ नः प्रकीर्तितः॥ नकारः सौगते बुद्धो स्कंतो हंसे प्रकी
र्तितः॥२२॥ नशब्दः स्वागते बंधौ हस्ते सूर्ये च कीर्तितः॥ पः कुबेरः
समाख्यातः पश्चिमे च प्रकीर्तितः॥२३॥ पवने पः समाख्यातः पः स्या
त्पाने च पातरि॥ कफे वाते फकारः स्यात्तथाऽह्वाने प्रकीर्तितः॥२४॥
फूत्कारेपि च फः प्रोक्तस्तथा निष्फलभाषणे॥ बकारो वरुणः प्रोक्तः
कलशे बः फलेपि च॥२५॥ वक्षस्थले च बः प्रोक्तो गदायां समुदाहृ
तः॥ नक्षत्रे भं बुधाः प्राहुर्भवने भः प्रकीर्तितः॥२६॥ दीप्ति र्भा स्या

च भूर्भूमिर्भीर्भयं कथितं बुधैः॥ मः शिवश्चंद्रमा वेधा मा लक्ष्मीश्च प्रकीर्तिता॥ २७॥ मा च मातरि माने च बंधने मः प्रकीर्तितः॥ यशो यः कथितः प्राज्ञैर्यो वायुरिति शब्दितः॥ २८॥ याने यातरि यस्त्यागे कथितः शब्दवेदिभिः॥ रश्च रामे ऽनिले वन्हौ भूमावपि धनेऽपि च॥ २९॥ इंद्रिये धनरोधे च रुर्भये च प्रकीर्तितः॥ लो दीप्तौ द्यौ लश्च भूमौ भये चाल्हादनेऽपि च॥ ३०॥ लो वाते लवणे चस्या ल्लो दाने च प्रकीर्तितः॥ लः श्लेषे चाशये चैव प्रलये साधनेऽपि लः॥ ३१॥ मानसे वरुणे चैव लकारः सांत्वनेऽपि च॥ विश्च पक्षी निगदितो गगनं प्रतिकीर्तितं॥ ३२॥ शं सुखं शंकरः श्रेयः शश्च सीम्नि निगद्यते॥ शयने शः समाख्यातो हिंसायां शो निगद्यते॥ ३३॥ षः कीर्तितो बुधैः श्रेष्ठे षश्च गंभीरलोचने॥ उपसर्गे परोक्षे च षकारः परिकीर्तितः॥ ३४॥ सः कोपे वरणे सः स्यात्तथा शूलिनि कीर्तितः॥ सा च लक्ष्मीर्बुधैः प्रोक्ता गौरी सा च स ईश्वरः॥ ३५॥ हः कोपवारणे हश्च तथा शूली प्रकीर्तितः॥ हिः पद्यावरणे प्रोक्तो हिः स्याद्धेत्ववधारणे॥ ३६॥ क्षः क्षेत्रे च क्षसि प्रोक्तो बुधैः क्षः शब्दशासने॥ क्षिः क्षेत्रे क्षत्ररक्षे च नृसिंहे च प्रकीर्तितः॥ ३७॥ आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात्॥ एवमेकाक्षरं नामाभिधानं क्रियते मया॥ ३८॥ ॥ ७॥ ॥

इत्येकाक्षरकोशः समाप्तः

श्रीगणेशायनमः॥ ॥श्रीवज्रयोगिन्यैनमः॥ भुजगपतिविमुक्त
स्वच्छनिर्मोकवल्लीविलसितमनुकुर्वन्यस्यगंगाप्रवाहः॥ शिरसिस
रसभास्वन्मालतीदामलक्ष्मींलयतिहिमगौरःसोस्तुवःसाध्यसि
द्ध्यै॥१॥ कल्पावसानसमयेस्थितपेकवीनांदेहांतरंकिमपियासृ-
जतिप्रसन्ना॥ यस्याःप्रसादपरमाणुरपिप्रतिष्ठामभ्येतिकामपित
मामिसरस्वतींताम्॥ २॥ निर्मत्सराःसुकृतिनःखलुयेविविच्यक
र्णेगुणस्यकणमप्यवतंसयंति॥ येषांमनोनरमतेपरदोषवादेतेके
चिदेवविरलाभुविसंचरंति॥ ३॥ मुक्तामयातिमधुरामसृणावदा
तच्छायाधिरागतरलामलसद्गुणश्रीः॥ साध्वीसतांभजतुकंठम-
सौप्रियेवहारावलीविरचितापुरुषोत्तमेन॥४॥ किंनैवसंतिसुधि-
यामभिधानकोशाःकिंतुप्रसिद्धविषयव्यवहारभाजः॥ गोष्ठीषुवा
दपरमोहफलासुकेषांहारावलीनविदधातिविदग्धिमानं॥५॥ एकं
तमेवगणयंतिपरंविदग्धावाचांविदग्धिमनिमज्जतियस्यलोकः॥
गोष्ठीषुयःपरमशाब्दिकदुर्गमासुदुर्बोधशब्दगतसंशयमुच्छिनत्ति
॥६॥ आख्याधशब्दतःश्लोकैरर्धैरातत्तिनात्ततः॥ शब्दाःपादैर्विबोद्ध-
व्याःप्रागनेकार्थतस्ततः॥७॥ ॥ ॥ विषमनयनशंकूचंद्रमौ
लिर्भगाली वृषभगनिगणेशौरेरिहाणोवृषांकः॥ त्रिपुरदहनशूलि
स्थाणुखट्वांगिहिंडिप्रियतमशितिकंठाश्च त्र्यंकल्माषकंठौ॥१६॥
८॥ शतधामाचतुष्पाणिःपृश्निगर्भोगदाग्रजः॥ गदीकौस्तुभव
क्षाश्चपांचजन्यधरोच्युतः ८॥९॥ वैनतेयःपक्षिसिंहःशाल्मली
हरिवाहनः॥ अमृताहरणस्तार्क्ष्योनागाशनखगेश्वरौ ८॥१०॥ ख
गपतंगवियन्मणिभानवोहरिभगेननिदाघकराद्भुतः॥ किरणमालि
विरोचनहेलयोदिनमणिस्तरणिश्चदिनप्रणीः १५॥ ११॥ श्रुतश्रवो
नुजःकोडोमंदश्छायासुतःशनिः॥ सप्तार्चिर्नीलवसनःपातंगिःकू

शिवस्य १६ (८) विष्णोः ८ (९) गरुडस्य ८ (१०) सूर्यस्य १५ (११) शनेश्चरस्य ९ १२

रलोचनः ९॥१२॥ दाक्षायणीपतिवलक्षगुपक्षजन्मतुंगीशरात्रिम
णिदर्शविपक्षधांगः॥राजासमुद्रनवनीततमोनुदोमाग्लौरिंदुरे
णतिलकोहरिरोहिणीशौ १६॥१३॥ महामृगःपुष्करदीर्घमारुतो
विलोमजिह्वोजलकांक्षिसिंधुरौ॥द्विपायिस्तूर्पश्रुतिकुंभिसामजा
महामदःपेचकिपद्मिपीलवः १४॥१४॥दर्वीकरोविषधरः श्वसना-
शनोहिश्चक्रीफणाभरविषायुधदीर्घपृष्ठाः॥कुंभीनसाहिरसनोस
मकोलदंष्ट्रिगोकर्णकुंडलिलनारसनाविषास्यः १६॥१५॥मया
स्योपकृतंपूर्वमयंचोपकरिष्यति॥इतियःक्रियतेसंधिःप्रतीहारः
सउच्यते १॥१६॥शेषमक्षरमादायप्रतिश्लोकंक्रमेणयत्॥अ-
न्योन्यंपठ्यतेश्लोकःप्रतिमालेतिसामता १॥१७॥नभश्चरोवायु
दारुर्वनदोगगनध्वजः॥व्योमधूमोजलमसिःखतमालःपयोधरः
८॥१८॥हर्षादुत्सवकालेयदलंकारांबरादिकम्॥आकृष्यगृह्य
तेपूर्णपात्रंपूर्णानकंचतत् २॥१९॥स्मरतेकर्पादेशेषुयत्रदेशी
यभाषया॥दंपत्योर्जल्पितंमंदंमन्मनंतद्विदुर्बुधाः१॥२०॥ यद्दी
यतेतुदेवेभ्योमनोराज्यस्यसिद्धये॥उपयाचितकंदिव्यदोह
दंतद्विदुर्बुधाः२॥२१॥नक्तंनिर्गत्ययत्किंचिच्छुभाशुभकरंवचः
श्रूयतेतद्विदुर्धीरादेवप्रश्नमुपश्रुतिं २॥२२॥ चूडसूत्र कमित्या
हुरिंद्रतूलंमनीषिणः॥ग्रीष्महासंवंशकफंवाततूलंमरुध्वजं ६
२३॥ दशांधनोगृहमणिःस्नेहाशःकज्जलध्वजः॥जटाज्वालोदशा
कर्षीकथितोबहुदृश्वभिः६॥२४॥ गोमयच्छत्रिकामाहुर्दिलीरंच
शिलींध्रकं॥उर्ध्वगंचवशारोहंगोलासमपरेविदुः६॥२५॥हिमवान्
१हेमकूटश्च१निषधो१मेरु१रेवच॥चैत्रः१कर्णीच१शृंगी१च

चंद्रमसः १६(१३)गजस्य १४(१४)सर्पस्य १६(१५)प्रत्युपकारार्थकृतसमंजसः १(१६)
अंत्याक्षरक्रमेणश्लोकपाठस्य १(१७)मेघस्य ८(१८) हर्षेवस्त्राद्याकर्षणस्य २(१९)
दंपत्योःशनैः कथनस्य १(२०) इष्टार्थंदेवेभ्योदीयमानद्रव्यस्य २(२१)आकाशवाण्याः
२(२२)आकाशउड्डीयमानसूत्रस्य ६(२३)प्रदीपस्य ६(२४)गोमयच्छत्रिकायाः ६(२५)

ससैतेवर्षपर्वनाः।२६॥इतिश्लोकावधिः॥ ॥व्याधोमृगवधाजी
वोनिषादःपुल्कसःप्लवः५॥बालवायजमिच्छंतिवैदूर्यंमणिमुत्त
माः॥२७॥कालग्रंथिःसमाःसंवत्मासमानोयुगांसकः५॥मासोव
र्षांशकःश्रामोवर्षांगःस्यादहर्गणः५॥२८॥मदयोगविधानंतुव्य
स्तारं१करिणांविदुः॥पृष्ठवंशस्यतन्मांसंतल्कानं१तत्सन्वक्षने॥२९
कर्णवेधनिकाप्रोक्तानालिके१तिविषाणिनां॥प्रवेष्ट१मंतःस्वे-
दानांदंतमांसंविदुर्बुधाः॥३०॥कुमारभृत्या१गर्भिण्याःपरिचर्या
भिधीयते॥नवोढावस्त्रमानंदपट२मिच्छंतिसूरयः॥३१॥कर्णी
सुतोमूलदेवोमूलभद्रःकुलांकुरः॥४॥ज्येष्ठामूलीयमिच्छंतिमास
माषाढपूर्वजं१॥३२॥नित्यकर्मसमाचारनिष्ठुरस्त्वेकदुंकला१॥वी
णानुबंधोधीमद्भिरुपनाहो२ऽभिधीयते३३॥स्यात्सालिकाकुंत
लिका२दध्यादिच्छेदनीतुया॥वैशाखोदधिचारःस्यात्तर्कोटःकर
घर्षणः४॥३४॥स्यादाषाढभवोभौमोनवार्चिर्गगनोल्मुकः४॥पं
चार्चिश्चश्रविष्ठाजोज्ञएकांगःप्रहर्षणः५॥३५॥दीदिविर्द्वादशा
र्चिःस्याज्जीवःप्राक्फल्गुनीभवः४॥काव्योदैत्यपुरोधाःस्यात्षोड
शार्चिर्मघाभवः४॥३६॥उपप्लवोकचःकेतुराश्लेषाभवआहिकः५
॥ज्योतीरथोग्रहाधारोध्रुवउत्तानपादजः४॥३७॥स्वर्भानुंग्रहकल्लो
लंविदुरभ्रपिशाचकं३॥वनीयकोयाचनकोवस्कीटोमुखपचः
४॥३८॥जायमानविषाणाग्रेकटाहो१महिषीशिशौ॥छेदोहस्ते
नसस्यानांकटभंग१उदाहृतः॥३९॥जल आजंगमकुटीकावा
रीमूर्द्धकर्परी४॥उष्णवारणमुत्कूटश्चकांगंचपुटोटजं४॥४०मुनी

ससवर्षपर्वतानांप्रत्येकमेकैकं(२६)व्याधस्य५(वैदूर्यस्य१(२७)संवत्सरस्य५मासस्य५
(२८)करिणांमदयोगविधानस्य१गजपृष्ठमांसस्य१(२९)गजकर्णवेधिन्याः१गजदंतमां
सस्य१(३०)गर्भिणीपरिचर्यायाः१नवोढावस्त्रस्य२(३१)ग्रामप्रधानदेवतायाः४ज्येष्ठमा
सस्य१(३२)नित्यकर्माशक्तताया:१वैरानुबंधस्य२(३३)दध्यादिच्छेदिन्याः२दधिमंथनदंड
स्य४(३४)मंगलस्य४बुधस्य५(३५)बृहस्पतेः४शुक्रस्य४(३६)केतोः५ध्रुवस्य४(३७)
राहोः३याचकस्य४(३८)जातशृंगस्यमहिषीशिशोः१हस्तेनसस्यछेदस्य१(३९)जलत्रा
याः४छत्रस्य४(४०)

नींचचिताकुड्यांपर्णाहजसहोदजो २॥ कारोत्तरश्चवीनाहीमहिरंभू
र्जलांधिका ४॥४१॥ जलकूपीजलाष्ठीलीतलकंपुष्करिण्यपि ४॥ अ
सन्नास्तमयःकश्चिदुपधूपित १ इष्यते॥४२॥ तत्क्षणादित्यमुक्तांलुब
दंत्यंगारिणीं १ दिशं॥ अगारितं १ पलाशानांकलिकानिर्गमोभवेत्॥
४३॥ गांधारंरक्तचूर्णंतुसिंदूरंरक्तवालुकं ४॥ कुसृत्याविभवान्वेषीपा
र्श्विकःसंधिजीवकः २॥४४॥ अधश्चरोभवेच्चोरःकुसुमालःकुजंभलः४
प्रोक्तःकरिकुसंभस्तुनागकेसरचूर्णके २॥ ४५॥ वर्बरंवर्बरीकंचव
र्बरीत्यपिचेष्यते ३॥ अभावात्स्त्रीपरित्यागस्तुरगब्रह्मचर्यकं १॥४६
यमिनांयद्व्रतंगोप्यंतत्खंजनतरंविदुः १॥ स्यादाचामनकःप्रोक्तःकट
कोलपतद्ग्रहः ४॥४७॥ मेलामंद्रामसिमणिर्मसिधानीमसिप्रसूः ५
बालोपरीतंतुविदुःपंचावटमुरस्कृतं ३॥४८॥ नारीणांमंडलीनृत्यंबुधा
हल्लीषकंविदुः॥ मारीचोयाजकगजोराजहस्तीमदोत्कटः ४॥ ४९॥ अ
लंकारसुवर्णंयत्तच्छृंगीकनकं १ मतं॥ रतिलक्षंनिधुवनंसंयोजन ३
मितिस्मृतं॥५०॥ जीमूतकुटकुट्टारकुट्टाराःकंदराकरः ४॥ उद्देशोगंड
कूपस्तुपर्वतस्याभिधीयते॥५१॥ वासिताधेनुकाचैववशात्वकारिणी ४
मता॥ अश्वाग्रभूःऋतुपशुःसिंहविक्रांतवाजिनौ ४॥५२॥ समुद्रगा
निर्झरिणीतलोदाजंबालिनीशैवलिनीतरंगिणी॥ विपाठकादंबकपत्र
वाहाःपत्रीरथगोवीरतरोस्त्रकंटकः ७॥५३॥ वर्णदूतःस्वस्तिमुखोले

मुनिचिताकुड्याः २ कूपस्य ४ (४१) पुष्करिण्याः ४ आसन्नास्तमयस्य १ (४२) तत्क्षणा
दित्यमुक्तदिशः १ पलाशकलिकायाः १ (४३) सिंदूरस्य ४ पिशुनस्य २ (४४) दिवाचौ
रस्य ४ नागकेसरचूर्णस्य २ (४५) बर्बरस्य ३ अभावातस्त्रीपरित्यागस्य १ (४६)
यतीनांगोप्यमैथुनस्य १ पतद्ग्रहस्य ४ (४७) मसिधान्याः ५ बालकपरिधान-
वस्त्रस्य ३ (४८ स्त्रीनृत्यस्य १ राजहस्तिनः ४ (४९) अलंकारसुवर्णस्य १ मैथुन
स्य ३ (५०) पर्वतस्य ४ पर्वतोच्चस्थलस्य १ (५१) हस्तिन्याः ४ अश्वस्य ४ (५२
नद्याः ६ शरस्य ७ (५३)

खोवाचिकहारकः ४ ॥ लेखोनिबध्यतेयेनतत्रकाचनकाभिधा ॥ ५४
क्षाराष्ठंमाणिमंथंचविदुःसिंधूपलंबुधाः ३ ॥ पिशितंपललंमांसंक्र
व्यमामिषमुद्दसं ६ ॥ ५५ ॥ पारावारमहाकच्छौमहीप्राचीरदारदौ ॥ ४
जिह्मादरःकीकशास्यश्चंचुमत्तरुशायिनौ ४ ॥ ५६ ॥ इंद्रक्रीडास
रःप्राज्ञैर्नंदीसर १ इतिस्मृतं ॥ ५७ ॥ धूमोर्णापतिरुद्दिष्टोयमोम
हिषवाहनः ३ ॥ ५७ ॥ पयोघनोमेघकफोघनोपलोमेघास्थिबीजो
दकतोयडिंभाः ६ ॥ शंपाचिराभाचपलाछटाभाह्रादिन्यधीरा-
घनवल्लिकाच ॥ ७ ॥ ५८ ॥ पादालिंदीतरंडा नौस्तरणिस्तारणि
स्तरिः ६ ॥ किलाटः शोषितक्षीरपिंडःस्यूरिभिरिष्यते ॥ ५९ ॥ का
लायसमयस्तीक्ष्णंगिरिसारंचशस्त्रकं ५ ॥ ह्रय्यंगवीनंसरजंमंथजं
चकलंबुटं ४ ॥ ६० ॥ एकशफांघ्रिकंबंधमाहुर्दामांचलंबुधाः ॥ वे
तास्त्रीपुंसयोश्चिह्नंसामुद्रिक १ उदाहृतः ॥ ६१ ॥ निंतिलीकाऽस्थि
भिर्द्यूतक्रीडायांचुंचुलि २ र्भवेत् ॥ वक्रालललाटगास्तिस्त्रो भस्मरे
खास्त्रिपुंड्रकं ३ ॥ ६२ ॥ हालाकामालिकामंडाधीरास्यात्मदनी
चमाध्वीच ६ ॥ आहुश्चषकंतुपानपात्रंपारीमप्यनुतर्षणंकवी
द्राः ॥ ६३ ॥ कुस्तुंभःकरकश्चैत्यमुखःकमंडलुः ४ स्मृतः ॥ असहा
योनर्तकश्चतालावचर १ इष्यते ॥ ६४ ॥ कथितःकौमुदीवृक्षोदीप
वृक्षःशिखातरुः ३ ॥ कोजागरेतथासद्भिःकौमुदीचार २ इष्यते ॥ ६५

लिखनपत्रस्य ४ पत्रीबंधनस्य १ (५४) सैंधवलवणस्य ३ मांसस्य ६ (५५) समुद्र
स्य ४ पक्षिणः ४ (५६) इंद्रक्रीडासरसः १ यमस्य ३ (५७) मेघप्रस्तरस्य ६ विद्युतः
७ (५८) नौकायाः ६ शोधितक्षीरपिंडस्य १ (५९) लोहस्य ५ नवनीत स्य ४ (६०)
एकखुरयुक्तचरणाबंधनस्य ३ स्त्रीपुरुषचिन्हवेत्तुः १ (६१) अस्थिभिर्द्यूतक्रीडा
याः २ ललाटस्थभस्मरेखायाः ३ (६२) सुरायाः ६ पानपात्रस्य ४ (६३) कमंडलोः ४ अ
सहायनर्तकस्य १ (६४) दीपवृक्षस्य ३ कोजागरायाः २ (६५)

समुद्रगृहमित्याहुर्जलयंत्रनिकेतनं २॥ प्रेतादिभिर्गृहीतोयः सआविष्टो १त्रमन्वहिः॥६६॥ हिममिंद्राग्निधूमश्चखबाष्पोरजनीजलं ४॥ ये-शिवायतनोत्सृष्टास्तेसंध्याबलयो३वृषाः॥६७॥ विषाक्तास्त्र हत स्याहुः पशोर्मांसंतुगृंजनं १॥ धूमिकाधूममहिषीहिमझ्झटिः कुहेलिका४॥६८॥ पोताच्छादनमाहुस्त्रवरकमथवस्त्रकुट्टिमंकवयः॥ तं त्रविमुक्तंवासोनिष्प्रवर्णिनिष्प्रवाणि १ च॥६९॥ महाघोषं क्रयारो हहट्टंपण्याजिरं ४ विदुः॥ बहुमानुषसंकीर्णंनिर्घंटंचकरांगणं २॥ ७०॥ शालभंजीदारुगर्भाकुरंटीदारुपुत्रिका ४॥ कादंबिनीनवोमेघः कालीस्यात्कालिका ३ पिच॥७१॥ क्रोशध्वनिः क्रोशतालोढक्का विजयमर्दलः ४॥ स्यात्प्रतिपत्तिः पटहोलंपापटह ३ इत्यपि॥७२॥ कुकूलंकायवलनंतनुत्रंदंशनं ४ विदुः॥ शिरस्त्रंशीर्षरक्षंचशीर्षण्यं शीर्षकं ४ चतत्॥७३॥ स्याज्जालिकालोहमयीजालप्रायांगरक्षिणी २॥ पन्त्रंध्रीपादविरजाः कोशीपादरथी ४ भवेत्॥७४॥ रुचकंलवणंस्वारंतीक्ष्णंजलरसं ३ विदुः॥ ज्योतिर्बीजंचखद्योतंध्वांतोन्मेषंतमोमणिः ४॥७५॥ जलसूकरजलजिह्वोजलकंटकवार्घटोतथानक्रे ५ ॥ जलनकुलजलबिडालोनीराखुजलप्लवावुद्रे ५॥७६॥ शिशुमारो जलकपिश्चपलांगोऽसिपुच्छकः ४॥ ग्राहोजलकिराटश्चनक्रराजो जलाटकः ४॥७७॥ मृतकांतकश्चभीरुर्वृकधूर्तशयालुवंचकाभ

जलयंत्रार्थगृहस्य २ प्रेतादिगृहीतस्य १ (६६) हिमस्य ४ शिवालयोत्सृष्टवृषस्य ३ (६७) विषाक्तास्त्रहतपशुमांसस्य १ कुहेलिकाया ४ (६८) पोताच्छादनस्य ३ तंत्रविमुक्तवाससः १ (६९) हट्टस्य ४ बहुनरसंकीर्णहट्टस्य २ (७०) काष्ठपुत्तलिकायाः ४ नूतनमेघजालस्य ३ (७१) ढक्कायाः ४ पटहस्य ३ (७२) वस्त्रांगरक्षिण्याः ४ शिरस्त्राणस्य ४ (७३) लोहवर्मणः २ उपानहः ४ (७४) क्षारलवणस्य ३ खद्योतस्य ४ (७५) नक्रस्य ५ उद्रस्य ५ (७६) शिशुमारस्य ४ ग्राहस्य ४ (७७)

रुजः ७॥ शालामृगोस्थिभस्सोग्राममृगोमंडलः कपिलः ५॥७८॥ उल्का
मुखी श्रृगालीयादी स्तजिह्वे १ निसामता॥ स्कंधवाहस्तुशंकश्च शृंगी
गोरक्षधूर्जिलः ५॥७९॥ हेरंबः कासरश्चैव रक्ताक्षः सैरिभ ४ स्तथा॥
रोमशो बहुरोमास्यादुरणश्च पृथूदरः ४॥ ८०॥ इडिक्कस्तु बालवा
ह्यावनछागोतिरोमशः ४॥ वरणो धूम्रशूकः स्याद् उष्ट्रः शृंखलक ४
स्तथा॥८१॥ वक्रमुखः सूचिरोमा वराहः स्थूलनासिकः ४॥ कंठी
रवस्तु पारींद्रः केसरी गजमाचलः ४॥८२॥ नेत्रपिंडो वृषाहारो मेना
दः कुंदम ४ स्स्मृतः॥ गंधाखुर्गंधनकुलश्चुंचुःपुंचुष ४ उच्यते॥८३॥
द्रोणारिष्टो नालिजंघ आत्मघोषस्तु मोद्गलिः ५॥ गोपंडीरः पंककीरो
हापुत्रीराज भट्टिका ४॥८४॥ गंगाचिल्लीतुंदेवट्टीविश्वकाजलकु-
कुटी ४॥ विट्सारिकातुकुणपी गोराटी गोकिराटिका ४॥८५॥ मृगां
द्रचटको घातिपक्षी ग्राहकमारको ४॥ कुलालंकुक्कुटं प्राहुः कुक्कुभं
कुहकस्वरं ४॥८६॥ कर्कराक्षः कलाटीनः खंजलेखस्तु खंजनः ४
प्रासादकुक्कुटो रक्तकंठो गृहकपोतकः ३॥८७॥ ध्वांक्षपुष्टः कल
कंठो मधुकंठः कुहूमुखः ४॥ झंपाशी मत्स्यरंकः स्याज्जलमद्गुर्मणी
चकः ४॥८८॥ कलविंकश्चित्रपृष्ठो गृहनीडो वृषायणः ४॥ बरडा-
चित्रपादा च चित्रनेत्रा च सारिका ४॥८९॥ मयूरश्चटको दक्षः कृकवा
कुर्निशाकरः ४॥ शतपत्रः सितापांगः प्रचलाकी च चंद्रकी ४॥९०॥

शृगालस्य ७ शुनः ५ (७८) उल्कामुखी शृगाल्याः १ शकटादिवाहकवृषभस्य ५ (७९)
महिषस्य ४ मेषस्य ४ (८०) बृहद्वानरस्य ४ उष्ट्रस्य ४ (८१) वराहस्य ४ सिंहस्य ४
(८२) विडालस्य ४ छुछुंदर्याः ४ (८३) दग्धकाकस्य ५ हापुत्र्याख्यपक्षिणः ४
(८४) गंगाचिल्ल्याः ४ विट्सारिकायाः ४ (८५) श्येनस्य ४ वनकुक्कुटस्य ४ (८६)
खंजरीटस्य ४ कपोतस्य ३ (८७) कोकिलस्य ४ मत्स्यरंगस्य ४ (८८) कलविंक
स्य ४ सारिकायाः ४ (८९) ग्रामकुक्कुटस्य ४ मयूरस्य ४ (९०)

किसलयमपित्तरुरागंविदुर्लतायावकंप्रवालंच ४॥ कंटकसंज्ञास्त्तरुनखसितायदलसूचिराकिलद्रुमराः ६॥९१॥ द्रोणीदलःसूचिपुष्पोजंबूलःक्रकचच्छदः४॥ मंडातिष्यफलाधात्रीवल्यापंचरसाशिवा ६॥९२॥ सहस्रवीर्याविरजाभार्गवीमंडलीरुहा ५॥ प्रहर्षिणीनिशा-ह्वाचलसागंधपलाशिका ४ ॥९३॥ मृदुपुष्पःशूकतरुःशिरीषोविषनाशनः ४॥ वराहकालीकथितःसूर्यावर्त२स्तुत्रशाब्दिकैः ॥९४॥ वज्रवल्यस्थिसंहारोहस्तिशुंडीवनालिका ४॥ वनतिक्तस्त्रियांश्रीष्मातिरीटःपक्षस्फंदरः ३॥९५॥ मधुपुष्पोमधूकश्चगुडपुष्पोमधुद्रुमः४॥ वृत्तपुष्पःप्रावृषेण्योहारिद्रस्तुहलिप्रियः ४॥ ९६॥ एलात्वचिस्रगंधाचपुटिकाचर्मसंभवा ४॥ कूष्मांडकःपुष्पफलोघनवासश्चवेष्टकः४॥ ९७॥ वेषणः कासमर्दश्चपत्रोपस्कर ३ इत्यपि ॥ ओकोदशालीप्राचीरमोघोलिरवहालिका ५॥९८॥ कल्यवर्त्तःप्रातराशःप्रातर्भोजनमिष्यते ॥ शृगालिकाचडिंबंचडमरंविद्रवो ४पिच॥९९॥ स्कंधफलःस्युतुंगश्चनारिकेलःपुटोदकः४॥गुडदारुर्मधुतृणमसिपत्रोमहारसः४॥१००॥ राजालुकोमहाकंदोमूलकोहस्तिदंतकः४॥ क्षुद्ररसातिक्तगुंजासरघाविद्रूपर्कटी ४॥१॥ क्षुद्रपत्राचचांगेरीक्षुद्राम्लाचाम्ललोणिका ४॥ प्राचीनामलकंरक्तंबदरामलकं ३तथा ॥२॥ पिष्टसौरभमेकांगंश्रीखंडमालयं ४विदुः॥ मृगनाभि

नूतनपल्लवस्य ४ वृक्षकंटकस्य ६ (९१) केतकस्य ४ धात्र्याः ६ (९२) दूर्वायाः५ गंधपलासिकायाः ४ (९३) शिरीषस्य ४ सूर्यावर्त्तस्य २ (९४) अस्थिसंहारस्य ४ लोध्रस्य ३ (९५) मधूकवृक्षस्य ४ कदंबस्य ४ (९६) एलायाः ४ कूष्मांडस्य ४ (९७) कासमर्दस्य ३ भित्तेः ५ (९८) प्रातर्भोजनस्य ३ भीत्यापलायनस्य ४ (९९) नारिकेलस्य ४ इक्षोः ४ (१००) मूलस्य ४ करंजस्य ४ (१०१) आम्ललोनिकायाः ४ प्राचीनामलकस्य ३ (१०२) श्रीखंडस्य ४ (१०३)

मृगमदोगंधशेखर ३मित्यपि ॥३॥ सिताभ्रंतरुसारंचवेरकंरसके
सरं ४॥ कालेयंवंशकंजोंगंकालीयंवरचंदनं ५॥४॥ तृणसारामृत्यु
फलारंभाचकदली ४भवेत् ॥ ऊर्ध्वासितः परारुस्यात्तथाराजपटो
लकः ३॥५॥ कुंकुमंपीतकावेरंघुसृणंकुसमात्मकं ४॥ अरकोजल
केशश्चकावारंशैवलं ४विदुः॥६॥ उन्मत्तकाहलापुष्पौ हृहत्पाट
लिघांटिकौ ४॥ किंशुकः करकःपर्णीलाक्षावृक्षः समीरवः ४॥७
॥ अमंडपंचांगुलवर्धमानागंधर्वहस्तस्त्रिपुटीफलं ५श्च॥ रेणुः
सतीलस्तृणकेतुमृत्युबीजोकिलाटीचततःसपर्वा ६॥८॥ कच-
मालोमरुद्वाहोधूमोमंभः शिखिध्वजः ५॥ शाखानगर १माहुस्त-
द्यदभ्यर्णपुरांतरं ॥९॥ आहुर्जलकरंकंश्चजलजंसूचिकामुखं
३॥ उपजिह्विकोसादिकाचवटिरुद्देहिकादिवी ५॥१०॥ शुल्बमौ
दुंबरंरक्तंम्लेच्छास्यंताम्रकं ५विदुः॥ दुर्नामादीर्घकोषीस्यात्सेक
शुक्तिःसितालिका ४॥ ११॥ आकाशमूलीकुतृणंकुंभिकाजलव
ल्कलं ४ ॥ शंबूकोजलडिम्बःस्याद्दुश्चरःपंकमंडुकः ४॥१२॥ आ
टीलकं१ तर्णकानांस्थलीसक्रीडनंमतं ॥ यष्टिःशब्दवतीधीरैःखे
खीरक १इतिस्मृता ॥१३॥ लेखात्रयांकितंभालंत्रिपताकं१विदुर्बु
धाः ॥ अर्धचंद्रंकर्करेटंविदुरंगुलितोरणं ३॥ १४॥ सिद्धजलंच-
गृहाम्लमवंतिसोमंतुषोदकंशक्तं ५॥ नग्नाटकनिर्ग्रंथकभदंत-

कस्तूर्याः ३(१०३) कर्पूरस्य ४ अगुरुइतिख्यातस्य ५(४) कदल्याः ४ पटोलस्य ३(५)
कुंकुमस्य ४ शैवलस्य ४ (६) धूस्तूरस्य ४ पलाशस्य ४ (७) एरंडस्य ५ वंशस्य ६(९)
धूमस्य ५ नगरांतिकपुरस्य १ (९) शंखस्य ३ उपजिह्विकायाः ५(१०) ताम्रस्य ५ पंक
शक्तेः ४ (११) कुंभिकायाः ४ शंबूकस्य ४ (१२) तर्णकक्रीडनस्य १ शब्दवतीयष्ट्याः
१(१३) लेखात्रयांकितभालस्य १ गलेहस्ताधानस्य ३(१४) कांजिकस्य ५

दिगंबरकानग्ने ५॥१५॥ करपात्रंजलक्रीडाव्यात्युक्षीकरपत्रिका ४ ॥ शराणांपत्ररचनापत्रणा १ परिकीर्तिता ॥१६॥ पंचभद्राहया १ स्तेयेपंचस्वंगेषु पुष्पिताः ॥ यश्वारकोमुहृमुजांसस्याद्वल्लभपालकः १॥१७॥ निगालस्थोयआवर्त्तःसहिदेवमणिः १ स्मृतः ॥ तथावक्षसिवाहस्यश्रीवृक्षक १ उदाहृतः ॥१८॥ बंधःपलाशपत्राणां-शीर्षेपत्रपिशाचिका १॥ स्फवसंतक १ शब्देनउच्यतेमदनोत्सवः ॥१९॥ कर्वटं १ द्विशतग्राममध्येग्राममनोहरं ॥ तथाचतुःशतग्राममध्येद्रोणमुखं १ विदुः ॥२०॥ यद्यात्रामंगलंसामतदप्रतिरथं १ विदुः ॥ शालाप्रासादशिखरेचंद्रशालेति १ कीर्तिता ॥२१॥ ॥ इत्यर्धश्लोकावधिः ॥ ॥ तलिनंतुच्छ २ मित्याहुर्गृहाश्मा-गृहकच्छपः २॥ खसंचारिपुरंसौधं १ रथ्यापांशुकुली २ भवेत् ॥ एकनटःस्यात्कथको २ भंडश्चाटुपटुः २ स्मृतः ॥ मक्षिकाभस्मराली २ स्यात्पांशुरोदंशकः २ स्मृतः ॥२३॥ देवोद्यानंतुवैभ्राजं २ दीपाली दीपशृंखला २॥ स्फकुमारेपिसोमालं २ विषमेस्थपुटं २ विदुः ॥२४॥ द्रुणहःखड्गपिधानं २ सारिणीचप्रणालिका २॥ यज्ञस्थानंयज्ञवाट २ स्तृष्णाधनपिशाचिका २॥२५॥ स्मृताबाल्वंगिरिर्वारुः २ स्फु

दिगंबरयोगिनः ५ (१५) जलक्रीडायाः ४ शरपत्ररचनायाः १ (१६) पंचकल्याणघोटकस्य १ अश्वचारकस्य १ (१७) अश्वगलोद्देशस्थावर्तस्य १ अश्ववक्षःस्थावर्तस्य १ (१८) पलाशपत्राणांशीर्षेबंधस्य १ मदनोत्सवस्य २ (१९) द्विशतग्राममध्यग्रामस्य १ चतुःशतग्राममध्यग्रामस्य १ (२०) यात्राकालेसामवेदपाठस्य १ प्रासादशिखरस्थशालायाः १ (२१) तुच्छस्य २ पेषणशिलायाः २ सौधस्य १ राजमार्गस्य २ (२२) कथकस्य २ भंडस्य २ मक्षिकायाः २ दंशस्य २ (२३) देवोद्यानस्य २ दीपावल्याः २ सुकुमारस्य २ विषमस्य २ (२४) खड्गपिधानस्य २ जलनिर्गममार्गस्य २ यज्ञस्थानस्य २ लोभस्य २ (२५) इर्वारोः २ (२६)

टिरिर्वारुशफक्तिका २॥ नादाम्नस्तिमिषः सेटुः ३ कोमासिकातुजालिका २॥ २६॥ पुंजातुकः फलेलाकु २ स्तूणताधनु २ रिष्यते॥ कैरातो दोर्ग्रहस्तामाः ३ सिंघाणंकाचभाजनं २॥ २७॥ दर्वटो दंडवादी २ स्यात्स्तेनः शंकितवर्णकः २॥ प्रारब्धिः करिबंध २ स्स्यात्कष्टस्थानंतुवारकं २॥ २८॥ भोगावलीबंदिपाठः २ सेतुः पूरणपिंडलो ३॥ देवद्रोणीदेवयात्रा २ शूनाधोजिह्विका २ मता॥ २९॥ पालिः समुत्थितश्मश्रु २ र्मोरुंडोच्चललाटिका २॥ राका १ दृष्टरजाः कन्यापोटा १ स्त्रीपुंसलक्षणा॥ ३०॥ महत्तरोग्रामकूटो २ मर्म्मरो १ ऽव्यक्तनिःस्वनः॥ शिवालयः पितृवनौ चिताकाष्ठमठी चितिः ३॥ ३१॥ कर्णवंशो भवेन्मंच: २ श्रीग्रहः शाकुनिप्रपा २॥ तांबूलदोवागुलिकः २ स्फरभिः फाल्गुनानुजः २॥ ३२॥ तांबूलरागो मस्फर २ स्तरुवारिः क्षपाणकः २॥ स्वागतं कुशलप्रश्नः २ सामीचीवंदना २ मता॥ ३३॥ समुद्गः संपुटो २ ज्ञेयो हयस्कंधो हयच्छटा २॥ पिंडाशो महिषीपाले २ मसूरेच गभोलिकः २॥ ३४॥ काहली तरुणी २ प्रोक्ता छुरा तु कथिता स्नधा २॥ कांपिल्लिकारोचनिका २ कालिका वस्करांटिका २॥ ३५॥

स्फुटेः २ नादाम्नस्य ३ जालिकायाः २ (२६) जीवनवृक्षस्य २ धनुषः २ बलवत्पुरुषस्य ३ काचभाजनस्य २ (२७) दंडवादिनः २ चोरस्य २ गजबंधनस्तंभस्य २ कष्टस्थानस्य २ (२८) बंदिपाठस्य २ सेतोः ३ देवयात्रायाः २ उलूखलादिपंचशूनायाः २ (२९) सश्मश्रुस्त्रियाः २ उच्चललाटस्त्रियाः २ दृष्टरजःकन्यायाः १ पुंसलक्षणायाः १ (३०) महत्तरस्य २ अव्यक्तशब्दस्य १ स्मशानस्य २ चितायाः ३ (३१) मंचस्य २ पक्षिणः पानीयशालायाः २ वसंतकालस्य २ तांबूलदातुः २ (३२) तांबूलरागस्य २ खड्गस्य २ कुशलप्रश्नस्य २ स्तुतेः २ (३३) संपुटस्य २ हयस्कंधस्य २ महिषीपालस्य २ वृहन्मसूरस्य २ (३४) तरुण्याः २ लेपनद्रव्यस्य २ रोचनिकायाः २ वृश्चिकायाः २ (३५)

कालिकाक्षीरकीटः स्यात्खंडपालस्तु खांडिकः२॥ पांशुरः पीठसर्पी २ स्यादुल्ललोरोमशः२ स्मृतः॥३६॥ पूगपात्रे फरुवकं२ कबंधोरुंड २ मुच्यते॥ तूलिकास्यान्नवतिका२ स्त्यानमालस्य२ मुच्यते॥३७॥ भाजनेकमठं प्रोक्तं पुण्यश्लोकोनलो२ मतः॥ गौरवे प्रतिपत्तिः२ स्याद्धारिः पथिकसंहतिः२॥३८॥ यामकिन्यपियामिस्त्री२ हाफिकाचोपपुष्पिका२॥ वातपुत्रेविटधरौ३ निर्माल्यं निर्मलं२ मतं॥३९॥ इंद्रासनेमतागुंजा२ गुलुंचोगुच्छको२ मतः॥ भोगावासोवासगृहं२ मेंठो हस्तिपकः२ स्मृतः॥४०॥ मायुःपलाग्निःपललंज्वरः स्यादजीर्ण-मंत्रं धमिरामयश्च॥ तृप्तिश्चसौहित्यमुदंनिका३ स्यात्क्षुत्सारिका भोगपिशाचिका३च॥४१॥ मोगोजलवरंटः२ स्यात्कणाकुंभीरमक्षिका२॥ वहलंवार्बटः पोत३ स्तरालुश्चाहिपुत्रकः२॥४२॥ काहलस्तुमहानादो२ मार्दंगंपत्तनं२ विदुः॥ स्यादरित्रंतरिरथः२ पात्रपालस्तुलाधटः२॥४३॥ काकिनीपणतुर्यांशे१ ज्वलदंगारउल्मुकं१॥ अयानंचस्वभावः२ स्यान्मंजिकावारसंदरी२॥४४॥ नीलमणिर्मसारः२ स्याद्गुंजापाठहिका२ मता॥ भार्यापाणिगृहीतीचदुकूलं-

---

क्षीरकीटस्य२ मोदकस्य२ खंजनघोटकस्य२ बहुरोमयुक्तस्य२ (३६) पूगपात्रस्य२ कबंधस्य२ चित्रलेखिन्याः२ आलस्यस्य२ (३७) पात्रस्य२ नलराज्ञः२ गौरवस्य२ पथिकश्रेण्याः२ (३८) यामिकस्त्रियाः२ जृंभायाः२ महाधूर्तस्य३ निर्माल्यस्य२ (३९) गांजेतिप्रसिद्धस्य२ गुलुंचस्य२ वासगृहस्य२ हस्तिपकस्य२ (४०) पित्तस्य३ अंत्रस्य४ तृप्तेः३ क्षुधायाः३ (४१) जलवसंतारव्यव्रणस्य२ कुंभीरमक्षिकायाः२ पोतस्य३ नौकाजलोत्सारकस्य२ (४२) बृहत्दक्कायाः२ मृदंगस्य२ अरित्रस्य२ तुलाधटस्य२ (४३) पणचतुर्थांशस्य१ ज्वलदंगारस्य१ स्वभावस्य२ वेश्यायाः२ (४४) नीलमणेः२ गुंजायाः२ भार्यायाः२ (४५)

क्षोम२मुच्यते ॥ ग्रंथस्यनिर्मितोशय्योवधूटीवधुटीजनी २॥ बंदिचो
रोमान्चलः२ स्यात्कुंभिलः संधिहारकः२॥ ४६॥ अभ्रमु१ स्त्वभ्रना
गस्यकुमुद्वस्य तुपिंगला १॥ अंगना१ वामनस्यस्यादंजनस्यांजनाव
ती१॥ ४७॥ कपिला पुंडरीकस्यानुपमा १स्रुप्रतीकस्य ॥ शेषस्यता-
म्रकर्णीविशाप्यदंती१ सार्वभौमस्य ॥ ४८॥ सेवाचाटूक्तिरालोकोः२
मठो गंत्री रथः स्मृतः॥ चिपिटोधान्यचमसः २स्फाविकालाजउत्तुषः
३॥ ४९॥ अभ्यासोगुणनीयः२ स्यान्मादिः पत्रशिरा२मता ॥ भौतोदे
वलकः ख्यातः खेटकंवसुनंदके २॥५०॥ पुरंदरातुस्फरला२ कावे
रीचार्धजान्हवी २॥ कौमुदः कार्तिकोमासः२ सौभिकस्त्विंद्रजालि
कः२॥ ५१॥ प्रहेलकंवाचनकं२ वीक्षापन्नः सविस्मयः२॥ कुटलं
पटलंनीव्रं ३वीथीगृहतटी२मता॥५२॥ सर्ववेशीनटः प्रोक्तो२ मंदा
क्षंतुनदांतिका२॥ मृस्फलीकुठिकः२ प्रोक्तः शालूरोवृष्टिभूः प्लुवः३
॥५३॥ स्वेदः सिप्रस्तनुरस३स्त्वक्पुष्पं तुस्वंगकुरः२॥ नवोढानववरि
का२ दिक्करीनवयौवना ॥ ५४॥ सौवर्चलेचरुचकं२हिंगुलेरक्तपा
रदम् २॥ रक्तोपलंगैरिकेच २पारदेसूतकं२विदुः ॥५५॥ साधूकः

षट्पदस्य२ (४५) ग्रंथनिर्माणस्य१ नवीनस्नुषायाः२ वंदिचौरस्य२ संधिहारक
स्य२ (४६) ऐरावतदिग्गजपत्न्याः१ कुमुददिग्गजपत्न्याः१ वामनदिग्गजस्त्रियः१
अंजनदिग्गजस्त्रियः१ (४७) पुंडरीकदिग्गजस्त्रियः१ स्रुप्रतीकदिग्गजस्त्रियः
१ पुष्पदन्तदिग्गजपत्न्याः१ सार्वभौमदिग्गजपत्न्याः१ (४८) सेवनस्य३ शकट
स्य२ चिपिटस्य२ लाजानां३ (४९) अभ्यासस्य २पत्रभंगस्य२ भूतसेवक
स्य२ धनवृद्धिजीवकस्य २(५०) गंगायाः२ कावेर्याः२ कार्तिकमासस्य २इंद्र
जालिकस्य२ (५१) प्रहेलिकायाः२ विस्मितस्य२ समूहस्य३ वीथ्याः२ (५२) नटस्य२
लज्जायाः२ कुष्ठारव्यौषधस्य२ भेकस्य३ (५३) स्वेदस्य२ रोमांचस्य२ नवोढायाः
२ नवयौवनायाः३ (५४) सौवर्चललवणस्य२ हिंगुलस्य२ गैरिकस्य२ पारदस्य२ (५५)

कंबलः २ स्यात ईर्मा व्रणः ३॥ कपटः पारिहार्यः स्या २ दीर्ष्यालुः कुहनः २ स्मृतः ॥५६॥ ऋणमोक्षे विगणनं २ लग्नके ऋणमार्गणः २॥ भिक्षाशिल्वं तु पैशून्यं २ मंडः पिच्छांधस ३ स्तथा ॥५७॥ वायुकेतुः क्षितिकणः स्यादास्फाले झलज्झला १२॥ नष्टासिसूत्रे लोप्त्रं स्याद्याप्ययानं शिबीरथः २॥५८॥ मल्लयात्रा माल्लवा स्या २ न्निर्भर्त्सनमलक्तकः २॥ कोशलिका प्राभृतक २ मट्टकल्लासकं २ विदुः॥५९॥ स्वदोषाच्छादनं मक्ष २ श्चूल्ली स्यान्मलकारिका २॥ वानाश्वो भूमिपक्षः २ स्याद्धारुर्विजयकुंजरः २॥६०॥ प्रभाते गोसगो सर्गौ ३ वंजनी लेपकामिनी २॥ उत्कटो गंडकुस्फमं २ सिद्धः सौमेधिको मतः २॥६१॥ वृषाकपिः शिखी शुष्मा ३ भस्म पार्घटमर्घटं ३॥ उष्ट्रवाही मीरथो ऽयुष्ट्रांगं त्रीलघ्वी हि वेशरा ३॥६२ कृषणः कृमिरुद्दिष्टः २ शकृत्कीटे ऽन्यकारुका ३॥ भारवाहो भारिकः स्या २ त्स्कंधचापो विहंगिका २॥६३॥ उन्नतो ऽजगरः २ प्रोक्तो द्विमुखाहिरहीरणिः २॥ पुरोटिः पुरसंस्कारे २ हट्टी पुरतटी २ मता ॥६४॥ मृणालिनी पुटकिनी २ स्यात्सको बुद्बुदो भवेत् ॥ क-

---

कंबलस्य २ व्रणस्य ३ कटकस्य २ ईर्ष्यायुक्तस्य २ (१५६) ऋणमोक्षस्य २ लग्नकस्य २ पैशून्यस्य २ मंडस्य २ (५७) धूलेः २ आस्फालस्य २ चौरनीतद्रव्यस्य किंचित्प्राप्तेः २ शिबीरथस्य २ (५८) मल्लयात्रायाः २ निर्भर्त्सनस्य २ प्राभृतकस्य २ अट्टालिकायाः २ (५९) स्वदोषाच्छादनस्य २ चुल्याः २ वातापश्वस्य २ विजयकुंजरस्य २ (६०) प्रभातस्य ३ लेप्यकामिन्याः २ संजातमदस्य हस्तिनः २ सिद्धस्य २ (६१) अग्नेः भस्मनः ३ उष्ट्रयुक्तरथस्य २ लघुरथस्य ३ (६२) कृमेः २ विष्ठायाः २ भारवाहस्य २ वंशादिनिर्मितशिक्याधानस्य २ (६३) अजगरसर्पस्य २ द्विमुखसर्पस्य २ पुरसंस्कारस्य २ क्षुद्रहट्टस्य २ (६४) पुटकिन्याः २ बुद्बुदस्य २ (६५)

लाचीतुप्रकोष्ठःस्या २ द्धस्तपुच्छस्तकन्युषं २॥ ६५॥उत्साहःसू
त्रनंतुः २ स्यात्सिंडीरोनीरसः २ स्मृतः॥हरिणहृदयो भीरुः२ संदेशो
क्तिस्तवाचकं २॥ शालाजिरोवर्धमानं २ कुसीदंतु कलांबिका।२
चर्वातलप्रहारः २ स्यात्कर्करं २ मुद्गरंविदुः॥ ६७॥गोष्ठागारेऽपि
गंजः २ स्याच्चिंतावेश्मनिदार्वटं २॥ मानग्रंथिर्भवेन्मंतुर्निष्कुटो-
गृहवाटिका २॥ ६८॥ शैलस्यकटकेदंत २ स्तद्दिनंप्रतिवासरं २॥
सूत्रमेवसूत्रनंतुः २ कृशराऽपितिलौदने ॥२॥ ६९॥ स्यादासवोपि
कुरसः २ सरकंमद्यभाजने २॥ निश्चुकूर्णंदंतशाणं २ गोग्रंथिः
श्लक्ष्णगोमये।२॥७०॥अष्टापदंनयपीठी २ नय स्तज्जतुपुत्रकः
२॥ बिंदुतंत्रोभवेदक्षः पांचाली शालिशृंखला २॥ ७१॥ प्रस्ता
रस्तलिनंशय्या ३ रोमगुच्छःप्रकीर्णकं २॥ शिवालोपाशिका २ज्ञे
यासरमातुंबरीशुनी ३॥ ७२॥ पादांगदी हंसकः २ स्यात्प्रतिकर्म
प्रसाधनं॥ कर्णपालीतुकर्णाट्टू २ रंगुलीयकमूर्मिका २॥ ७३॥
खातभूःप्रतिकूपः २ स्याल्लंभास्याद्वाटशृंखला २॥ कंधरातोरणं
कंठी ३ सूत्रालीगलमेखला २॥ ७४॥ शासनंधर्मकीलः २ स्या-

विस्तृतकरस्य २ हस्तपुच्छस्य २ (६५) उत्साहस्य २ रसभून्यस्य २ भयशीलस्य २ संदे
शवाक्यस्य २ (६६) शरावस्य २ कुसीदस्य २ तलप्रहारस्य २ मुद्गरस्य २
(६७) गोष्ठागारस्य २ मंत्रणागृहस्य २ अपराधस्य २ गृहवाटिकायाः
२ (६८) शैलनितंबस्य २ प्रतिवासरस्य २ सूत्रस्य २ सतिलौदनस्य २ (६९)
मदिराभेदस्य २ मद्यभाजनस्य २ दंतशाणस्य २ श्लक्ष्णगोमयस्य २ (७०) शारिफलस्य २
गुटिकायाः २ पाशकस्य २ शारिशृंखलायाः २ (७१) शय्यायाः ३ चामर-
स्य २ शृगाल्याः २ कुक्कुरस्त्रियः ३ नूपुरस्य २ (७२) वेषस्य २ ताटंकस्य २
अंगुलीयकस्य २ (७३) परिखायाः २ वाटशृंखलायाः २ कंठ्याः ३ गल-
सूत्रस्य २ राजशासनस्य २ (७५)

स्त्कृतंभूद्रशासनं २॥ पट्टोलिकाक्रूसकीला २सिंदुरंरक्तशासनं २॥७५॥ रासस्तुगोदुहांक्रीडा २गीतिःपारावती २तथा॥ वेणु र्यवफलोवंशो ३नवीनेनवकालिका २॥७६॥ मुखघंटाकुलकु ली २नलाचीनलपट्टिका २॥ नीपोधराकदंबः २स्याद्धीरभद्रस्तु वीरणं २॥ ७७॥ खट्टरस्तुबृहत्काशं२ कोशांगमिल्कटं२विदुः॥ गंडीरस्तुसमंठः२स्याद्धीबेरंवारिवालकं २॥ ७८॥ शितोत्पलगं धसोमं २हरिमंथोतिमुक्तकः २॥ कर्कारुकस्तुकालिंगः २शृंगा टोजलकंटकः २॥७९॥ हिलमोचीजलब्रह्मी २वायसीकाकमा चिका २॥ पुंनागःकेसरश्चैव २चांपेयोनागकेसरः २॥ ८०॥ स्या- द्दोलिकाचहिंदोला २ल्लावणंलवणं २मतं॥ क्षुरवाशोराजनिमि षः२ कटुकोराजसर्षपः २॥ ८१॥ सितमाषोराजमाषो २मसूरो- व्रीहिकांचनः २॥ मधुक्षीरस्तुखर्जूरः२ शालःशंकुतरु२मतः॥ ८२॥ मुस्तोराजकशेरुः२ स्याद्धीहिणश्चंदनद्रुमः २॥ काकमद्गुर्ज लरंकः २कोयष्टिर्जलकुक्कुभः २॥ ८३॥ वर्तिकाचिष्णुलिंगी२स्या द्दूनाखुःशशकः२स्मृतः॥ ताम्रकृमिरिंद्रगोपो २गृहगोधागृहालि

शूद्रशासनस्य २ पट्टाख्यपत्रस्य २ रक्तशासनस्य २ (७५) गोपक्रीडायाः २ गोप शिशुगीतस्य २ वंशविशेषस्य ३ नवीनस्य २ (७६) मुखवाद्यस्य २ नलिपट्टिकायाः २ धराकदंबस्य २ वीरणस्य २ (७७) बृहत्काशस्य २ कोशांगस्य २ गंडीरस्य २ ह्रीबे रस्य २ (७८) सीतोत्पलस्य २ अतिमुक्तस्य २ कर्कारुकस्य २ शृंगाटस्य २ (७९) हिलमोच्याः २ काकमाच्याः २ पुन्नागस्य २ नागकेसरस्य २ (८०) हिंदोलिकायाः २ सौंदर्यस्य २ क्षुरवाशकस्य २ राजसर्षपस्य २ (८१) सितमाषस्य २ क्षुद्रमसूर- स्य २ खर्जूरस्य २ सालवृक्षस्य २ (८२) मुस्तस्य २ रक्तचंदनस्य २ जलरंकस्य २ कारंडवपक्षिणः २ (८३) वर्तिकायाः २ शशस्य २ ताम्रकृमेः २ (८४)

का२॥ ८४॥ दिवांधोहरिनेत्रःस्याद्गोनंदीलक्ष्मणा २ मता॥ कुरंकुरः पुष्कराव्हो २ वातुलिस्तरुतूलिका २॥ ८५॥ कोलपुछस्तु कंकःस्याद्गर्गाटो योगनाविकः २॥ ग्राम्यमद्गुरिका शृंगी २ राजशृंगस्तु मद्गुरः २ ॥ ८६॥ पंकग्राहस्तु मकरः २ शफरः श्वेतकोलकः २॥ चिंगटस्तु महाशल्कः २ पोताधानं जलांडकं २॥ ८७॥ फलकीतु चित्रफली २ मत्स्यराजस्तु रोहितः २॥ काकोचिकस्तु काकोची २ वकाचीवकचिंचिका २॥ ८८॥ कवयीककचपृष्टी २ खलेशस्तु खलेशयः २॥ इल्लिशो राजशफर २ इंचाकोजलवृश्चिकः २॥ ८९॥ दंडपालोर्धशफरः २ कंकत्रोटोजलव्यथः २॥ लघुगर्गस्त्रिकंटःस्यात्सित्तांको वालुकागडः २॥ ९०॥ कनकपलः कुरुबिस्तः २ करिकवल्लो विधानंस्यात्॥ श्राद्धीतु पंकगडकः २ शकुलो दंडपालकः २॥ ९१॥ निचोलकं निचुलकं २ मंदामणिरलिंजरः २॥ वेदिः स्थंडिलसितकं २ पल्याटो निष्कुठः स्मृतः ॥ ९२॥ लोपासिका खिंखिरी स्यात्पल्याटो निष्कुटः २ स्मृतः ॥ अंकेष्वेवांकमंगानि २ स्मृत मुत्तानमुत्कटं २॥ ९३॥ स्यान्मार्जितार सालास्त्वबुक्कारः सिंहनादकः २॥ कर्णगूथं कर्णमलं २ सिंहाणंना

सुशाल्याः २ (८४) पेचकस्य २ सारसयोषितः २ सारसस्य २ वादुलेः २ (८५) कंकपक्षिणः २ गर्गाटमत्स्यस्य २ शृंग्याः २ मद्गुरस्य २ (८६) मकरस्य २ शफरस्य २ चिंगटस्य २ रोहितादिशिशोः २ (८७) फलक्याः २ रोहितस्य २ काकोचिकस्य २ वकचिंचिकायाः २ (८८) कवयीमत्स्यस्य २ खलेयशस्य २ इल्लिशस्य २ जलवृश्चिकस्य २ (८९) अर्धशफरस्य २ जलव्यथस्य २ त्रिकंटस्य २ वालुकागडस्य २ (९०) कनकपलस्य २ करिकवलस्य २ पंकगडकस्य २ शकुलस्य २ (९१) निचोलस्य २ अलिंजरस्य २ वेद्याः २ उपवनस्य २ (९२) खिंखिरिकायाः २ पल्याटस्य २ अंगस्य २ उत्तानशयनस्य २ (९३) नक्रस्य २ सिंहनादस्य २ कर्णमलस्य २ (९४)

सिकामलं२॥ ९४॥ दंतमलं पुष्पिका २स्यात्कुलकं रसनामलं २॥ कारंधमी धातुवादी २ दरिद्रो दुर्विधः२ स्मृतः॥ ९५॥ स्यान्मंत्रगंडकोविद्या २ पक्षद्वारं खडक्किका २॥ आर्द्रवस्त्रं जलार्द्रं स्याद्दोषश्चादीनवो मतः॥ ९६॥ योजनं मार्गधेनुः२ स्यान्नल्वः किष्कुचतुःशतम् २॥ चोलको वाणवारः२ स्यात्कुर्पासस्त्वर्धचोलकः२॥ ९७॥ नागोदरमुरस्त्राणं२ जंघात्राणं तु मंक्षणं २॥ स्यात्प्रासादो देवकुलं नेत्तुर्वेत्यं श्विनासुरवं॥ ९८॥ तृणपूली तु चंचा २स्याद्यथार्थं तु यथातथं२॥ आघातनं वधस्थानं२ कारा बंधनवेश्मनि२॥ ९९॥ स्कंधाग्निः स्थूलकाष्ठाग्नि२ स्तृणाग्निस्तु भवेत्समः२॥ इंगलस्तु करीषाग्नि२र्ज्वराग्निस्त्वाधिमन्यवः २॥ २००॥ श्वशुरः स्वामिजनकः२ साधुधीर्वरवत्सला २॥ भगसार्थस्तथा विद्धो २ हेलाबुकोऽश्वविक्रयी २॥ २०१॥ गृहवित्तो गृहपति२ स्तुंबीपुष्पं लतांबुजं २॥ लोहिका खरसो निः स्यान्निलिंपस्त्रिदशः२ स्मृतः॥ २॥ गंडूपदी भूलता२ स्यान्मंडरी घुर्घुरी २मता॥ स्वच्छस्त्वंगुलिसंदेशो २लंघनं चापतर्पणं२॥ ३॥ गजदक्का मदाम्नातः२ श्रृंगारो गजमंडनं २॥ प्रतिमोरणरंकः२ स्यात्वंटकः

नासिकामलस्य२ (९४) दंतमलस्य२ जिह्वामलस्य२ स्वर्णकारस्य२ दरिद्रस्य२ (९५) विद्यायाः २ पक्षद्वारस्य२ आर्द्रवस्त्रस्य२ दोषस्य२ (९६) योजनस्य२ नल्वस्य२ कवचस्य२ कूर्पासस्य२ (९७) उरस्त्राणस्य२ जंघात्राणस्य२ देवप्रासादस्य२ यज्ञस्थानभेदस्य २ (९८) तृणपूल्याः२ यथार्थस्य २ वधस्थानस्य२ बंधनवेश्मनः२ (९९) काष्ठाग्नेः२ तृणाग्नेः२ करीषाग्नेः२ ज्वराग्नेः२ (२००) श्वशुरस्य२ स्वस्राः२ कुटिलस्य २ अश्वविक्रयिणः२ (२०१) गृहपतेः२ तुंबीपुष्पस्य२ लोहपुष्पस्य२ त्रिदशस्य२ (२०२) भूलतायाः२ घुर्घुर्याः२ अंगुलीध्वनेः२ लंघनस्य२ (३) गजदक्कायाः२ गजश्रृंगारस्य२ रणकातरस्य२ (४)

कद्रःसृणिः ३॥४॥ वीचीजललता भंगिः ३ फेणाग्रं बुद्बुदो बिंदुः॥ जंबालो जलकल्कः २ स्यादारणिः कुलहंडकः २॥५॥ विनाकृतं विरहितं २ गंडूषो मुखपूरणे २॥ काष्ठमल्लः शवयानं २ कषाय १ स्तूवरो रसः॥६॥ पर्वावधिः परग्रंथिः २ पिंजोला पत्रकाहला॥ गोहल्लं छगलं गोविट् ३ परिघो द्वारकंटकः २॥७॥ कर्करं चूर्णखंडे २ स्यात् कर्कसारं करंभकं २॥ स्पर्द्धायामपि संहर्षः २ कठोरं कर्करं २ विदुः॥८॥ वंदी कवरकी २ माहुरासंदी लघुखट्विका २॥ घटराजः स्मृतः कुंभो २ गर्गरी कलशिः २ र्मता॥९॥ विदुरजन्यमुत्पातं २ निर्घाते व्योममुद्गरः २॥ पर्यंतिका गुणभ्रंशो २ गागेष्टी कटशर्करा २॥१०॥ उल्कांकुलुक्कगुंजा २ स्यात्कुलक्कस्ताल मर्दलः २॥ सूचकोणे डमरुकं २ सूत्रवीणा च लावुकी॥११॥ मेलानंदो मसिमणि २ र्लेखनी वर्णतूलिका २॥ धातूपलः कठिनिका २ मेला पत्रांजनं मसिः ३॥१२॥ तर्कुटी सूत्रला तर्कु ३ र्झल्लोलस्तर्कुलासकः २॥ वर्त्तुला तर्कुपादी स्या २ त्पंजिकातूलनालिका २॥१३॥ निर्वेष्टनं नाडिचीरं दग्धेष्टका स्याज्झामकम्॥ दोला प्रेंखा पुमान्प्रेंखो ३ वारासनं वास्सदनं॥१४॥ पिष्टवर्त्तिस्त

अंकुशस्य ३ (४) तरंगस्य ३ फेनाग्रस्य २ जलकल्कस्य २ आरणेः २ (५) विरहितस्य २ गंडूषस्य २ शवयानस्य २ कषायस्य २ (६) अंगुलीपर्वणः २ पिंजोलायाः २ गोमयस्य ३ द्वारलगुडस्य २ (७) कर्करस्य २ दधिसक्तोः २ स्पर्धायाः २ कठोरस्य २ (८) कवर्याः २ लघुखट्वायाः २ कुंभस्य २ कलश्याः २ (९) उत्पातस्य २ निर्घातस्य २ गुणभ्रंशस्य २ कटशर्करायाः २ (१०) उल्काग्नेः २ करताल्याः २ डमरुकस्य २ सूत्रवीणायाः ३ (११) मसिमणेः २ कलमस्य २ धातूपलस्य २ मसेः २ (१२) तर्कुट्याः ३ तर्कुलासकस्य २ तर्कुपीठ्याः २ तूलनलिकायाः २ (१३) निर्वेष्टनस्य २ दग्धेष्टकायाः २ दोलायाः २ जलस्थापितमंचस्य २ (११४)

चमसश्चित्रापूपश्चरुव्रणः २॥ म्लेच्छितंपरभाषायां २ लुंटिकान्याय सारिणी २॥१५॥ शूकापूट्टस्तृणमणि २ श्छात्रगंडःपदाद्यवित् २॥ कोशकारःकाष्ठतंतु २ र्घुणःस्यात्काष्ठलेखकः २॥१६॥ विषशृंगीभं गरोलो२ वरोलस्तृणषट्पदः २॥ तुटमोरंध्रबभ्रुःस्याद्दीनालिंगा लिका २ स्मृता॥१७॥ विदारुक्रकचपादो २ द्रुणाश्चालिश्चवृश्चिकः ३॥ पद्माक्षंपद्मबीजं २ च कर्णिकाबीजमातृका २॥१८॥ रंगमाताभ वेल्लाक्षा २ धीलटिर्दुहिता २ मता॥ चाटलोलश्चटुक्लोलो २ जेंगटो दोहदः २ स्मृतः॥१९॥ धौतांजलीधौतबली २ वज्रकंदुग्धपाचनं २॥ चित्रोक्तिःपुष्पशकटी २ चासेचनमतृप्तिकृत् २॥ २०॥ कालरात्रि र्भीमरथी २ अस्वाध्यायोनिराकृतिः २॥ ब्रह्मवादःश्रुतादानं २ विश्व कद्रुरखेटिकः २॥२१॥ हिंसालुकः १ खादुकःश्वायोगितो १ लर्क२इ ष्यते॥ द्रगडस्तूर्यगंडःस्यादादर्शोमुकुरः २ स्मृतः॥२२॥ राहूत्स्त्र ष्टोरसोनः २ स्याद्दूंगरीकोलनासिका २॥ मयटःस्तृणहर्म्यः २ स्यात्कु त्रंगोमंचमंडपः २॥२३॥ स्नवद्गंगःपणग्रंथि २ श्चिनिकाकटिशृंखला २॥ विशारदःप्रसिद्धः २ स्यात्श्रीलक्ष्मीरिंदिरा ३ मता॥२४॥ ॥

॥ इतिपादावधिः॥

यज्ञपात्रविशेषस्य २ चित्रपिष्टकस्य २ अपशब्दस्य २ लुंटिकाया २ (१५) तृणमणेः २ पदाद्यवेत्तुः २ कोशकृमेः २ घुणस्य २ (१६) विषशृंगिनः २ तृणषट्पदस्य २ रंध्रबभ्रोः २ दीनायाः २ (१७) क्रकचपादस्य २ वृश्चिकस्य ३ पद्मबीजस्य २ पद्मकोशस्य २ (१८) लाक्षायाः २ दुहितुः २ कृचंचलस्य २ गर्भिण्यभिलाषस्य २ (१९) धौतांजल्याः २ दुग्धपाचनस्य २ क्षुद्रशाकटस्य २ अतृप्तिकृतः २ (२०) कालरात्र्याः २ अस्वाध्यायस्य २ ब्रह्मवादस्य २ मृगयाकुशलशुनः २ (२१) हिंसालुकशुनः २ उन्मत्तशुनः २ सूर्पविशेषस्य २ आदर्शस्य २ (२२) लसुनस्य २ कोलनासिकायाः २ तृणयुक्तहर्म्यस्य २ शस्यरक्षार्थकुटीरस्य २ (२३) पणग्रंथेः २ कटिशृंखलायाः २ प्रसिद्धस्य २ लक्ष्म्याः २ (२४)

श्रावृशालावृकशब्दादयैः पादैरतः परं शब्दाः ॥ नानार्थाअपिशब्दे गजशब्दाप्रभृतिविज्ञेयाः॥२२५॥ ॥

॥ अथनानार्थः॥

क्षीरदारोगुडक्षोदेगुडेमधुनिचेष्यते॥ कूपीटपानमिछंनिकेनिपातेचवारिधौ॥२६॥ रसालारसनायांस्यान्मथितेदध्निपाणिना॥ पांच लोहेश्रुतिकटः प्रायंचित्तेसरीसृपे॥२७॥ विटोद्वौलवणेषिड्गे मूषिकेखदिरेपिच॥ वितंडाकरवीर्यांचदर्विवादप्रभेदयोः॥२८॥ कारंडवेकरंडः स्यान्मधुकोषेदलादके॥ खटः श्लेष्मण्यंधकूपेप्रहारांतरटंकयोः॥२९॥ पिछाप्रुगछटाकोषेचोलिकाफणिलालयोः॥ पिछलोस्फोटिकावात्यारामावाताखुर्णाशवः॥३०॥ धरांकुरोवायुफलेनासीराद्रीकरेपिच॥ कोट्टारोनागरेकूपेपुष्करिण्यांचपाटके॥३१॥ नागांजनानागयष्टिः करिसंदरिकाक्वचित्॥ पूर्यंटुः पूतिकोदेचगंधकारेचदृश्यते॥३२॥ कटुकायांकंचटकेकथिताशकुलादनी॥ क्रौंचादनस्तथैचुल्यांचिंचोदकमृणालयोः॥३३॥ संतानिकाक्षीरसरेतथामर्कटजालके॥ खड्गधेनुफलेफेनेपरांजस्तैलयंत्रके॥३४॥ भालांकोलोहितेदृष्टः करपत्रेचकछपे॥ संकरोग्निचटत्कारेसंमार्जन्यपसारिते॥३५॥ गोधाकलंविकादंतिवधूश्चकटंभरा॥ पंकारः शैवलेसेतौसोपानेजलकुब्जके॥३६॥ दृषदृगृंगीतिशब्दोयंदंशाभीरोपशूद्रे॥ मेघपुष्पंतुनादेयेपिंडाभ्रेसलिलेविदुः॥३७॥ पित्तज्वरेकुलालस्यपवनेकूटपालकः॥ स्तनवृंत्तेपिप्पलकंतथासीवनसूत्रके॥३८॥ पाटक्रिकोन्यमर्मज्ञेछात्रेस्यात्कालदेशिनि॥ जिव्हापोतृषदंशोचस्यादिंदमहकर्मणि॥३९॥ लाभेकामगुणेरूपेआमिषाख्यातुभोजने॥ छायापयेचदूर्वायांहरितालीध्वनिर्मितिः॥४०॥ मालुधानश्चित्रसर्पेमहापद्मेपिदृश्यते॥ उन्मत्तेक्षपक्षेनर्थकरेकार्यंपुटध्वनिः॥४१॥ सांघाटिकांविदुर्युग्मंकुट्टन्यां

जलकंटके॥शशाहतेचसर्पेचप्रचन्नाकंपचक्षते॥४२॥ चंद्रिकायाम
ञ्जभूलौरक्तांगेहरिचंदनं॥स्त्रीरत्नेचहारिद्रायांलाक्षायांवरध
र्णिनी॥४३॥कृकलासेचित्रकोलेतृणागोधाध्वनिंविदुः॥डिंबं
भयेचकललेफुप्फुसेचप्रचक्षते॥४४॥धुंधुमारःशक्रगोपेगृहधूमे
गृहालिके॥ निस्तपर्वाहिलमोचीगुडूचीमधुयष्टिषु॥४५॥जल
बिल्वःकर्कटकेपंचांगेजलवल्कले॥ चोलकीनागरंगेचकरीरेक्षि
क्षुपर्वणि॥४६॥कुलालचक्रेवाहनेदंडारःशरयंत्रके॥ दिग्जयेवर
यात्रायांदंडयात्रांविदुर्बुधाः॥४७॥उष्ट्रेदासीकृतेचैवदासेरकउ
निस्मृतः॥जलगुल्मोजलावर्तेकछपेजलचत्वरे॥४८॥ काहला
वेणुवीणादिध्वनिनानाध्वनिंविदुः॥ घोंघेकाघंडिकायांचजाह
कध्वनिरिष्यते॥४९॥विद्यादुल्कलिकाशब्दमुत्कंठावीचिवाच
कं॥दृष्टिविषेसृचकेचद्विजिव्हःपरिकीर्तितः॥५०॥ मदमत्ताविद
ग्धस्त्रीनर्तकीषुचवाणिनी॥रोमावलीमेघमालाकरटीषुचकालि
का॥५१॥ मंजुलोमधुरेकुंजेजलरंकेजलांचले॥अनुकंप्यस्तरसी
स्यात्तपस्वीचधृतव्रतः॥२५२॥ ॥इतिनानार्थार्ध-
श्लोकावलिः॥ ॥ शालावृकोकपिश्वानौनिष्ठुरःक
ठिनेऽभपे॥ छर्दनोलंबुषेनिंबेक्षुपकस्तेतथोषिने॥५३॥ इक्षोकरी
रेकोषांगेव्रणचिन्हेघुणेकिणः॥ नर्मठंचचुकेपिंगेछेकःषडंघ्रिवक्र
योः॥५४॥धाराटश्चातकेवाहेलंजःस्यात्संगुकछयोः॥नर्मटः
खर्परेसूर्येगोकिलोमुशलेहले॥५५॥भंडिरीधारुकूष्मांडोपफा
णिर्गुडकलंबयोः॥नंडकःखंजनेफेनेलट्वाशिन्यांखगोनरे॥५६॥
गजेपिनागमातंगौ विशेषास्तिलकेपिच॥ निष्पारःसूर्पवातेपि
सूभ्रकंठोद्विजेपिच॥५७॥विदुष्यपिस्मृतोवेधाःपुरंदेहेपिदृश्यते
॥खरेपिकटआख्यातःशरत्संवत्सरेपिच॥५८॥लाक्षापिजतुकाप्रो
क्ताउपाचार्येपिहिंडिकः॥नौसेचनेपिचारुंडःपादालिंदेपिपंकिलः

॥५९॥ कन्थांगीष्यानिपुत्रेपिकुंदेपिभ्रमरो वटौ॥ भांडंभूषणमात्रे पिरुधिरंकुंकुमेपिच॥६०॥ गोमेदकेपिगंगोलः कटाहोनिरयेपि च॥मरीचेपिभवेत्कृष्णःश्रृनांगेगुणिकाभवेत्॥६१॥शस्त्रेमपिखड्गधेनु र्निस्त्रिंशोऽकरुणेपिच॥स्कंधावारेपिकटको- विंदुस्तुविदुरेपिच॥६२॥जलसूचिर्जलौकापिवेश्यायामपि- पिंगला॥अहिरप्युदरावर्तेविशाखापिखनित्रिकः॥६३॥भ्र मरःकामुकेपिस्याद्दंगीकारेपिचार्थकिं॥महालयेपितीर्थःस्यात् भोजनेपितथाह्निकं॥६४॥बलिश्चामरदंडेपिपादपीठेपिपादपः गोदंतोहरितालेपिपानीरश्चित्रकेपिच॥६५॥आधारेप्याश्रयः प्रोक्तोगजसंघेप्यवग्रहः॥कथितापाजटापांचमार्गणेपिमृगः क्वचित्॥६६॥मूषिकापिभवेद्धीना जटाटंकोहरेपिच॥अश्म कूतेपिफांटंमृद्भांडेऽप्युष्ट्रिकाभवेत्॥६७॥अंगसादेपिसदनं घनरावेपिझिंझिमः॥दंतमांसेपिवेलास्याच्छुल्कंनारीधनेपिच ॥६८॥निंबेपिहिंगुनिर्यासोमेलानंदेपिचार्दलं॥लेखन्यांकूर्णि कापिस्यात्कठिन्यामपिवर्णिका॥६९॥पटलेपिकासमर्दोदिष्टं देवेपिकीर्तितं॥दाडिमेपिचहिंडीरंवंशोवेणौकुलेपिच॥२७०॥

॥ ॥ ॥ इतिनानार्थः॥ ॥ ॥

काव्यादीनामनंतत्वाच्छब्दादीनांविशेषतः॥क्वकदाकेनकिंदृष्ट मितिकोवेदितुंक्षमः॥७१॥अतःशब्दःक्वदृष्टोयमर्थतश्चापिकीदृ शः॥इतिकाव्यमलीकंस्यान्मात्सर्यमलिनात्मनां॥७२॥शब्दार्णव उत्पलिनीसंसारावर्तइत्यपि॥कोषावाचस्पतिव्याडिविक्रमादित्य निर्मिताः॥७३॥आदायसारमेतेषामन्येषांचविशेषतः॥हारावली निर्मितेयंमयाद्वादशवत्सरैः॥७४॥उपास्यसर्वज्ञमनंतमीशंभूत्वा तिथिःश्रीधृतिसिंहधाम्नां॥हारावलीद्वादशमासमानैर्विनिर्मितेयं पुरुषोत्तमेन॥७५॥नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृ

तिर्ज्योतिःशास्त्रगजाश्वमानवभिषक्कोषान्प्रयत्नाद्दियं ॥ दृष्ट्वान्यानित्यशाब्दिकैः सह कृता हारावलीयत्नतः कर्तव्योत्र न संशयः कमनसश्शब्दार्थलिंगेष्वपि ॥७६॥ कधियाजनमेजयेन यत्नात् धृतिसिंहेन समं निरूपितेयं ॥ विदितो बहुदृश्वभिः कवींद्रैः फक्कवि-कोषानुमतः श्रमो मदीयः ॥७७॥ हित्वा महाशाब्दिकताभिमानं-मात्सर्यमन्यत्र मुहुर्निधाय ॥ हारावलीं यः प्रकरोति कंठे विदग्धगोष्ठीषु परं स भाति ॥७८॥ ॥२७८॥

इति श्रीमहामहोपाध्यायपुरुषोत्तमदेवप्रणीता हारावली पर्यवसिता ॥ ॥

चीफ ऑफ भोर

पुंबईत ज्ञानदर्पण छापखान्यांत छापिलें शके १७७६
आनंदनामसंवत्सरे वै॰ व॰ १०